श्रीगणेश

शिवलाभ्यर्लो पूजाप्रः

२

१६६

नं० १४३५-घ

पत्राणि १६६

त्रि.टी०
१

॥ ॥श्रीगणेशाय नमः॥ ॥श्रीदक्षिणामूर्तये नमः॥ ॥प्रणयकलहकाले भीषणां भीतिहेतोः प्रकटयति स मंत्राम्नाययाका-
यमस्मिन्। स भयमथ भवान्या गाढमालिंग्यमानो घटयतु घनविघ्नध्वंसमस्माकमीशः॥१॥ निशम्याखिलं शास्त्रं नानागुरुमुखाद्बु-
जातं। अनुमानप्रकाशोयं रुचिदत्तेन तन्यते॥२॥ संगतिं दर्शयन्नेव शिष्यावधानार्थमिदानीमनुमाननिरूपणं क्रियत इति शति
जानीते। प्रत्यक्षेति। अत्र प्रत्यक्षस्यानुमाने प्रतिसाक्षात्परंपरया वा हेतुत्वमुपजीव्यत्वं। यद्यप्यनुमानोपनीतप्रत्यक्षे अनुमानस्यो-
पजीव्यत्वं प्रामाण्यग्राहकत्वेन च तत्र तस्योपजीव्यत्वं तथापि न प्रत्यक्षत्वावच्छेदेन तथा प्रत्यक्षत्वमनुमानत्वावच्छेदेनैवाथे
ति। बहुवादीति। तथा चाल्पवादिविप्रतिपत्तिनिरासपूर्वकनिरूपणं तया प्रथममनुमाने शिष्यजिज्ञासाविषय इत्युपमा-
ननिरूपणात्प्रागभावो अनुमाननिरूपणस्येति भावः। यद्यपि प्रथममक्लिष्टेन बहुविप्रतिपत्तिनिरासः कर्तुं शक्यत इति वैपरी-
त्यमर्हं तथापि यत्रोपमानं परैरंतर्भावनीयं यतो वास्माभिर्वहिर्भावनीयं तदनुपदर्शने उपमानमपि न दर्शयितुं शक्यत इ-
त्यनुमानप्राथम्यं। अथ यानुमाने निरूप्यत इति पाठे यत्राद्रैस्य वायमर्थः। प्रत्यक्षानंतरमनुमानोद्देशात्तल्लक्षणानंतरम-
नुमानलक्षणं क्रियत इति वार्थः। तत्र॥ अनुमाने निरूपणीये। क्रियाद्वारा करणलक्षयितुं प्रथमं क्रियालक्षणमाह। अनुमितीति।

व्याप्तिविशिष्टं च तत्पक्षधर्मताज्ञानं चेति कर्मधारयः। व्याप्तिवैशिष्ट्यं च तद्विषयकत्वं तत्प्रकारकत्वमिति यावत्। एवं च व्याप्तिप्र
कारकपक्षधर्मताज्ञानजन्यत्वे पर्यवस्यति। ननु विशकलिते व्याप्तिं व्यभिचाराभावं सहचारं च स्मरतः पक्षे तद्धेतौ तदुभयवैशि
ष्ट्यभानाद्यत्रानुमितिस्तत्राव्याप्तिः। व्याप्तेः पूर्वानुपस्थितत्वेन तत्राप्रकारत्वात्। न च ततोऽनुमितिर्न भवत्येवेति वाच्यं। अनुभ
वविरोधादिति चेन्न। व्यभिचारज्ञानविरोधिप्रकारेण व्याप्तिविषयकत्वस्यैव व्याप्तिप्रकारकपदेन विवक्षितत्वात्। तादृशश्च प्रका
रो व्याप्तिघटकयत्समानाधिकरणात्यन्ताभावप्रतियोगित्वादिरूपः। अत एव प्रमेयत्वप्रकारकव्याप्तिज्ञानान्नानुमितिः।
तज्ज्ञानस्य च व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वेन जनकत्वं विवक्षितं तेन न तदनुव्यवसायेन तज्जन्यस्मरणेन वा यज्जन्यत्वाद्व्याप्त्येना
नादौ च नातिव्याप्तिः। यत्तु व्याप्तिविशिष्टेति भावप्रधानो निर्देशः। द्वंद्वश्च समासः। एवं च व्याप्तिविशिष्टत्वपक्षधर्मत्वप्रकारक
थे ५ ज्ञानजन्यत्वं तत्त्वमिति तन्न तुच्छं। वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शे व्याप्तेः प्रकारत्वेऽपि तद्वैशिष्ट्यस्याप्रकारत्वात्पक्षधर्म
त्वस्य संसर्गरूपतया सर्वथैवाप्रकारत्वाच्चाव्याप्तेः। न चैतादृशपरामर्शेनानुमितिर्न भवत्येवेति वाच्यं। अनुभवविरोधात्।
लाघवेन तादृशस्यैव हेतुत्वाच्च।। अत एव व्याप्तिविशिष्टश्चासौ पक्षधर्मश्चेति कर्मधारयोत्तरं तत्त्वप्रत्ययेन व्याप्तिविशिष्टत्व
समानाधिकरणपक्षधर्मताल्लभ्यते। तथा च व्याप्तिविशिष्टत्वसामानाधिकरण्येन पक्षधर्मत्वं यज्ज्ञानं विषयीकरोति

चि०

वह्निव्याप्यधूमवानयमित्याकारस्तृतीयलिंगपरामर्शात्मकेनज्ञानेनज्ञानमस्त्विति निरस्तमर्थेइत्यपास्तं।उक्तपरामर्शस्य व्याप्तिवि
शिष्टत्वसामानाधिकरण्याविषयत्वात्।तद्वैशिष्ट्यस्याप्रकारतयातत्संबंधागोचरत्वात्।उक्तन्यायेनैवपक्षधर्मतासामा
नाधिकरण्याविषयत्वाच्च॥तस्मादुक्त एव कर्मधारयोनुसर्तव्यः।एवंच व्याप्तिविशिष्टपक्षधर्मतेत्यत्र यदि कर्मधारयस्त
दाऽनुमानुमितिव्याप्तिः।तत्पक्षेतिपाद्यभेदस्य तत्र बाधात्।न चात्र शमैवसंग्राह्येति वाच्यं।अनुमानुमितावधर्मशेप्रमानुपसं
ग्रहापत्तेः।यदि चद्वंद्वस्तदाऽप्रमानुमित्यव्याप्तिः।तत्पक्षेतिपाद्यभेदस्य तत्राबाधादिति निरूषणामलग्नकंदृष्टव्यं॥केचित्तु
समभ्यमानपदार्थयोरभेदेपिपदार्थतावच्छेदकभेदादेवद्वंद्वस्यसाधुत्वं यथाप्रमाणप्रमेयसंशयेत्यादिसूत्रे॥एवंचा
त्रसएवसमासइत्याहुः।नन्वेवमपि विशेषदर्शनजन्योसंशयविपर्ययोतरप्रत्ययोहेतिव्याप्तिः तस्य व्याप्तिविशिष्टपक्ष
धर्मताज्ञानत्वेनैवतदजनकत्वादिति चेत्॥अत्र केचित्॥तस्य विशेषदर्शनस्यातत्वेन न जनकत्वं किंतु भ्रमविरो
धित्वात्तद्विशेषदर्शनत्वादिना।अन्यथा शंखेपीतत्वभ्रमानंतरंश्वेतत्वव्याप्यशंखत्वादिरूपविशेषदर्शनेश्वेतत्वप्रत्य २
क्षतापत्तेरिति।तन्न॥एवमपिसंशयोत्तरप्रत्यक्षानतिव्याप्त्यवारणात्।नहितत्रापितस्यतत्त्वेनजनकत्वं।व्याप्यदर्श
नमात्रस्य भ्रममात्राविरोधित्वेपि संशयमात्रविरोधित्वात्॥अस्मेत्तु संशयोत्तरप्रत्यक्षेविशेषादर्शनेनपरामर्शस्य

जनकं किंतु करादिपुरुषत्वव्याप्यमयं चकरादिमानिति ज्ञानद्वयात्मकमेव। तत एव तदुपपत्तौ तत्कल्पने मानाभावात्। तथा च न
तत्रातिव्याप्तिरिति। तन्न। यत्र दैववशात्प्रथममेवैतादृशः परामर्शः तत्र तज्जन्यप्रत्यक्षे तयाप्यतिव्याप्तेः। लाघवेन परामर्शस्यै
वकारणत्वाच्च।। अन्यथानुमितावपि ज्ञानद्वयस्यैव कारणतापत्त्या वसंभवापत्तेः।। अन्येतु सिसाधयिषाविरहदशायां सिद्धे
रनुमानेतरसाधकमानस्य चानुमितौ प्रतिबंधकत्वमिति सर्वजनसिद्धं।। तथा च सिसाधयिषाविरहसहकृतसिद्ध्यनुमा
नातिरिक्तसिद्धिकरणान्यान्याभावः पक्षता।। एवं च तत्र प्रत्यक्षादौ सिसाधयिषाविरहसहकृतस्यानुमानातिरिक्तस्य प्रत्यक्षस्यै
व साधकमानस्य सत्त्वेन तत्र पक्षताविरहादुक्तलक्षणागमनान्न तत्रातिव्याप्तिरिति। न च सिसाधयिषाविरहे सति सिद्धिदशा
यामेव न पक्षता न त्वनुमानातिरिक्तसाधकमानदशायामिति वाच्यं।। तर्हि पक्षतासत्त्वे न तत्रानुमित्यापत्तेः। प्रत्यक्षसामग्र्या
प्रतिबंधादिति चेत्। तर्हि प्रत्यक्षसामग्र्यां सत्यामनुमित्सादशायामप्यनुमितिर्न स्यात्। अनुमित्सयापि हि पक्षतैव वा पाद
नीया।। सा च प्रत्यक्षसामग्रीसत्त्वे सत्यनुमितिप्रत्ययोर्निकेवत्वया क्रनेति।। तदापि ना।। सिसाधयिषाविरहसहकृतसि
द्ध्यभावस्यैव पक्षतात्वेन तत्सत्त्वात्। नैवं तत्रानुमितिः स्यादित्युक्तमिति वाच्यं।। समानविषये सिसाधयिषाविरहसहकृतानु
मानातिरिक्तस्य साधकमानस्यैव प्रतिबंधकत्वात्। ननु यत एव सिसाधयिषाविरहसहकृतसिद्धिवत्तयाभूतसाधकमाने

चिं॰ ३ स्यात्[illegible]पक्षतावच्छेदकत्वमत एव विनिगमनाविरहादुभयाभावाभावः पक्षतेति चेन्न । भवेदेवं यदि तदुभयाभावत्वेन कारणत्वं स्या

त्तान्न त्वेवं । येन हि रूपेणा[illegible]स्य प्रतिबंधकत्वं तदवच्छिन्नाभावत्वेनैव तत्र तदभावस्य प्रयोजकत्वात् । अन्यथा मणिमंत्राद्य

भावाभाववत्वेन दाहप्रयोजकत्वेऽपि भावकूटस्य हेतुत्वमिति सिद्धांतो व्याकुप्येत । एवं च तथाभूतसिद्धित्वेन तथाभूतसाध

कमानत्वेन वा [illegible]नोऽप्रतिबंधकत्वमिति तादृशसाधकमानाभाववत्वेन तादृशसिद्ध्यभाववत्वेन चाभावद्वयस्य कारणत्वं भवति ।

तत्वेकस्य तदुभयाभावत्वावच्छिन्नविशिष्टाभावस्य कारणीभूताभावस्यैव च पक्षतात्वोचितमात् । ननु कारणताविशेषेऽपि ता

दृशसिद्ध्यभाव एव पक्षतानु तादृशसाधकमानाभाव इत्यत्र किं विनिगमकं ॥ येन संशयोत्तरप्रत्यक्षस्थले पक्षता स्यादिति चेन्न ॥

अत्रोभयोः कारणत्वे किं पक्षपदप्रवृत्तिनिमित्तमिति विशेषस्य फलितार्थः । न च लाघवाद्योग्यत्वेन प्रथमोपस्थितत्वाच्च तादृशसि

द्ध्यभावत्वमित्युत्तरं । तादृशसाधकमानाभावस्यापि पदप्रतिपाद्योऽपि पक्षतावदन्तु मितौ कारणमिति संशयोत्तरप्रत्यक्षस्थले

पक्षतासत्वेऽपि तदभावाभाव[illegible]मितिरिति युक्तमुत्पश्यामः । अपि च ॥ मास्तु संशयोत्तरप्रत्यक्षस्थले पक्षता । तथापि तस्याः एव

कारणत्वेन कारण[illegible]केदृकत्वे मानाभावात् पक्षधर्मतापदेन साध्याधिकरणताभिमतधर्मताविवक्षणीया । तदा नज ३

न्यत्वं तत्रापीन्यतिरेके[illegible] विवर्जितेऽपायितेवेति । यत्तु संशयोत्तरप्रत्यक्षे विशेषदर्शनस्य तत्तेनजनकत्वं । प्रत्यक्षे प्रतिबंधकीभूत

3/1

जनकं किंतु करादिरूपत्वव्याप्यमयं वकरादिमानिति ज्ञानद्वयात्मकमेव । तत एव तदुपपत्तौ तत्कल्पने मानाभावात् । तथा च न तत्राति
व्याप्तिरिति । तन्न । यत्र दैववशात्प्रथममेवैतादृशः परामर्शः तत्र तज्जन्यप्रत्यक्षे तथाप्यतिव्याप्तेः । लाघवेन परामर्शस्यैव कारणत्वा
च्च ॥ अन्यथानुमितावपि ज्ञानद्वयस्यैव कारणतापत्त्या वैसंभवापत्तेः ॥ अत्रान्ये तु सिसाधयिषाविरहदशायां सिद्धेरनुमानेतरसाधकमा
नसत्त्वानुमितौ प्रतिबंधकत्वमिति सर्वजनसिद्धं ॥ तथा च सिसाधयिषाविरहसहकृतसिद्ध्यनुमानातिरिक्तसिद्धिकरणान्या
भावः पक्षता ॥ एवं च तत्र प्रत्यक्षादौ सिसाधयिषाविरहकृतस्यानुमानातिरिक्तस्य प्रत्यक्षस्यैव साधकमानस्य सत्त्वे न तत्र पक्षता
विरहानुकूलक्षणगमनात्र तत्रातिव्याप्तिरिति । न च सिसाधयिषाविरहे सति सिद्धिदशायामेव न पक्षतानत्वनुमानातिरि
क्तसाधकमा[illegible]दशायामिति वाच्यं ॥ तर्हि पक्षतासत्त्वेन तत्रानुमित्यापत्तेः । प्रत्यक्षसामग्र्याः प्रतिबंधादिति चेन्न । तर्हि प्रत्यक्ष
सामग्र्यां सत्यामनुमित्सादशायामप्यनुमितिर्न स्यात् । अनुमित्सयादशायामप्यनुमितिर्न स्यात् । अपि हि पक्षे तैर्वापादनी
या । सा च प्रत्यक्षसामग्री सत्त्वे सत्यनुमितिं प्रत्यप्रयोजिकैव त्वया कृतेति ॥ तदपि न ॥ सिसाधयिषाविरहसहकृतसिद्धे
[illegible]स्यैव[illegible]त्वेन तत्सत्त्वात् । न चैवं तत्रानुमितिः स्यादिष्टमिति वाच्यं ॥ समानविषये सिसाधयिषाविरहसहकृ

सिं ३

...नुमानातिरिक्तस्य साधकमानस्यैव प्रतिबंधकत्वात्। ननु पत एव सिसाधयिषाविरहसहकृतसिद्धिवत्तथाभूतसाधकमानस्या
...प्रतिबंधकत्वमत एव विनिगमनाविरहादुभयाभावाभावः पक्षतेति चेत्। मैवं एवं सति उभयाभावाभावत्वेन कारणत्वं स्यात्।
न चैवं। येन हि रूपेण ...स्य प्रतिबंधकत्वं तदवच्छिन्नाभावत्वेनैव तत्र तदभावस्य प्रयोजकत्वात्। अन्यथा मणिमंत्राद्यभावा
भावत्वेन दाहप्रयो...कत्वे मण्याद्यभावकूटस्य हेतुत्वमिति सिद्धांतो व्याकुप्येत। एवं च तथाभूतसिद्धित्वेन तथाभूतसाध
कमानत्वेन वानुमितौ प्रतिबंधकत्वमिति तादृशसाधकमानाभावत्वेन तादृशसिद्ध्यभावत्वेन वा अभावद्वयस्य कारणत्वं भव
ति। न त्वेकस्य तदुभयान्यतमत्वावच्छिन्नविशिष्टाभावस्य॥ कारणीभूताभावस्यैव पक्षतात्वोक्तिस्यात्। ननु कारणत्वाविशेषेपि तादृ
शसिद्ध्यभाव एव पक्षता न तु तादृशसाधकमानाभावस्तत्र किं विनिगमकं॥ येन संशयोत्तरप्रत्यक्षस्थले पक्षतास्यादिति चेत्॥ अत्रो
भयोः कारणत्वे किं पक्षपदप्रवृत्तिनिमित्तमिति प्रश्नस्य फलितार्थः। तत्र लाघवाद्योग्यत्वेन प्रथमोपस्थितत्वाच्च तादृशसिद्ध्यभावत्वमि
त्युत्तरं॥ तादृशसाधकमानाभावश्च पक्षपदाप्रतिपाद्योपि पक्षतावदनुमितौ कारणमिति संशयोत्तरप्रत्यक्षस्थले पक्षतासत्त्वेपि तद
भावान्नानुमितिरिति गुरूक्तमुपपद्यते नामः। अपि च॥ मास्तु संशयोत्तरप्रत्यक्षस्थले पक्षता। तथापि तस्याः पृथक्कारणत्वेन कारणता
वच्छेदकत्वे मानाभावात् पक्षधर्मतापदेन साध्याधिकरणत्वाभिमतधर्मताविवक्षणीया। तद्ज्ञानजन्यत्वं तत्रापीत्यनिव्याप्तिर्वज्रलेपा राम ३
यितैवेति। परंतु संशयोत्तरप्रत्यक्षे विशेषदर्शनस्य तत्र ... प्रतिबंधकमित [redacted]

स्वविशेषदर्शनाभावविशिष्टसंशयस्य विशेषणाभावप्रयुक्तमभावमापादयतस्तत्रतस्योपयोगित्वेनान्यथासिद्धत्वादिति। तदपि चिंत्यं। संस-
शयस्य प्रतिबंधकत्वे तत्कोटिकज्ञानमात्रे तन्मात्रकोटिकज्ञाने वा॥ नाद्यः॥ संशयानंतरमपि संशयानुत्पादप्रसंगात्॥ नांत्यः। तन्मात्रकोटि-
कज्ञानानुत्पत्तिर्हि तदापरकोटिज्ञानसामग्रीसत्त्वप्रयुक्ता। ननु तदुभयकोट्यारोपसंशयस्य प्रतिबंधकसत्त्वप्रयुक्ता। मानाभावात्।
अन्यथा घटपटसमूहालंबनकाले घटमात्रगोचरज्ञाने तत्समूहालंबनस्य प्रतिबंधकत्वाभ्युपगमापत्तिः। तत्सत्त्वे तदनुत्पत्तेः। पटज्ञा-
नसामग्रीसमावेशात् घटगोचरत्वेन न घटमात्रगोचरं तज्ज्ञानं न तु समूहालंबनस्य प्रतिबंधकत्वादिति यदि तदेतदत्रापि तुल्यं। तस्मा-
द्यथा घटपटोभयज्ञानसामग्र्योभयज्ञानमेकज्ञानसामग्र्या एकमात्रगोचरं तथा उभयकोट्यारोपसामग्र्या मुभयकोट्यारोपरूपसं-
शय एककोटिज्ञानसामग्रीवैकल्ये चैकमात्रकोटिकं ज्ञानं न तु तस्यापरत्र प्रतिबंधकत्वमिति। अयमेव विशेषो यदेकधर्मिगतत्वे-
नभासमानयो[illegible]त्वपुरुषत्वयोर्विरोधभानसामग्र्याविरोधोपि प्रकाशत इति तदुभयारोपः संशयत्वमापद्यते एकस्मिन्नर्थे
स्थितिभासमानेवि[illegible]ना[illegible]ाकोटिकज्ञानस्यैव संशयत्वात्। घटपटोभयज्ञाने तु न तथेति तस्य निश्चयत्वमेव। अत एव यत्र स्था-
णुत्वपुरुषत्वयोरविरो[illegible]भासः तत्र स्थाणुःपुरुषश्चेति निश्चय एव भवति यथा शिंशुपावेतिवत्। ननु पक्षता सह कृततदीजन्य त्वेन
व्यंचितं नयाःसंशयोत्तर[illegible]कलेपक्षता याः सत्वेप्यजनकत्वात्रातिव्याप्तिः। नचैवं पक्षताजन्यत्वमेवास्तामिति वाच्यं। तत्त्वे नजनकत्व

त्वात्तावन्मात्रेणैव सामञ्जस्यादित्यनुपदमेव वक्ष्यते ५

चिं० ४ स्याविवक्षिततया सिसाधयिषाविरहसहकृतसिद्ध्यभावरूपायाः पक्षताया योगपद्येन तज्ज्ञो वरस्पक्षत्वेति व्याप्तेः। न च पक्षतासहकृतव्या
प्तिधीजन्यत्वमेकस्मामिति वाच्यम्। व्याप्तिधीविषयकपक्षताविषयकसमूहालंबनसंभवेनातिव्याप्त्यापत्तेः पक्षतासहकृतपरामर्शस
त्वे चानुमितेरेवोत्पत्तेरिति तदुभयगोचरसमूहालंबनानुव्यवसायाभावान्नातिव्याप्तिरिति चेन्न। बाधसत्वेपि पक्षताकतारकाली
नपरामर्शेन पक्षतासहकृतेन जनिते तदुभयविषयकसमूहालंबने तथाप्यतिव्याप्तेः। न च परामर्शत्वेन जनकत्वं विवक्षितं।।
अनुव्यवसाये च नतत्वेन जनकत्वमिति नोक्तदोष इति वाच्यम्। पक्षतासहकृतस्य सर्वे पर्याप्तानाम्।। अत्रोच्यते। विशेषदर्शनस्य प्रत्यक्षमा
त्रे हेतुत्वे संशयोत्तरप्रत्यक्षमात्रे वा संशयोत्तरैकमात्रकोटिकप्रत्यक्षे वा।। नाद्यः। व्यभिचारात्। न द्वितीयः। संशयानंतरं विशेषद
र्शनं विना संशयान्तरानुदयप्रसंगात्। न तृतीयः। एवं हि विशेषदर्शने सत्येकमात्रकोटिकं ज्ञानं भवतु उभयकोट्यारोपसंशयानु
त्पादः कथं उभयकोट्यारोपसामग्र्या एव संशयहेतुत्वेन तत्सत्त्वे तदवश्यंभावात्। कार्याभावस्य सामग्रीविरहप्रयोज्यत्वनि
यमात्। अथैककोटिव्याप्यदर्शनस्यैव तद्धर्मिकापरकोटिज्ञानप्रतिबंधकतयाऽपरकोटिज्ञानसामग्रीविरहादेव न संश
य इति चेत्। हंतैवमपरकोटिज्ञानसामग्रीविरहे सामान्यसामग्रीत एव तन्मात्रकोटिकं ज्ञानमस्तु न तु तन्मात्रकोटिकप्रत्य ४
क्षज्ञानत्वं कार्यतावच्छेदकं। तत्कोटिव्याप्यदर्शनत्वं च कारणतावच्छेदकं। मानाभावात्। यथा परकोटिज्ञानसामग्रीविरहे सन्निघटज्ञा

॥ नचैवं विशेषदर्शनकाले पुरुषत्वस्यापत्तिः ॥ इष्टापत्तेः विशेषदर्शनेऽन्यतरमतइवैतन्मतेऽप्या ॥ ? विषय ? पक
त्वस्य स्थापगमात् ॥२

नसामान्यसामग्रीत एव घटमात्रगोचरज्ञानं ॥ न तु तज्ज्ञानत्वावच्छिन्नं प्रति विशेषसामग्र्यंतरमपि कल्प्यते । तथा च विशेषदर्शनस्यापरकोटि
ज्ञानप्रतिबंधकत्वेनैवोपयोगो न तु जनकत्वेनेति नोक्तातिव्याप्तिः ॥ ननु यदि व्याप्यदर्शनस्यारोपकोटिप्रतिबंधकत्वं तदा श्वेत्यव्याप्यशंख
त्वदर्शने सति पीतप्रत्यक्षं न स्यादिति चेन्न ॥ तत्कोटिप्रत्यक्षसामग्रीकाले तत्कोटिव्याप्यदर्शनस्याप्यनपगमात्प्रतिबंधकत्वे नस्वी
कारात् । स्वेतरप्रत्यक्षसामग्र्या स्वतत्त्वाभावात् । न चैवं विशेषदर्शनस्याकारणत्वे बाध्यबाधकव्यवस्थावधारणात्वानवधारणात्व
विभागाद्युक्तानेन स्यात् । सामग्र्या वैचित्र्ये फलवैचित्र्यादिति चेन्न ॥ विशेषदर्शनाव्यवहितोत्तरोत्पत्तिकत्वेनापि बाधकत्वसंभवा
त्तेश्चावधारणत्वं च ज्ञाने तत्कोटिविषयत्वे सत्यपरकोटिव्यवच्छेदविषय परकोटिव्यवच्छेदभानसामग्रीसमाजादौर्यसमानमहि
म्नैवोपपन्नं न हि विशेषसामग्र्यंतरं कल्पयतीति । अस्तु वा विशेषदर्शनस्य तत्र हेतुत्वं तथापि न तत्त्वेन हेतुत्वं किंतु संशयविरोधि
दर्शनत्वादिनैव । अन्यथा स्थाणुपुरुषसंशयानंतरमयं न स्थाणुरित्याप्तवाक्यात्तु सौरोवर्त्तिनि स्थाणुत्वाभावावगतौ पुरुषत्वव्या
प्यदर्शनं विना पुरुषप्रत्यक्षानुदयप्रसंगः । न चैवमेवेति वाच्यं । स्थाणुत्वाभावनिश्चयेन संशये निरस्ते इंद्रियसंनिकर्षादौ सत्य
पि न पुरुषप्रत्यक्षमिति सर्वानुभवबाधितत्वादिति । संशयविरोधित्वेन तु प्रयोजकत्वे विपरीतनिश्चयस्यापि तत्र प्रतिबंधकत्वात्तत्त्वेन तत्पुरु
षप्रत्यक्षोदयाविरोधादिति वयं पश्यामः । न चैवमयमिमशानपदं मर्यो । अन्यपरामर्शस्यात्तत्त्वेनाजनकत्वादिति वाच्यं सत्त्व विपक्षे

चिं० लेप्रकृतसाध्यहेत्वोः किंतत्वमितिजिज्ञासायामतिव्याप्तिवारकत्वात्। तत्रपरामर्शस्यतज्ज्ञेनैवजनकत्वात्। प्रकृतसाध्यहेत्वोः किंतत्वमितिजि
ज्ञासाजनिका व्याप्तिपक्षधर्मतोपस्थितिः प्रकरणासमइत्यादिग्रंथेतथैवग्रंथकृताप्यग्रेदर्शितत्वात्। यद्वा। अनुमानुमितावतिव्याप्तिवारणा
याग्रिमज्ञानपदंप्रमापरं। प्रमाणलक्षणायप्रमायाएवलक्ष्यत्वात्। प्रथमज्ञानपदस्यैतदर्थपरत्वेऽप्रमाप्रमोशप्रमानुपसंग्रहापत्तेः
५ गौधप्रागभावावच्छिन्नघटोगौधवान्पृथिवीत्वादित्यादौबाधानवतारकालेजायमानानुमितावतिव्याप्यापत्तेश्च। अग्रिमज्ञानपद
5 बहिर्भावेनानुमितिसामान्यलक्षणमपिस्मारितमितिसामान्यलक्षणानभिधानेविशेषलक्षणाभिधानमितिदूषणमलग्नकंवेदि
तव्यं। केवलव्यतिरेकिणिव्यतिरेकसहचारेणान्वयव्याप्तिरेवगृह्यतइतिमतेनैतल्लक्षणंप्रणायनान्नतल्लिंगकानुमितावव्याप्तिरिति
ध्येयं। अन्येतुव्याप्तिविशिष्टपदेनात्रसाध्यगोचरसाधनसमानाधिकरणात्यंताभावप्रतियोगित्वधीविरोधिविषयोव्याप्तिवैशि
ष्ट्यंविवक्षितं। अन्वयिनिलिंगेऽन्वयव्याप्तेःसाध्याद्वैशिष्ट्यंतथा। व्यतिरेकिणितुव्याप्तेरत्यंतप्रतियोग्यभावप्रतियोगित्वरूपंपरंपरा
वैशिष्ट्यंतथा। तदेवंतत्रानुमितिजनकलिंगपरामर्शविषयइतिनतत्रान्यानुमितावव्याप्तिरित्याहुः। ननुअनुमितावनुमिति
त्वंगृहीतंनवा। आद्येतदेवलक्षणमस्तुकृतंतद्ग्राहाधीनग्रहेणप्रकृतलक्षणेन। अंत्येऽनुगतधर्मग्रहंविनातत्रोक्तज्ञानजन्यत्व ५
ग्रहासंभवादितिचेत्। न। तत्रानुमितित्वंगृहीतमेव। किंतुलक्ष्यतावच्छेदकतयाउपयोगि। नह्येकमेवलक्षणंलक्ष्यतावच्छेदकंच।

इतरभेदसाधनेनतयोरभेदेन्वयव्याप्तियाहकेणैवलक्षणतावच्छेदकावच्छिन्नेसाध्यसिद्धिसंभवेनसिद्धसाधनात्॥व्यतिरेकिण्यन्वयव्याप्तिरेवगृह्य
त इतिमतेनैतल्लक्षणाभिधानात्। यथा हि तन्मतं नायुक्तं तथाग्रे वक्ष्यते। व्याणारणिन्यायेनावच्छेदकद्वयहं विनापि हेतुतवग्रहसंभवाच्च॥ ननु व्याप्तिज्ञा
नत्वेन न तज्ज्ञानजन्यत्वस्य पक्षधर्मताज्ञानत्वेन तज्ज्ञानजन्यत्वस्य वाऽनुमितिलक्षणत्वसंभवे प्रकृतलक्षणगौरवमिति चेत्। न। तदुभयरूपेणानु
भयज्ञानस्यानुमितिजनकत्वासिद्धेः। नहि व्याप्तिपक्षधर्मतोभयविषयकपरामर्शस्य व्याप्तिज्ञानत्वेन पक्षधर्मताज्ञानत्वेन वा जनकत्वं सम्भ
दितविषयत्वेन तस्य तथात्वात्। अन्यथान्यतरवैकल्यमेव स्यात्। न च परामर्शजनकव्याप्तिस्मृतिद्वारा द्वितीयलिंगपरामर्शस्य पक्षधर्मता
ज्ञानत्वेन तत्र हेतुत्वमिति वाच्यं॥ यत्र धूमादौ व्याप्तिवैशिष्ट्यग्रहानंतरमेव पक्षतायहस्तत्र तस्यानुमितावजनकत्वात्। व्याप्तिज्ञानत्वेन च
यथा व्याप्तिज्ञानस्यानुमितिहेतुत्वं तथाग्रे वक्ष्यते। तदुभयरूपेणाजनकत्वसंभवे प्रकृतलक्षणे तयोरप्रवेशेन व्यर्थविशेषणत्वाद्यनवकाशा
च्चेति सर्वमवदातं। केचित्तु विशिष्टपदं वैशिष्ट्यपरं। तथा च व्याप्तिवैशिष्ट्यविषयकज्ञानस्य पक्षधर्मताज्ञानस्य च यत्र व्यापारव्यापारिभा
वापन्नतया करणत्वं तदनुमितिरिति। एवं चोक्तरूपप्रत्यक्षादौ नातिव्याप्तिः। एवं चान्वयिनि व्यतिरेकिण्यपि तज्ज्ञानमक्षतमेवेति न कश्चि
द्दोष इति वदंति। तन्न। विशकलितव्यभिचाराभावसहचारस्मरणानंतरं यत्र लिंगे तदुभयवैशिष्ट्यं पक्षे च लिंगवैशिष्ट्यं भासते तज्ज्ञान
जन्यानुमितावव्याप्तेः। तत्र परामर्शपूर्वं व्याप्तिज्ञानाभावात्। न चैवं व्याप्तिज्ञानकरणत्वमपि न स्यात्तैवव्यभिचारादिति वाच्यं। यथाश्रुत

चिं० स्यायेदृष्यत्वेनेष्टापत्तेः ॥ तदिति ॥ व्याप्तिविशिष्टज्ञानजन्यप्रमाकरणमित्यर्थः ॥ यद्वा ॥ अनुमानेऽनुमानपदवाच्यं प्रमाणमित्यर्थः ॥ तेन
न पौनरुक्त्यं ॥ नवा प्रमाणाभासासाधारणपक्षधर्मता ॥ एवं ॥ अनुमानप्रामाण्यमसहमानश्चार्वाकः प्रत्यवतिष्ठते ॥ अथेति ॥ अनुमानं प्रमा
णत्वाभिमतं धूमादि न प्रमाणं व्यभिचारसंशयविषयत्वात्सप्रतिपक्षवदित्यर्थः ॥ न च व्यभिचारसंशयस्यायोग्यतासंशयपर्यवसन्न
नयाशङ्केन व्यभिचारग्रहः स्यादिति वाच्यं ॥ तेन शब्दप्रामाण्यस्याप्यनंगीकारात् ॥ अयोग्योपाधीति ॥ न चातीन्द्रियोपाधिसंशयस्तज्ज्ञानात् ॥
तज्ज्ञानेन प्रत्यक्षेण तस्यातीन्द्रियत्वात् ॥ अतिरिक्तप्रामाण्याभ्युपगमे चापसिद्धान्त इति वाच्यं ॥ तस्यानादिवासनातउपस्थितावदोषत्वादिति
भावः ॥ ननु भूयः सहचारदर्शनात्तन्निरासो भविष्यतीत्यत आह शतश इति ॥ न च कोटिस्मरणादिविरहाद्यत्र न व्यभिचारसंशयस्तत्रा
नुमानप्रामाण्यं सिद्धमिति वाच्यं ॥ धूमादिदर्शनेनानुमित्यभावेऽपि संभावनातः प्रवृत्त्युपपत्तौ अन्यत्रापि तत्प्रामाण्ये मानाभावादि
तिभावः ॥ संभावनामात्रादिति ॥ उत्कटैककोटिकसंशयमात्रादित्यर्थः ॥ एवं सति प्रमाणबुद्धिं समर्थयति ॥ संवादेनेति ॥ स्मृतिवदिति
भावः ॥ इतीति हेतोः ॥ तथा च यतोऽनुमानं न प्रमाणं अतो नान्यत् ॥ इदं शब्दादिकमपि प्रमाणं ॥ शब्दस्यानुमानाधीनप्रथमसंकेतग्रहमूल
कत्वात् ॥ उपमानस्यानुमानमूलकातिदेशवाक्यरूपशब्दमूलकत्वादित्यर्थः ॥ अतो नोपक्रमोपसंहारविरोधः ॥ सम्प्रति शब्दादिप्रा ६
माण्ये विवादाभावात् प्रत्यक्षपदमनुमानपरं सामान्यशब्दस्य विशेषपरत्वादित्यप्याहुः ॥ अनुमानेन प्रमाणमित्यनुमानविधया

यतेश्शब्दविषयावा। आद्ये आह। अप्रमाणेति। अप्रमाणसाधर्म्यमभिचारसंशयविषयत्वादि। तथा चानुमानेनैवानुमानाप्रामाण्यसा
धने व्याघातइत्यर्थः। अंत्ये आह एतद्वाक्यस्येति। तयोः संशयविपर्यययोः। तथा चैतद्वाक्यप्रयोगार्थं परकीयसंदेहादिना नानुमानमवश्य
मभ्युपेयमित्यर्थः। नन्वेतत्सर्वं संभावनयैवान्यथासिद्धमिति दूषणांतरमाह अनुमानमिति। अनुमानमप्रमाणमिति वाक्यस्य
प्रामाण्यपक्षे शब्दप्रामाण्यसिद्धेरप्रामाण्यपक्षेनुमानस्यैव प्रामाण्यसिद्धेर्नोत्पन्नं प्रमाणमित्यनेन विरोध इत्यर्थः। यद्वा। एत
द्वाक्यस्य प्रामाण्यं यदि निश्चितं तदा तन्निश्चायकत्वेनैवानुमानं स्वीकृतं अप्रामाण्ये चेत्तथाप्यनुमानप्रामाण्यमिति व्याघातइ
त्यर्थः। स्वमतावष्टंभेन दूषणांतरमाह॥ अपि चेति। नन्वयोगोपाधिशंकया व्यभिचारसंशयाद्व्याप्तिग्रहाभावादेव नानुमानमि
त्यत आह॥ व्याप्तीति। निरूपणप्रयोजकत्वेनाह। अनुमितिहेत्विति। संयोगादिसाधकद्रव्यत्वहेतावव्याप्तेर्लक्षणांतरमाह।
साध्यवदिति। एवंसाध्याभाववदवृत्तित्वाधिकमित्यपरितोषादाह। साध्यवदिति। ननु यत्किंचित्साध्यवत्प्रतियोगिकान्योन्याभाव
सामानाधिकरण्यं धूमादावपीत्यव्याप्तिरित्यत आह सकलेति। सकलपदमशेषपरं नत्वनेकाशेषपरं। अतो यत्रैकएव साध्या
भाववान्तत्र न साकल्यप्रसिद्धिरिति भावः। ननु संयोगादिसाधकसद्धेतावव्याप्तिरित्याशयेनाह॥ साध्यवदन्येति। साध्य
वत्तावच्छिन्नप्रतियोगिकान्योन्याभाववदवृत्तित्वमित्यर्थः। अन्योन्याभावस्याव्याप्यवृत्तित्वेपि न दोषः। अत्र वृत्तिमत्वे सतीति

वि० ७

विशेषणमतो नाकाशादावतिव्याप्तिः। केवलान्वयिनीति। केवलान्वयिधर्मसाधक इत्यर्थः। नापीति। अत्र साध्यासामानाधिकरण्यपेसा
ध्यसामानाधिकरण्यनिषेधः। साध्यवैयधिकरण्यं तु विशब्दमहिम्ना साध्याधिकरणाभिन्नाधिकरणत्वमिति भेदः। प्रथमपक्षे सा
ध्याधिकरणानधिकरणत्वानधिकरणत्वविवक्षायां व्यभिचारिसाधारण्यापत्तौ द्वितीयपक्षस्य साध्यानधिकरणानधिकरणत्व
एव पर्यवसानादुभयपक्षे तदेव तात्पर्यविषयं वर्णयितुं त्वाह दूषयति तदुभयमपीति। तत्र। केवलान्वयिनीत्यर्थः। यथा कथंचि
साध्याभावप्रसिद्धिमात्रेणैव प्रकृतलक्षणसंगतिरिति मन्वानः शंकते। अथेति। ननु प्रतियोगिमति कथं तदसंताभावस्य
तत्राह। व्यधिकरणेति। प्रतियोगिनावच्छेदकावच्छिन्नसामानाधिकरण्यमभावस्य विरुद्धं ननु प्रतियोगिसामानाधिकरण्य
मात्रमिति भावः। परामिमानं खंडयति। तहीति। साध्यतावच्छेदकावच्छिन्नसाध्याभावासामानाधिकरण्यमव्यभिचारो वाच्य
स्तथा चाप्रसिद्धिरिति भावः। तद्वैशिष्ट्येति॥ प्रतियोगिनिष्ठप्रतियोगितावच्छेदकधर्मवैशिष्ट्यज्ञानस्याभावधीहेतुत्वादिति भा
वः॥ अन्यथेति। प्रतियोगिधीमात्रस्याभावधीहेतुत्व इत्यर्थः। ननु व्यधिकरणधर्मवैशिष्ट्यज्ञानं भ्रमरूपं संभवत्येव न हि प्र ७
तियोगिनि प्रतियोगितावच्छेदकधर्मप्रकारकप्रतियोगिप्रमात्वेन तद्धेतुत्वं गौरवात्। किंतु तादृशप्रतियोगिज्ञानत्वेन
लाघवात्। अत एव न निर्विकल्पकादभावधीः। न चा[illegible]स्य व्यधिकरणधर्मावच्छिन्नस्य प्रतियोगिनः सर्वथाऽसत्त्वे नासत्ख्या
॥ ८ × यद्वा साध्यासामानाधिकरण्यं साध्यवन्मात्रावृत्तित्वं साध्यवैयधिकरण्यं तु साध्यानधिकरणवृत्तित्वमेवं चोभयलक्षणस्य सा ध्या

॥ अत एवानावृज्ञानमपि तदंशे आहार्यमेव अन्यथा व्यधिकरणधर्मस्य प्रतियोगिनि बाधनिश्चये तद्विशिष्टवैशिष्ट्यज्ञानानुपपत्तेः ॥ ४ ॥

त्यापत्तिः वाच्यत्वमात्रस्यैव प्रतियोगित्वात् तान्त्रत्व व्यधिकरणधर्मावच्छेदकः । तद्वैशिष्ट्यज्ञानं वै च तदा(ना)न्यथाख्यातिरूपमेवा । अथ वाच्य
त्वेन कश्चित्समवेतमिति विशेषदर्शने सत्येव वाच्यत्वं समवायितया घटे नास्तीति प्रतीतेस्तेनाभ्युपगमः । अन्यथा तादृशाभावप्रतिप
त्तौ तस्य केवलान्वयित्वव्याघातसंभवात् । तथा तावेतादृशभ्रमस्यापि तत्राभावात्कथं तदभावधीरिति चेत् । प्रतियोग्यपि व्यधिकरणसंसर्गज्ञानवद्व्य
धिकरणधर्मावच्छिन्नप्रतियोगिज्ञानस्याहार्यस्यैव तत्रोपयोगित्वात् । आहार्यज्ञानस्य विशेषदर्शनाप्रतिबध्यत्वात् । अथ प्रतियो
ग्यधिकरणसंसर्गज्ञानस्य निषेधधीप्रतिबन्धकविधया संजनकत्वमात्रेणैवोपयोगित्वादाहार्यस्यापि तस्याभावप्रतीतावुपयोगित्व
मुचितं प्रतियोगितावच्छेदकवैशिष्ट्यज्ञानस्य तत्त्वभावरूपस्य संबंधिकपदार्थज्ञाने संबंधितावच्छेदकावच्छिन्नसंबंधिज्ञानत्वेनोपयो
गित्वादनाहार्यस्यैव तस्यान्वयव्यतिरेकाभ्यां तत्र प्रयोजकत्वमभ्युपेयमिति चेन्न । अनाहार्यतादृशज्ञानत्वेन हेतुत्वे गौरवात्
तन्त्वेवमाहार्यघटत्वयदादिज्ञानेपि तत्संयोगप्रत्यक्षतापत्तिरिति चेन्न । संयोगप्रत्यक्षे संबंधितावच्छेदकप्रकारकानाहार्यप्रत्यक्षरूप
विशेषसामग्र्या अवश्यं कल्पनीयत्वात् । तदभावादेव तदभावोपपत्तेः । अन्यथानाहार्यघटपटादिज्ञाने सति तत्संयोगप्रत्य
क्षतापत्तिः । अथ गविशशीयत्वं शृङ्गाभावनिश्चयो नानुपलब्धिमात्रात् । अतीन्द्रियाच्छेदापत्तेः । किंतु योग्यानुपलब्धेः । योग्यता
च शशीयत्वावच्छिन्नशृङ्गस्यानुपलंभकसामग्रीरूपा वाच्या । सा च तादृशशृङ्गस्यापारमार्थिकतया दोषघटितैव वाच्या । तथा च
दोषणमस्त्विति वाच्यं । विशेषसामग्र्यां तद्विशेषणस्यावश्यकत्वात् । अन्यथानाहार्यघX स्मरणा ३
संयोगप्रत्यक्षापत्तिः १X२ या २

सि० ८

8

तस्यांसत्यांनताद्दशशृंगानुपलब्धिस्तदनुपलब्धौनसेतिकथंताद्दशाभावोगविप्रतीयेत।तस्मान्नविशाशृंगंनास्तीत्याकारायदिधीस्तदागो
शृंगाधिकरणकशशीयत्वप्रतियोगिकाभावविषयकतयाकथंचिदुपपादनीयेतिचेत्।नाप्रतियोग्युपलंभकसामग्र्यादोषभिन्ना
याअवश्यंवाच्यत्वात्।अन्यथाप्रतियोगिग्राहकदोषाभावेघटाभावग्रहोपिनस्यात्।तत्सत्वेतदनुपलब्धेरेवाभावात्।नचप्रकृ
तेदोषभिन्नातदुपलंभसामग्रीनास्त्येवेतिवाच्यं।चक्षुरादेरेवतथात्वात्।नहिदोषमात्रादेवशशी।यत्वावच्छिन्नशृंगोपलब्धिः।।
अपिच।नैषायोग्यानुपलब्धिरभावग्राहिका।संयोगाद्यभावस्याप्रत्यक्षतापत्तेः।।किंतुयत्रहियत्सत्वमनुपलब्धिविरोधीत्यादिका।
साचप्रकृतेप्यस्त्येव।गविशशीयत्वावच्छिन्नशृंगस्यानुपलब्धिविरोधित्वात्।यत्वधिकरणेप्रतियोगिसंसर्गारोपपूर्वकेवसं
सर्गोनिषेधप्रतीतिरुत्पद्यतेनचगविशृंगसंसर्गारोपःसंभवति।तत्रतस्यसत्वादेव।तथाचकथंतत्रशृंगाभावःप्रतीयतेति।।
तन्न।नहिप्रतियोगिसंसर्गारोपत्वेनहेतुत्वं किंतुभ्रमप्रमासाधारणेनताद्दशप्रतियोगिज्ञानत्वेन।लाघवात्।अन्य
थाघटवतितदभावभ्रमानुपपत्तेः।तद्वतितत्संसर्गज्ञानस्यानारोपरूपत्वात्।नचगविशृंगस्यप्रतियोगिनउपलब्धेरनुप
लब्धिरेवानास्तीतिवाच्यं।प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनुपलब्धेरभावग्राहकत्वात्।तस्याश्चात्रापिसत्वादिति। ८
ननुअत्रयदिशशीयत्वंप्रतियोगितावच्छेदकंतदाशशीयमिहनास्तीतिप्रतीत्यापत्तिः।अथशृंगत्वंतदपि।तदवच्छिन्नस्याग

१४॥ यदेवातिप्रसक्तता व्यधिकरणेन नाधिकरणतावच्छेदकं तदा प्रतियोगितावच्छेदकत्वेपि तुल्यं॥ तदिदं वक्ष्यति न चातिप्रसक्त्यवच्छेदकं॥ अन्यथा वस्तु
त्वादेरपि घटाभावप्रतियोगितावच्छेदकत्वापत्तिः॥ न चैवं वायौ वायावद्रूपविशिष्टाभावप्रसक्तता प्रभुत्वमपि विरुध्येत॥ नापि प्रतियोगितावच्छेदकाज्ञानादिति वाच्यं॥१

विसत्वेन दत्तवच्छिन्नाभावासंभवात्॥ शशशृङ्गं नास्तीति वा प्रामाणिकमिति तत्वापि संमतमिति तादृशप्रतीतिरसिद्धैवेति चेन्न शशीयत्वस्यैव प्र
तियोगितावच्छेदकत्वात् शृङ्गत्वभानस्य भ्रमरूपत्वाच्च प्रतियोगिनि शृङ्गत्वमपि भातमिति शशीयमिह नास्तीत्येवं न प्रतीतिः॥ न हि प्रतियोगिता
वच्छेदकमात्रमेव प्रतियोगिनि भासते। प्रमेयो घटो नास्तीत्यनाहार्यतादृशस्यापि भ्रमत्वस्य घटे भानात्। अत्र ब्रूमः। यदि गवि शशशृङ्गं ना
स्तीति प्रतीत्या व्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावोभ्युपेयस्तदा परत्वावच्छिन्ने घटे घटत्वं नास्तीति प्रतीत्या अधिकरणधर्मावच्छिन्ना
त्राधिकरणानात्मकोप्यतिरिक्तोभावोभ्युपेयः स्यात्। न चेष्टापत्तिः अप्रसिद्धत्वात्। न चाधिकरणभेदवत्तदवच्छेदकभेदोपि नाभावभेदप्रयो
जकः स्यादिति वाच्यं॥ दृष्टान्ताभावेनैवं तत्र तत्र प्रतीत्यनुपपत्तेरसत्त्वे तथात्वेपि प्रकृतप्रतीतेः क्लृप्तेनानुपपत्त्या तत्कल्पनात्। किंचायत एव
त्र नाभावभेदस्तत एव प्रतिबन्दिः॥ अत्र घटे घटत्वस्य सत्त्वान्न विशेषणे हीति न्यायेन तत्प्रतीतेर्घटे परत्वाभावमात्रपरत्वमिति
चेत्। हन्तैवं गविशृङ्गस्य सत्त्वान्न प्रतीतेः सविशेषणे हीति न्यायेन शृङ्गे शशीयत्वाभावमात्रविषयकत्वमिति तुल्यं॥ अत एव द
पाकरक्ते घटे इदानीमयं न श्याम इति धीः श्यामस्यैव विशेषणस्याभावमवगाहते। यदि च गविशृङ्गसत्त्वेपि प्रतियोगितावच्छेदका
वच्छिन्नस्याभावविरोधित्वात् शशीयत्वावच्छिन्नशृङ्गाभावोपि न विरुद्धस्तदा घटे घटत्वावच्छिन्ने घटत्वसत्त्वेपि अधिकरणतावच्छे
दकावच्छिन्ने प्रतियोगितावच्छेदकावच्छिन्नसत्त्वस्याभावविरोधित्वात् परत्वावच्छिन्ने घटे घटत्वाभावो न विरुद्धः॥ वस्तुतस्तु शृङ्गस्य
ताद्यतिप्रसक्तेः धर्मप्रकारकप्रतियोगिताज्ञानस्याभावधीहेतुमसत्त्वः॥ न चातिप्रसक्त्यसंभवोऽवच्छेदकत्वमिति॥ पृथिवीरूपत्वाद्यवच्छिन्नयाच छिन्नाभावा
प्रसक्तताभिप्रायकमिसन्धेयं॥१

मपिताहृशोऽवच्छेदकाभावात् प्रतियोगितावच्छेदकीभूतस्यतद्विरोधित्वात्। तस्य च व्यधिकरणस्य तत्राभावादिति चेन्न। प्रतियोगिता दार्ढ्यं तस्य विरोधित्वात्।
एवं तादात्म्यावच्छिन्नप्रतियोगिकान्योन्याभावइतिसिद्धांतः॥ अत एव संयोगान्योन्याभावो व्याप्यवृत्तिः॥ अन्यथा संयोगस्य तथा त्वे तत्र तस्य व्याप्यवृत्तिता
चि प्रतियोगितोभयविशिष्टात्मकत्वेऽतदभावः प्रतियोगितदभावयोरेकत्रविरोधात्। न च प्रतियोगितावच्छेदकावच्छिन्नस्यतद्विरोधित्वं तादृशश्चतत्र ॥प्रतीतिरिति।
नास्तीति वाच्यं॥ लाघवेन प्रतियोगित्वेनैव विरोधित्वात्। नतु तदवच्छेदकावच्छिन्नत्वेन॥ गौरवात्। अत एव घटवति घटपटौ न स्त इति प्र
तीत्याव्यासज्यवृत्तिप्रतियोगिकोविद्यमानप्रतियोगिकोभावो न सिध्यतीति वदन्तो नतु तादृशाभावाभावे कथमेषा प्रतीतिरित्यत आ
ह। गवीति। गवाधिकरणत्वेन शशीयतया शृंग प्रतियोगिकाभावप्रमा नास्ति उक्तन्यायेन प्रमाणाभावादिति भावः। ननु शुक्तौ वज
9 तत्वभ्रमानन्तरमिदं रजतमिह नास्तीति प्रतीत्या व्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावसिद्धिरिति वाच्यं॥ तत्रेदंत्वस्यैव तदवच्छे
दकत्वात्। नहि भ्रमेण तदवच्छेदकत्वं गृहीतमिति वस्त्वपि तथा। भ्रमोच्छेदापत्तेरिति। अनवच्छेदकस्यापि रजतत्वस्य प्रमेयत्वा
वज्ञानोपपत्तेरितिदिक्॥ अथेति। ननु साध्यासमानाधिकरणत्वं साध्यानधिकरणाधिकरणत्वं साध्याधिकरणानधिकरण
त्वं वा॥ नाद्यः। केवलान्वयिन्यप्रसिद्धेः। केवलान्वयिनीत्युपलक्षणं अथ विरोधाच्च॥ नान्त्यः। साधिकरणपदवैयर्थ्यतापत्तेः॥ साध्याधि
करणानधिकरणत्वानधिकरणत्वस्य साध्यसामानाधिकरण्यपर्यवसन्नतया व्यभिचारिण्यतिव्याप्तेश्चेति चेत्॥ अत्राह न दंति। अंत्यपक्षा
श्रयणेन पूर्वप्रतीकं साध्यसामानाधिकरण्यमात्रपर्यवसन्नं यतो व्यभिचारिसाधारणम् न त्वेवं तस्मिन्नस्तिसाधिकरणत्वमित्युक्तं॥ तर
था च सति सप्तमी महिम्ना साध्यसामानाधिकरण्यविशिष्टसाधिकरणत्ववैशिष्ट्यलाभात्साध्यसामानाधिकरण्याव्यवच्छिन्नमधिकर

णासंबंधत्वन्न्रणांसाधिकरणत्वं लभ्यते।। तदवच्छिन्नत्वं वं च व्यापकीभूततत्कत्वमेव।। तस्यैवाधिकरणसंबंधः साध्यसामानाधिकरणावच्छिन्नो भ
व नियमस्याधिकरणतायाः साध्याधिकरणता व्यापिका भवति। व्यभिचारिणस्तु अधिकरणतायाः साध्याधिकरणता न व्यापिका। व्यभिचारस्थ
ल एव तस्य साध्यसामानाधिकरण्यं विनाधिकरणसंबंधत्वात् इति भवति व्यभिचारिण्यवच्छेदः एवं चात्र यद्यपि साध्यानधिकरणाधि
करणत्वं न विवक्षितं तत्र्याप्यन्तरार्थसंभवमात्रेण तद्वैयर्थ्यदूषणाय विकल्पयिष्यतीति ध्येयं।। अन्ये तु सत्यं तत्र स्वाधिकरणाधिकरण
साध्यकत्वस्वाधिकरणानधिकरणसाध्यकत्वोभयाभावे सतीति पर्यवसितार्थो विवक्षितः।। व्यासज्यवृत्तिधर्मतियोगिकाभावाश्रयणात्।।
इदं च द्विरूपशून्यत्वं स्वाधिकरणानधिकरणसाध्यकत्वमात्रवति विरुद्धेपि साधने गतमतस्तद्वारणाय साधिकरण पदं।। तदर्थः साध्याधिकरण
धिकरणत्वं।। तेन न तद्दोषः। न च स्वाधिकरणानधिकरणसाध्यकत्वाभाववमेवास्तु।। लाघवात्।। अस्य च विरुद्धेप्यसंभवात्तद्वारणार्थं साधिकर
ण पदमप्यकिंचित्करमिति वाच्यं।। उभयाभावस्यातिरिक्तत्वेन तत्र वक्ष्य×वत×र्थ्य विशेषणत्वानवकाशात्। एवं वात्र साधिकरणपदमपि स
र्थकमित्याहुः। स्वेति। स्वं साधनत्वेनाभिमतं। न हीति। विरोधी समनंतरं व्याप्यवृत्तिर्वेति शेषः। अधिकरणेति। एकस्यैव इत्यकर्मादि वृत्तित्वा
यवच्छेदभेदेनाव्याप्यवृत्तित्वोपपत्तेस्तत्राभावकृत्स्नेमानाभाव इत्यर्थः। एकदेशिमतेन दूषयति। मूल इति। अत एवापरितोषाद्दोषांतरमाह स्वे
साधनवन्निष्ठेति। घटाद्यर्थेति। यस्य साधनस्य साध्यवदन्यत्र साध्यसाधननिष्ठव्याप्यव्यापकभावगर्भ एव संबंधघटार्थ इति भावः। ननु यस्य

१४ तादे

त्व व्याप्य वृत्ति २

चिं० दार्थसाध्यवत्तासहाधाराधेयभाव एव षष्ठ्यर्थः स्यादित्यत आह। साध्यसाधनयोरिति। व्याप्तिप्रतियोगित्वं साध्यत्वं। आश्रयत्वं साधनत्वमित्य
त्माश्रय इति भावः। ननु साधनपरस्कारेणास्तद पक्षे पात्रोक्तदोष इत्यतो दोषांतरमाह॥ वह्निमदिति॥ ननु साधनसमानाधिकरणात्यंता
१० भावप्रतियोगितानवच्छेदकसामानाधिकरण्यमित्यर्थः। न च विशेषाभावप्रतियोगितावच्छेदकः सामान्यधर्म इत्यत आह। विशेषेति।
तथा च वह्निसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकं धूमवत्त्वमपि नाविशेषात्यंताभावे विशेषस्यैवावच्छेदकत्वात्तस्मा
10 मान्यात्यंताभावस्याभावात् तथा च व्यभिचारिसाधारण्यमित्यर्थः। नापीति॥ साधनसमानाधिकरणा यावंतो धर्मास्तद्वान् वह्निः यत्ते
कंनिरूपितं यद्वैयधिकरण्यं तदनधिकरणं यत्साध्यं तत्सामानाधिकरण्यमित्यर्थः। अत्र व्यभिचारिवारणाय यावदिति। अत्र वैय
धिकरण्यं तदनधिकरणाधिकरणत्वं तदधिकरणानधिकरणत्वं वा॥ आद्ये दोषमाह। साधनेति। यत्तु वह्नेर्धूमसमानाधिकरणमहा
नसत्त्वाद्यनधिकरणीभूतपिंडाधिकरणतया स्वमेव वह्निव्याप्तिविरहप्रसंगात्तदनधिकरणाधिकरणत्वविवक्षायामत्रोक्तिसंभवाभावप
वेति तन्न। अयःपिंडस्य महानसत्वाद्यनधिकरणत्वेपि धूमसमानाधिकरणं इव्यत्वाद्यधिकरणतया धूमसमानाधिकरणयावद्धर्मा
नधिकरणत्वाभावात्। अंत्ये दोषमाह। महानसादाविति। तदधिकरणानधिकरणत्वं यदि तादृक्तन्निष्ठात्यंताभावप्रतियोगित्वं यदि वा १०
तद्वृत्तिनिष्ठात्यंताभावप्रतियोगितावच्छेदकत्वं उभयथापि वह्नेस्तदधिकरणत्वात् भूमादावप्युक्तलक्षणाभाव इत्यर्थः। ननु व्याप्तिविर

होन्नायकत्वमुपाधित्वमित्यात्माश्रय इत्यत आह। उपाधिश्चेति। ननु व्यापकत्वमपि व्याप्तिप्रतियोगित्वं येन तद्दोषतादवस्थ्यमित्यत आह। व्या
पकत्वमिति। ननु यत्र व्यभिचारित्वेनोपाधिस्तत्रातिव्याप्तिरित्यत आह। व्यभिचार इति। अतिव्याप्तिमुक्त्वाऽव्याप्तिमाह अन्योन्येति। घटघटा
न्योन्याभावयोः कपालेऽसहे वृत्तेरपीत्यर्थः। संयोगादावेवमप्रतियोगितापत्तेः। आकाशादेर्घटात्यन्ताभावप्रतियोगितापत्तिश्च दूषणे द्रष्ट
व्यं तथेति। अनुयोगित्वमित्यपि दृष्टान्तार्थः। प्रतियोगित्वस्यैव प्रकृतत्वात्। अन्योन्याभावप्रतियोगिसाधारणलक्षणं कृत्वा प्रकृते ताव
तापि संगतेः संसर्गाभावप्रतियोगिमात्रलक्षणमाह अभावेति। ननु भावस्य विरह इत्यत्र षष्ठ्यर्थः संबंधमात्रं वा प्रतियोगित्वं वा। नाद्यः॥
समानाधिकरणयोर्घटपटाभावयोः परस्परं प्रतियोगितापत्तेः। नांत्यः आत्माश्रयादिति चेत्। न। स्वरूपसंबंधविशेषस्य षष्ठ्यर्थत्वात्। न
चैवं सत्येव प्रतियोगित्वमस्तु लाघवादिति वाच्यं। तादृशान्योन्याभावप्रतियोगिन्यपि गतत्वात्। संसर्गाभावप्रतियोगित्वमात्रस्यै
वलक्ष्यत्वात् सर्वलक्षणविशेषप्रसंगाद्वेति भावः। व्यधिकरणत्वादिति। हेतुसन्निव्याप्तित्वेनाभिमतस्य निरुक्तनिषेधस्य हेत्वानव
तेः पक्षधर्मताव्यधिकरणत्वात्। पक्षधर्मतासमानाधिकरणव्याप्तेरेवानुमित्यंगत्वादिति भावः। यावद्व्यभिचारीति। यावतां साध्य
मव्यभिचारीत्यर्थः। साध्येति। येषां व्याप्यव्यभिचारित्वं न प्रविष्टं तथापि नो न साध्यव्यापकाव्यभिचारित्वापेक्षया सैव लघुत्वादुक्तमक
त्वं। एतल्लाघवपुरस्कारादेव घटपटकत्वलक्षणोऽपि वान्योन्याभावगर्भव्याप्तेरेव गमकत्वमिति निष्कृष्टं नेव ज्ञानीति भावः। इष्टापत्तिमाशंक्याह।

चिं० तत्त्वेति। लीलावतीकारमतमाशंकते। नापीति। कृत्स्नेन साधनेन साध्यस्य संबंधेन व्याप्तिरित्यर्थः। एकेति। एकव्यक्तिके लिंगे ऽनेकाशेषत्वरूपस्य
कात्स्न्यस्याभावादित्यर्थः। ननु शेषत्वमात्रेण स्वपदेन विवक्षितमिति नोक्तदोष इत्यत आह। नानेति। विषमेति। अयोगोलकीयवह्निनाम
११ मेधूमसंबंधाभावादित्यर्थः। इदं द्रव्यं सत्त्वादित्यत्रातिव्याप्तिरपि बोद्धव्या। नचेति। यावदित्याश्रयविशेषणमशेषमात्रपरं। तेनायमेतत्
संयोगी एतत्त्वादित्यत्र न यावद्धर्माभाव इति बोद्धव्यं। तत्राप्रसिद्धमिति। यद्यपि समानाधिकरणयावद्धर्माणां प्रत्येकं नि
रूपितसामानाधिकरण्यं स्यादेवाप्रसिद्धं तदा तद्यत्रोक्तलक्षणमपि सुलभं तथापि यावत्तादृशधर्माणां साकल्यनिरूपितसामा
नाधिकरण्यस्य विवक्षितत्वे दूषणमिति भावः। वस्तुतस्तु यत्किंचित्साधनसमानाधिकरणयावद्धर्मसमानाधिकरणसाध्यसामाना
धिकरण्यं व्याप्तिश्चारिसाध्यारत्नमिति दूषणमत्र बोध्यं। साधनेति। साधनसमानाधिकरणसकलमहानसत्वादेरेकाधिकरणाप्रती
तेरित्यर्थः। नापि स्वाभाविक इति। स्वभावजन्यत्वे घटत्वादेर्द्रव्यत्वाद्यव्याप्यतापत्तिः। स्वभावाश्रितत्वे शब्दादेराकाशव्याप्यतापत्तिः।
आदिपदग्राह्यं स्वभावाश्रयत्वे तत्रवाकाशस्य शब्दादिव्याप्यतापत्तिरित्यर्थः। अत्र आप्नोतीति व्याप्यापन्नेरिति। अव्याप्तिसहिताति
माव्याप्तिरिति मध्यमपदलोपिसमासात्साध्येयं। केवलेति। अविनाभावो हि साध्येन विना न भवतीति वा साध्येन विनाऽभाव इति ११
वा उभयथापि साध्याभावाप्रसिद्ध्या तदप्रसिद्धेरिति। संबंधमात्रमिति। सामानाधिकरण्यमात्रमित्यर्थः। किमिदं संबंधत्वं व्याप्तिस्वरूपं

वाव्याप्तिपदप्रवृत्तिनिमित्तं वा। आद्ये दोषमाह। लिंगेति। येन रूपेण व्याप्तिज्ञानमनुमितिहेतुस्तेन रूपेण तन्निरूपणमिह प्रस्तुतं तत्र न संबंधमात्रं। अन
१२ न्तदभिधानेऽर्थान्तरं स्यादित्यर्थः। अंत्ये त्वाह। नापीति। संबंधेति। एवमर्थान्तरतादवस्थ्यमेवेत्यपि दूषणं द्रष्टव्यं। केवलान्वयिसंबंधः। केवलान्वयिसा
ध्यसामानाधिकरण्यमित्यर्थः। तदपि नेत्यापाततः। वस्तुतो यदि केवलान्वयिसाध्यसामानाधिकरण्यमात्रज्ञानं केवलान्वयिन्यनुमितिप्रयो
जकं तदा व्यभिचारस्थलेऽप्यनुमित्यापत्तिः। नाद्यज्ञानस्य तदाप्युत्पत्तेः। यदि च साध्यवदन्यावृत्तित्वमपि प्रयोजकं तदा तदेवास्तु किं केवला
न्वयिनि विशेषसामग्र्यन्तरकल्पनया। न चेष्टापत्तिः। केवलान्वयिनि तस्याप्रसिद्धेरिति दूषणमत्र द्रष्टव्यं। तथात्वात्। सकलसाध्यवदन्य
त्वात्। नत्वेकसकलसाध्यवदित्यर्थः। सर्वत्रेति। यद्यपि स्वाभाविकः संबंध इत्यादौ साध्यादिपदं नास्त्येव तथापि साध्येन साधनस्य तादृशसंबंध
इति तत्रापि तदंतर्भावस्यावश्यक इति भावः। सिसाधयिषाविषयत्वं वेत्यत्र घनगर्जितस्थलेऽप्यव्याप्तिर्बोद्धव्या। महानस[illegible]दिति। बाधावस्था
रइदं बोध्यं। एवं साधनत्वमपि न सिद्धिकरणत्वं वा चांमहानसीयधूमे तदभावादित्यपि बोध्यं। स्वार्थेति। न हि कथायां परकीयव्याप्तिस्वरूपप्र
श्नोत्तरदानार्थमेवेदं तन्निरूपणं किंतु स्वार्थानुमानार्थमपि तेन विना परं प्रति स्वयमनुमानोपन्यासासंभवेन स्वस्यैव कथायामप्रवेशा
दित्यर्थः। प्रतियोगीति। प्रतियोग्यसमानाधिकरणस्य यदवच्छिन्नसमानाधिकरणात्यन्ताभावस्य प्रतियोगितावच्छेदकं यन्न भवति तद
वच्छिन्नेन केनापि समं तदवच्छिन्नस्य सामानाधिकरण्ये तदवच्छिन्नेन सह व्याप्तिरित्यर्थः। एवं च सर्वस्यैव धूमस्य सर्वेण वह्निना समं एका व्याप्ति

यथा वने सिंहनादः सत्त्ववनस्येव॥

सिं० रुक्ताभवतीतिनात्रावच्छेदकपदवैयर्थ्यशंकापीतिध्येयं। नचायंधूमवान्वह्नेरित्यत्रापिप्रसंगःप्रमेयत्वेनधूमस्यापितथात्वादितिवाच्यं। तेनरूपेणा
वह्निव्यापकत्वस्येष्टत्वात्। धूमत्वेनरूपेणतस्यातथात्वात्। अवच्छेदकत्वमनतिरिक्तदेशवृत्तित्वं नत्ववच्छिन्नप्रत्ययजनकत्वमतोनक[illegible]
१२ व्याप्तिरूपनियमागर्भत्वात्तन्मात्राश्रयः। एतच्चावच्छेदकत्वं व्याप्तिनिरूपणार्थमुक्तं। नखुसर्वत्र। तेनघटजनकतावच्छेदकेदंडत्वेनतुतत्समनि
यतरूपवद्दंडत्वादिकमितिसिद्धांतोनव्याहन्यतइतिध्येयं। अतएववह्निसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकेधूमत्वेलाघवात्
12 ननुप्रमेयधूमत्वादिके। गौरवात्। एवंचतादृशात्यंताभावप्रतियोगितानवच्छेदकप्रमेयधूमत्वाद्यवच्छिन्नधूमसामानाधिकरण्येवह्न्यावपी
त्यतिव्याप्तिरितिपरास्तं। उक्तावच्छेदकत्वस्यप्रमेयधूमत्वादावपिसत्त्वात्। अवच्छेदकत्वंविशेषणताविशेषइत्यप्याहुः। प्रतियोग्यसमा
नाधिकरणात्यंताभावविशेषणसंयोगादिसाध्यकद्रव्यत्वादिनिष्ठव्याप्यव्याप्तिवारणाय। नन्वियमव्याप्तिर्ननिश्चिता। द्रव्यत्व
स्यसंयोगसामान्यात्यंताभावसामानाधिकरण्यानिश्चयात्। गगनादावपिद्रव्येकिंचिदवच्छेदेनपरमाण्वादिसंयोगोनभूतोनवाभावी
नवर्तमानइत्यस्यप्रमाणाभावेननिश्चेतुमशक्यत्वात्। तत्रसंयोगसामान्यात्यंताभावस्यापिसंदिग्धत्वात्। नचसर्वत्रैवद्रव्येयावत्संयो
गविशेषाभावसत्त्वेनतत्सामान्याभावानुमानमितिवाच्यं। एकावच्छेदेनयावद्विशेषाभावस्यतथापिनिश्चेतुमशक्यत्वात्। एकावच्छेद १२
कावच्छिन्नस्यैवतत्सामान्याभावव्याप्यत्वात्। अन्यथायत्रवृक्षादौकोपिप्रदेशोनसंयोगरहितस्तत्रापिसामान्यात्यंताभावस्यस्पष्टे

भावाभाववयोरेकावच्छेदेनापि वृत्तिः स्यादिति महद्वैशसं। न च संदिग्धव्याप्तिवारणायैव तदिति वाच्यं। संदिग्धव्यर्थविशेषणानापत्तेरिति चेत्। न। आश्रयत्वे
तत्संयोगी एतत्संयोगी एतत्त्वादित्यत्राव्याप्तिनिश्चयेन तद्वारणार्थं तदुपादानात्। न च तत्र व्याप्तिसत्त्वे संयोगाभावावच्छिन्नप्रदेशे पि तदनु
मानापत्तिरिति वाच्यं। बाधे न तत्रानुमितिप्रतिबंधात्। यथा गंधप्रागभावावच्छिन्नो घटो गंधवानित्यत्रेति वदंति। ननु सामानाधिकरण्यं समा
नेनाधिकरणेन संबंधः। संबंधत्वं च विशिष्टधीनियामकत्वं। न त्वजनकत्वं। तत्र व्याप्तिगर्भे मित्यान्याश्रय इति चेत्। न। नियामकस्य
संबंधस्य व्याप्तिधीविषयत्वे पि नियामकत्वरूपेण तत्संबंधत्वाविषयत्वात्। संसर्गविधयैव तत्र तज्ज्ञानाभ्युपगमात्। प्रकारत्वे वा संयोगत्वादिनैव रू
पेण तथात्वात्। ननु संबंधत्वेन। तज्ज्ञानानां संबंधज्ञानत्वेन जनकत्वमिति नानुगमः। यद्वा। संबंधत्वं न विशिष्टधीजनकत्वं किंतु विशेषणा
विशेष्यान्यविशिष्टधीविषयत्वं। विशिष्टधीश्च विशेषणत्वधीः। तत्त्वं च स्वरूपसंबंधविशेषः। अन्यथा समूहालंबनभेदानुपपत्तेः। स स्वरूप
संबंधश्च स्वरूपेणैव भासते न तु संबंधत्वेनेति नोक्तदोषः॥ विशेषणानां विशेषस्तदित्यप्याहुः॥ अत्यंताभावपदं विरोधिपरं। ननु संसर्गाभा
वविशेषपरं। तेनायं घटो घटात्यंताभाववान् प्रमेयत्वादित्यत्र व्यभिचारिण्यभावप्रतियोगिकाभावानभ्युपगमे न प्रमेयत्वसमा
नाधिकरणात्यंताभावाप्रतियोगिघटात्यंताभावसमानाधिकरणत्वेनातिव्याप्तिरिति दूषणमलग्नकं बोध्यं। विरोधित्वं न नियमघ
टितं किंत्वेकावच्छेदेन सहानवच्छिन्नत्वं। एतेन संसर्गाभावघटितमन्यत्वाभावत्वं। संसर्गाभावत्वं च प्रतियोग्यारोपजन्यज्ञानविष

जावा।

विं० याभावत्वात्। जन्यत्वं च निष्प्रमघटित मित्यात्माश्रय इति निरस्तं। अत एव जातौ व्यक्तेः कालिकी व्याप्तिः स्यात्। प्रलयेतद्ध्वंससत्त्वेन तदत्यंताभावात्। नित्यति
याभावत्व। जन्यत्वं च निष्प्रमघटित मित्यात्माश्रय इति निरस्तं। अत एव जातौ व्यक्तेः कालिकी व्याप्तिः स्यात्। प्रलयेतद्ध्वंससत्त्वेन तदत्यंताभावात्। नित्यति
१३ नतदानदभ्युपगमे नित्ययोरपि कालिकी व्याप्तिर्न स्यात्। प्रलयेपि तदत्यंताभावस्यापि सत्त्वेन परस्परं परस्परसमानाधिकरणात्यंताभावप्रतियो
गित्वादित्यपि दूषणं परास्तं वेदितव्यं। कालिकव्याप्तौ ध्वंसस्यापि विरोधित्वे नाति प्रसंगाभावेन तदत्यंताभावसत्तासत्त्वयोस्तदानीमविचारणी
13 यत्वात्। वस्तुतस्तु प्रतियोगिसमवायि देश एव तयो र्विरोधात् प्रलये तद्ध्वंससत्त्वेपि तदत्यंताभावसत्त्वमप्रत्यूहं। अन्यथा तस्य नित्यत्वाम्
गापत्तेः। नचैवं नित्ययोरपि कालिकी व्याप्तिर्न स्यादित्युक्तमिति वाच्यं। तदा तदत्यंताभावसत्त्वेपि तस्य प्रतियोगिसमानाधिकरणत्वात्। का
लिकव्याप्तौ तस्य विरोधित्वाभावात्। अत्यंताभावपदेन विरोधित्वस्योक्तत्वात्। नच व्यक्तिध्वंसस्यापि प्रतियोगिसमवायिदेशवृत्तित्वे
नप्रतियोगिसमानाधिकरणत्वादुक्तातिप्रसंगस्तदवस्थ एवेति वाच्यं। याह्यसंबंधेन सामानाधिकरण्यस्योक्तत्वात्। अस्ति वत ध्वंसे
तथा। प्रतियोगिसमानकालीनत्वात्। समानकालीनत्वस्य च ग्राह्यत्वात्। तस्माद्दैशिकव्याप्तौ प्रतियोगिसमानदेशत्वं कालिक
व्याप्तौ प्रतियोगिसमानकालत्वं प्रतियोगिसामानाधिकरण्यपदार्थस्य नीति नोक्तदोषः। ननु धूमवति महानसादौ समवायसंबंधा
वच्छिन्नवह्न्यभावमादायाव्याप्तिरिति चेन्न। नायाह्यसामानाधिकरण्यपदविशिष्टसाध्यसंबंधावच्छिन्नाभावस्य विवक्षितत्वात्। भवति च धूमव
त्योरेकाधिकरणसंयोगस्य ग्राह्यत्वात् संयोगावच्छिन्नवह्न्यभावस्तथा। ननु समवायावच्छिन्नाभावोपि। तदभावसत्त्वस्य वह्निसमाना १३

धिकरणत्वेन प्रतियोगीत्यादिपदेनापि तन्निवारणासंभवाच्च। न च यादृशसामानाधिकरण्यप्रविष्टसंबंधेन तत्सामानाधिकरण्यमवश्यं वाच्यं।
अन्यथा प्रतियोगितदभावयोः कालेन सामानाधिकरण्यमादाय असंभवः स्यादिति वाच्यं। धूमवह्न्योः संयोगस्यैव तत्प्रविष्टतया तेनैव सं
बंधेन तदभावस्य वह्निसमानाधिकरणत्वात्। न हि वह्निर्महानसादौ संयोगेन नास्तीति। नन्वयं घटधूमरूपद्वयवान् वह्निमत्त्वादित्यत्रा
तिव्याप्तिः। द्वित्वस्य व्यासज्यवृत्तित्वेन वह्निसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वादिति चेन्न। घटाभावधूमाभावयोर्वह्निसमानाधिक
रणतया तादृशाभावप्रतियोगितात्वेनानुगतप्रतियोगितया सह द्वित्वस्यानतिरिक्तवृत्तित्वात्। अवच्छेदकपदस्य प्रकृते नतिरिक्त
वृत्तित्वार्थकत्वात्। एकसत्वे द्वित्वावच्छिन्नप्रतियोगिकाभावाभ्युपगमेपि घटधूमोभयाभाववति द्वित्वावच्छिन्नतदुभयाभावाभ्युपग
मात्।। तस्य सामानाधिकरण्यत्वयोगक्षेमत्वात्।। नन्वयं वह्निमान् ह्याकाशरूपद्वित्वाश्रयवानेतत्वादित्यत्र तथापत्ति व्याप्तिः। वह्नि
हेतुसमानाधिकरणान्योन्याभावाप्रतियोगित्वेन तद्द्वित्वस्य हेतुसमानाधिकरणाभावप्रतियोगितानतिरिक्तवृत्तितया तदनवच्छेद
कत्वात्।। वह्निसत्वे द्वित्वावच्छिन्नाभावासंभवाच्चेति चेन्न। द्वित्वस्य तथात्वेपि हेतौ तदवच्छिन्नसामानाधिकरण्याभावाद[illegible]तिव्याप्त्य
संभवात्। न हि द्वित्वावच्छिन्नं वह्निमात्रं किं त्वाकाशमपि द्वित्वस्योभयत्र पर्याप्तेः। ननु तथापि यत्र निर्घटं वह्निमत् पर्वतं पश्चात् कलसा
यं वह्निघटरूपद्वयवानेतद्धूमवत्त्वादिति साधयति तत्रातिव्याप्तिरिति चेन्न। तथापि द्वित्वावच्छिन्नघटसामानाधिकरण्याभावादेवाति

चिं० व्याप्यसंभवात्। अन्यथा तस्य सद्धेतुत्वादेः॥ नन्वेवमपि यत्र सैव धूमवह्निव्यक्तिस्तद्घटाधिकरणं नीयते तत्र तदानीं हि तावच्छिन्नसामानाधिकरण्यस्या-
१४ पि सत्त्वादुक्तदोषस्तदवस्थ इति चेन्न। स्वाधिकरणतावच्छेदेन तदवच्छिन्नसामानाधिकरण्यस्य विवक्षितत्वात्। तत्र च क्षणे तु निर्घटेपि पर्वते न
धूमसत्त्वेन तथात्वात्॥ न चैतावतैव व्यभिचारिव्यवच्छेदे किं पूर्वं प्रतीकेनेति वाच्यं॥ यत्किंचिदस्वाधिकरणतावच्छेदेन धूमसामानाधि-
करण्यस्य सत्त्वेन व्यभिचारिसाधारण्यात्। यदि चैकसत्त्वेपि द्रव्यमिह नास्तीति प्रतीत्या हि तावच्छिन्नाभावः स्वीक्रियते तत एव प्रतियोगिता-
वच्छेदकावच्छिन्नस्यैवाभावविरोधित्वादिति तदा सर्वं समंजसमेवेति संक्षेपः॥ ननु व्याप्तेर्यत्स्यामननुगतत्वे ननु तद्विषयकपरामर्शस्यापि
तथात्वादननुगतानुमितिं प्रति कथं हेतुता। तथा च कथं नानुमितित्वमाकस्मिकं॥ पक्षतादेरपि यत्त्वादिघटितत्वेनाननुगतत्वादिति
चेत्। अत्रैके चित्तु। व्याप्तेरननुगतत्वेपि तज्ज्ञानानां व्याप्तिपदवाच्यतावच्छेदकावच्छिन्नविषयताशालिज्ञानत्वेन हेतुत्वमिति नोक्तदोष
इत्याहुः। अन्ये तु सर्वेषु ज्ञानत्वेन तत्तज्ज्ञानत्वेन तज्ज्ञानानां हेतुत्वं॥ न चैवमतिप्रसंगः। परामर्शरूपविशेषसामग्रीविलंबेनानुमित-
नुमतेरित्याहुः। वस्तुतस्तु तत्तद्व्याप्तिज्ञानानां तत्तदनुमितिविशेष एव जनकत्वं॥ न चैवमनुमितित्वमाकस्मिकं॥ तद्धि कारणा-
प्रयोज्यत्वमप्रामाणिकत्वं वा। आद्ये इष्टापत्तिः। नित्यवृत्तिमनस्त्वादीनामिव तथात्वाविरोधात्। न च कार्यमात्रवृत्तिजातेः का- १४
रणप्रयोज्यत्वनियमः। अप्रयोजकत्वात्। द्वितीये त्वसिद्धिः। अनुगतमतेरेव प्रमाणत्वसंभवात्। तस्माद्यथा प्रत्यक्षत्वस्य नि-

वृत्तित्वेन कार्यतानवच्छेदकत्वेप्यनुगतमतेः प्रमेयत्वं जातिस्तथात्रापीति नन्वेवं सामान्ये यदि विशेषाभावप्रतियोगितानवच्छेदकं तदा तदभाव
प्रतियोगितावच्छेदकेनेत्यागते विशेषाभावकूटातिरिक्तस्य सामान्याभावस्याभावात्। एवं च वह्निसमानाधिकरणात्यन्ताभावप्रतियोगितान
वच्छेदकधूमत्वावच्छिन्नसमानाधिकरणत्वाद्वह्नेर्धूमव्याप्यतापत्तिरित्यत आह सामान्येति। तथा च वह्निसमानाधिकरणायोगोलकीय
सामान्याभावप्रतियोगितावच्छेदकमेव धूमत्वमिति नोक्तदोष इत्यर्थः। अन्यथेति। विशेषाभावकूटस्यैव सामान्याभावत्वे रूपविशेषा
भावकूटस्य वायौ निश्चितत्वेन संशयविषयत्वायोगाद्वायौ रूपं न वेति संशयो न स्यादित्यर्थः। केचित्तु वायौ रूपं न वेति संशयो रूपत्वा
वच्छिन्नप्रतियोगिकत्वेनाभावमवगाहते। रूपविशेषाभावसमूहस्तु न तथेति तादृशसंशयानुपपत्त्यातिरिक्तो रूपसामान्याभाव
स्सिद्धिरित्यर्थ इत्याहुः। तन्न। विशेषाभावकूटस्य निश्चितत्वादित्यनेन तथैव संशयस्य प्रकृतासंगतत्वापत्तेः। तत्र तदनिश्चयेपि तस्य रू
पत्वावच्छिन्नप्रतियोगिकत्वविरहाद्वक्तादृशसंशयविषयत्वशंकानवकाशात्। तादृशसंशये रूपत्वावच्छिन्नप्रतियोगित्वेना
भावानवगाहात्। अन्यथा न वायौ रूपमिति निश्चयस्यैव रूपत्वावच्छिन्नप्रतियोगिकाभावे प्रमाणत्वसंभवे संशयोपदर्शनानर्थ
क्यात्। नन्वेतावता एव रूपाणामिति तु द्वौ समाम सत्यो वा संशयाभावश्चापाद्यते। आद्ये इष्टापत्तिः। द्वितीये त्वतिरिक्तसंभावनया
तदादाय संशयोपपत्तेरिति चेन्न। अतिरिक्तसंभावनाविरहदशायामपि रूपविशेषाभावकूटे निश्चिते वायौ रूपं न वेति संशयस्या

चिं·अ·व नुभवसिद्धत्वात्। अथ निश्चितोऽपि विशेषाभावकूटो रूपाभाववत्वेनानिश्चितेन रूपेण संशयविषयोऽस्त्विति चेन्न। रूपाभाववत्वं हि रूपवत्त्वोप
हितप्रतियोगिकाभाववत्वं रूपत्वावच्छिन्नप्रतियोगिकाभाववत्वं वा। आद्ये निश्चितमेव। विशेषाभावकूटप्रतियोगिसमूहे रूपत्वस्य निश्च
१५ यात्। द्वितीये तु स्यादपि। यदि रूपत्वमभावप्रतियोगितावच्छेदकं भवेत्। तद्भिन्नविशेषाभावप्रतियोगितावच्छेदकं। अतिप्रसक्ता
त्। तत्र रूपत्वस्यैव तथात्वात्। न सामान्याभावप्रतियोगितावच्छेदकं। तस्य तथात्वानभ्युपगमात्। अभ्युपगमे वा पर्यवसिते विवादेन।
15 यत्तु यदि यावद्विशेषाभावा एव सामान्याभावव्यवहारप्रतीतिविषयास्तदा समुदिते घटद्वये रूपमिहन्यानास्तीति प्रतीत्यापत्तिः।
यावद्रूपविशेषाभावसमूहस्य तत्रापि सत्वात्। तत्र घटवृत्तिरूपविशेषयोरपि तत्रैव घटद्वयस्य स्वानधिकरणत्वमवच्छेद
नाभावसत्वादिति मतं। तन्न। यत्राधिकरणे यदवच्छेदेन विशेषाभावकूटो वर्तते तत्र तदवच्छेदेन सामान्याभावप्रतीतिं जनयतीति नत्व
त्रापि। घटद्वये च प्रत्येकं यावद्विशेषाभावाभावे समुदितेऽपि तथात्वमेव। प्रत्येकोभयातिरिक्तस्य समुदायस्यानभ्युपगमात्।।
अभ्युपगमे वा तत्र रूपसामान्याभावप्रतीतेरिष्टत्वात्। न च यथा द्वित्वसमानाधिकरणा यावद्विशेषाभावा इति प्रतीतिस्तथा
द्वित्वसमानाधिकरणं रूपं नास्तीति प्रतीतिः स्यादिति वाच्यं। अत्र हि द्वित्वे रूपसामान्याभावसामानाधिकरण्यविषयत्वमाप १५
द्यते रूपे द्वित्वसामानाधिकरण्याभावविषयत्वं वा। नाद्यः। इष्टापत्तेः। विशेषाभावकूटस्यैव सामान्याभावरूपत्वात्। नान्त्यः।।

बाधात्। अन्यथातिरिक्तसामान्याभावपक्षेपि वायुघटवृत्तित्वसमानाधिकरणो रूपसामान्याभाव इति प्रतीतिवह्नित्वसमानाधिकरणो रूप
मिह नास्तीति प्रतीतिः स्यात्। यत्तु प्रत्येकं यावच्छरीरस्य यावद्विशेषाभावस्य नानाधिकरणेपि सत्त्वेन तत्प्रतीतिनिर्वाहकरणमशक्यमेवेति
तन्न। प्रत्येकं तत्तस्य यावद्रूपविशेषाभावस्य प्रत्येकघटाद्यवृत्तित्वेन नानाधिकरणावृत्तित्वाभावात्। प्रत्येकं तद्व्येकदेशो हि नानाधिकरणवृत्ति
र्न तु प्रत्येकं व्योपि। यत्र समूहस्य सामान्याभावप्रतीतिविषयत्वे इह रूपाभाव इत्येकत्वोल्लेखिनी प्रतीतिर्न स्यादिति। तन्न। एवं सत्यघटत्वा
रूपाभाव इति प्रतीतिर्न स्यात्। न हि तत्र सामान्याभावस्तद्विषयः। कस्यचित्संयोगाभावेन कस्यचित्तादात्म्याभावेन तावत्प्रतियोगिकाभावा
सम्भवात्। अन्यथा तस्याप्यनेकत्वप्रसंगः। तस्माद्यथाकरमेव ग्राह्यं। न च तत्रापि रूपत्वोपहितयावदभावत्वेनानिश्चिते न विशेषाभावा
नामेव संशयविषयत्वमिति वाच्यं। वायौ रूपं न वेति संशये यावत्त्वस्य कोटित्वेनानुल्लेखात्। रूपप्रतियोगिकाभावत्वेनैव तत्कोटि
त्वानुभवाच्च। तस्माद्रूपप्रतियोगिकोभाव एव संशयकोटिः। विशेषाभावस्तु निश्चित एवेति संशयः सामान्याभावमवलंबते।
यत्तु प्रतीतिभेद एव सामान्याभावे मानं। इह रूपं नास्तीति रूपत्वावच्छिन्नाभावोनुभूयते नीलं रूपं नास्तीत्यादिना विशेषाभा
व इति। तन्न। रूपावद्विशेषाभावानामेव तद्विषयत्वात्। यथा घटो नास्तीति सामान्यतः प्रतीते घटे विशेषा एव विषय इति। यदपि चोक्तं।
रूपाभावप्रतीतौ बहूनां विषयत्वे कारणत्वे वा गौरवमित्येकस्यैव सामान्याभावस्य विषयत्वं कारणत्वं च लाघवात्। यथा समर्थं

सिं·मु·म· कल्पानुमानमेकमेवेश्वरं यथा वा संबंधानुमानमेकमेव समवायं विषयीकरोतीति। तदपि न। दृष्टान्ते हि सर्वस्यैव कल्पनात्तेन लाघवादेः
कल्पनात्। इत्यस्तु अननुयावद्विशेषाभावान्नाक्रमसंभवान्यतीतेस्तद्विषयत्वेनैवोपपन्नावच्छिन्नसामान्याभावकल्पनायामेव गौरवं। अन्यथा
१६ कपुत्राघटोऽस्तीति प्रतीतिः सावकुघटवत्यप्येकघटो विषयीक्रियेत। न चेष्टापत्तिः। विनिगमकाभावात्। किंच। एवं सति यावद्विशेषाभावः
प्रतीतिपर्यन्तावतरेदेव। सर्वत्र तत्सहचरितसामान्याभावस्यैव विषयत्वसंभवादिति दिक्। अन्ये तु प्रतियोगिभेदेनाभावभेदाभ्युप
16 मे घटप्रतियोगिकानां चतुर्णामप्यभेदः स्यादिति तत्कालतत्संसर्गतादात्म्यावच्छेदभेदेन तत्र भेदः सर्वसंमत इति सामान्यावच्छे
दकत्वेन तदवच्छिन्नाभाव आवश्यकः। बाधकाभावे सत्संबंधिकपदार्थमात्रस्यैव संबंधितावच्छेदकभेदेन भेदकल्पनादित्याहुः॥ सा
मान्यव्याप्तिरुक्ता विशेषव्याप्तिमाह। यद्वेति। एवं लाघवमिति हृदयं। ननु पृथिवीत्वादौ गंधादिव्याप्यत्वमेवं न स्यात्। सर्वस्यैव गंधा
देः पृथिवीत्वादिसमानाधिकरणात्यन्ताभावप्रतियोगित्वात्। न च गंधवत्त्वाद्युपाधेरेव तत्र साध्यत्वं न तु गंधादिव्यक्तेरिति वाच्यं
गंधानुमानापत्तावनुभवविरोधात् व्यक्तिसाध्यकानुमानोच्छेदप्रसंगाच्चेति चेत्। अत्र ब्रूमः। तादृशात्यन्ताभावप्रतियोगिता
वच्छेदकं यत्र भवति तदवच्छिन्नेन सामानाधिकरण्यमित्यर्थः। न चैवं पूर्वलक्षणाभेदः। तत्र हि तदवच्छिन्नेन केनापि सामानाधि १६
करण्यं इह तु तावच्छेदकावच्छिन्नस्य सर्वस्यैव व्याप्तिरित्यर्थः। अत्र तु सामानाधिकरण्यांशे वेति महान्भेदः। तथा चायोगोलकीयाव

पृ· ति·

ह्निरत्र मतेन व्यापकस्त्वपि वोध्यो अत्यंताभावगर्भलक्षणे प्रतियोगिवैयधिकरण्यप्रवेशो द्वौरवमित्यत आह यदीति। यत्समानाधिकरण
न्योन्याभाव प्रतियोगितावच्छेदकं यद्वच्छिन्नं न भवति तद्वच्छिन्नेन येन यस्य सामानाधिकरण्यं तयोर्व्याप्तिः॥ न चैवं साध्यसामानाधिक
रण्यमित्येवास्तु किं पूर्वदलेनेति वाच्यं। गोत्वादिव्यभिचारिणि द्रव्यत्वेति व्याप्तिवारकत्वात्तस्येति। स्वसमानाधिकरणान्योन्याभावा
प्रतियोगियद्धर्मावच्छिन्नं यद्धर्मत्वं यस्य तस्य तद्धर्मावच्छिन्नं व्याप्यत्वमित्यर्थः। नन्वेवं पर्वतीयवह्निग्रहं विना पर्वतीयधूमव्याप्तिग्रहे कथं
तस्मादनुमितिरिति चेन्न। सामान्यलक्षणया प्रत्यासत्त्या वह्निनिरूपितधूमनिष्ठव्याप्तित्वेन तद्व्याप्तेरपि ग्रहात्। सर्वं विशिष्य प्रत्यक्षत्वे
सर्वधूमस्यापि प्रत्यक्षत्वात् दुर्ज्ञेयत्व धूमत्वादिना सकलवह्निधूमोपस्थितौ सर्वासां विशेषव्याप्तीनां ग्रहसत्त्वात्॥ धूमस्यात्रस्येति। अत
५नि एवं वह्निनिरूपितधूमव्याप्तित्वेनानुगतव्याप्यत्वनानातिरिक्तवह्नितयाधूमत्वस्य व्याप्यतावच्छेदकत्वमिति भावः। नन्वत्यंताभाव
गर्भलक्षणे इदं संयोगिसत्त्वादित्यत्रातिव्याप्तिरित्यत आह कर्मणीति। नन्वेवमधिकरणभेदेनाभावभेदाभावाद्यद्यपि संयोगाभावः क
र्मणि प्रतियोग्यसमानाधिकरणः स एव द्रव्यत्वसमानाधिकरण इति द्रव्यत्वेपि संयोगव्याप्तिर्न स्यादिति चेन्न। प्रतियोग्यसमाना
धिकरणत्वरूपविशेषणविशिष्टावच्छेदेन यत्समानाधिकरणत्वरूपविशेषणविशिष्टस्यासंभावाद्विवक्षितत्वात्। नन्वेकस्य प्रतियोगि
सामानाधिकरण्यं तद्वैयधिकरण्यं च विरुद्धमित्यवच्छेदकभेदेनैव तद्वाच्यं तथा चावश्यकत्वादवच्छेदकभेदमेव लक्षणमस्तु किं लङ्घनाधीनता

चिं॰ग्र॰भ नेनप्रतियोग्यसमानाधिकरणत्वविशेषणेनेत्याशयवानाह यद्वेति। अत्रापि साधनसामानाधिकरण्यावच्छेदेन प्रतियोगिवैयधिकरण्यावच्छे
१७ दकावच्छिन्नत्वं विवक्षणीयं॥ तेन नोक्ताव्याप्ति[illegible]दवच्छेति वाच्यं। अन्योन्याभावोऽप्यव्याप्यवृत्तिरित्यभिमानेन प्रसंजितामव्याप्तिमुद्धरति
।न चेति। अभेदस्येति॥ ननु [illegible]त्वावच्छेदेन वृक्षत्वेनाभेदेऽपि संयोगवत्त्वेन तद्भेदोऽस्तु। मूले वृक्षः कपिसंयोगवान्नेत्यनेनाबाधितप्रतीतेः।
17 संयोगतदत्यन्ताभावयोरिवावच्छेदकभेदेनाविरोधात्। किंच॥ संयोगात्यन्ताभावेन संयोगवदन्योन्याभावान्यथासिद्धौ घटान्योन्या
भावोऽपि न सिध्येत्। घटत्वात्यन्ताभावेनैतन्मतेतरान्यथासिद्धेरिति चेत्। अत्राहुः। घटत्वज्ञानं विना घटत्वात्यन्ताभावज्ञानं न सं
भवति। न तु घटान्योन्याभावज्ञाने तद्गर्भ॥ घटान्यत्वे च घटत्वात्यन्ताभाववत्त्वमेवेत्यन्योन्याश्रयाद्वस्त्वतिरिक्तो घटान्योन्याभावः। इह तु संयो
गत्वस्यावच्छेद[illegible]स्य भानध्रौव्येण तत एवावश्यकात्तदुच्छेदान्यथासिद्धो न तद्रहितान्योन्याभावः। स्वीक्रियत इति। वस्तुतस्तु मूले
संयोगावच्छिन्नवृक्षत्वाच्छादकत्वावच्छिन्नसंयोगाभावावच्छिन्नवृक्षत्वोऽभिन्न इत्यबाधिताभेदधीसत्त्वेन वृक्षत्वतीति विरोधाद्दविनुना हेतौ।
ऽनन्यगत्या तस्याभिन्न[illegible]षयत्वं कल्प्यते। तदुक्तमभेदस्याबाधितप्रत्यभिज्ञानादिनिसंबंधत्वेनेति। संयोगत्वादिनेत्यर्थः। १७
एवं च यथा ना ननु पंगमस्क्षयोक्तं। यद्वा। न संबंधत्वं धत्वं व्याप्तिघटितमिति मतेनेदं वाच्यं। एवं स्वपदयत्पदादिना लक्षणकरणे
ऽन्वयेति। न चान्योन्याभावगर्भलक्षणे प्रतियोग्यसमानाधिकरणपदेनैवाभिमतसिद्धिरिति वाच्यं। तस्य प्रतियोगितावच्छेदकाव

छिन्नासामानाधिकरण्यपरत्वात् । तस्य च तत्रापि सत्त्वादिति भावः । तादृशेति । प्रतियोगिनि वृत्तौ सतीति तदभावासंभवादिति भावः । न च
प्रतियोगितावच्छेदकभेदेनाभावभेदाभ्युपगमे द्वित्वावच्छिन्नप्रतियोगिकाभाव आवश्यक इति वाच्यं । तावतापि तदुभयाभावव
त्त्वद्वित्वावच्छिन्नाभावः [illegible]नुगतत्वेकसत्त्वे । न च प्रतियोगितावच्छेदकावच्छिन्नस्याभावविरोधित्वादेकसत्त्वेपि तदुभयाभावो न विरु
द्ध इति वाच्यं ॥ लाघवात्प्रतियोगित्वेनैव विरोधित्वात् । प्रतीतेरपराभावविषयत्वेनैवोपपत्तेः । सविशेषणे हीति न्यायेन । स्वर्गी ध्वस्त
इतिवत् । केचित्तु [illegible]मासंभवेतेरपि प्रतियोगितावच्छेदकत्वं स्वीक्रियत एव प्रतियोगितापरं न व्यासज्यवृत्तिरित्याहुः । तादृशाभाव
प्रतियोगितावच्छेदकं यन्न भवति तदवच्छिन्नसामानाधिकरण्यमित्यर्थः । व्याप्तिग्रंथोक्ततादृशाभावाभ्युपगमेपीति प्रौढिवादेनाह ।
अभ्युपगमेवेति । यावत्साधनाव्यापकाव्याप्यसाध्यसामानाधिकरण्यपर्यवसितमनोपाधिकत्वमाह । तद्वेति । स्वसाधनाव्यभि
चारिण्यपि व्याप्तिवारणाय यावदिति । अवच्छेदकावच्छिन्नेति संपातायातं । एतदेवेति । स्वं साधनं व्यभिचारि येन सः स्वव्यभिचारि
णः स्वाव्यापका इति याव[illegible]तद्व्यभिचारि तद्व्याप्यं यत्साध्यं तत्सामानाधिकरण्यमित्यर्थः । ध्वंसो विनाशिजन्यत्वादित्यत्र विनाश
सामग्र्यादिकं विनाशित्वप्रकारकप्रमाविशेष्यत्वादिकं वा साध्यव्यापकं साधनाव्यापकमस्तीति न तत्रातिव्याप्तिप्रसंगः । याव
त्साधनाव्यापकत्वपर्यवसितमनौपाधिकत्वमाह यावदिति । अत्र यत्पदं साध्यपरं । सोपाधावतिव्याप्तिवारणाय यावदित्यंतं । तान्भावा

चि॰अ॰म॰ प्रतियोगिविशेषणं। तदपि व्यतिरेकिधर्मपरं। तेन तादृशप्रमेयत्वाद्यत्यन्ताभावाप्रसिद्ध्या न कोऽपि दोषः। न चैवं केवलान्वयिसाध्यके हेतौ साध्य
व्यापकस्य व्यतिरेकित्वाधर्मस्याप्रसिद्धिरिति वाच्यं। आकाशात्यन्ताभावस्य तत्रापि सत्त्वात्। न चैवं तत्प्रतियोगिकात्यन्ताभाव आकाशा
१८ दिरेव स्यात्। तत्सामानाधिकरण्यं च तदधिकरणानधिकरणत्वमेव वाच्यं तथा च पुनरप्रसिद्धिः। आकाशाद्यधिकरणाप्रसिद्धेः। न च तदनधिकरणा
18 धिकरणत्वमेव तदर्थः। वह्नेरपि धूमव्यापकाईन्धनाद्यत्यन्ताभावानधिकरणमहानसाद्यधिकरणत्वेन सोपाधिसाधारण्यापत्तेरिति चेन्न। ता
दृशात्यन्ताभावे सामानाधिकरण्यपसामानाधिकरण्याभावो यस्येत्यर्थात्। तदेवं तत्पस्य पत्रेरिति चेन्न। तादृशात्यन्ताभावनिष्ठसामानाधिक
रण्यात्यन्ताभावकत्वमनौपाधिकत्वमित्यर्थो वाच्यः। तेनात्यन्ताभावनिष्ठसामानाधिकरण्याभावस्य हेतुनिष्ठानौपाधिकत्वं विरुद्ध
मिति दूषणाम नवकं वोद्यं। यत्तु तदनधिकरणाधिकरणत्वमेव विवक्षितं तदर्थश्च तदधिकरणताव्याप्तिकाय दधिकरणता
मात्रवृत्तित्वं तु अधिकरणतायाश्च आर्द्रेन्धनत्वात्यन्ताभावानधिकरणतानव्यापिकाश्रयोगोलके व्यभिचारादिति तन्न। अपदार्थ
त्वात्। विवक्षायां तु या ... व्यापकाधिकरणतानव्यापिका यदधिकरणता याऽस्यैव विवक्षायां लाघवात् किं तदत्यन्ताभावगर्भेण।
गौरवात्। अपदार्थव्याख्यानस्याभयत्र तुल्यत्वात्। वस्तुतस्तु तत्प्रतियोगिकात्यन्ताभावसामानाधिकरण्यमित्यत्र तत्त्वमात्रं १८
न स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वात्साध्यव्यापकत्वमित्यर्थो विवक्षितः। तेन नाप्रसिद्धिर्न वा सोपाधिसाधारण्यं नापि

सि॰ग्र॰४ व्यतिरेकित्वधर्मविवक्षागौरवमिति। अन्येतु यावदिति चरमात्यन्ताभावविशेषणं। तथा च साध्यव्यापकप्रतियोगिकयावदत्यन्ताभावासत्त्वसामानाधि
करण्यमित्यर्थो विवक्षितः। नन्वेवं साध्यव्यापकोपस्थापकपदस्यासर्वपरतायां किंचित्परत्वेन नानाविशेषणावच्छिन्नैकप्रतियोगिकयावदत्यन्ताभावासा
मानाधिकरण्यवतः सोपाऽधि... संग्रहापत्तिः। यथा यावंतिपाकसंपादकानि तानि तेजांसि तानि नीलत्वपाकपदस्यैव यत्किंचित्परत्वा। अन्यथाऽसंभवात्॥
यथा वा यावद्घटोपलंभकसत्त्वे घटाभावोपलब्धिरित्यत्र घटपदस्य यत्किंचिद्घटपरत्वा। तथैव व्युत्पत्तेः। अन्यथाऽसंभवादिति चेन्न। तत्र तथैव
तात्पर्यणैकमात्रपाकाद्युपस्थितेः। अत्र तु साध्यव्यापकताश्रयप्रतियोगिकत्वपावतितावदत्यन्ताभावे तात्पर्यमिति तावदुपस्थितिः। अन्यथा प्रति
बंधकाभावकूटस्य कारणत्वमित्यत्र का गतिः। तत्रापि यावत्त्वस्यैव कूटपदार्थत्वेन लघुकरीत्या एकप्रतिबंधकयावदत्यन्ताभावस्य हेतुत्वे
न्यतमप्रतिबंधकसत्त्वेपि कार्यापत्तेः। उत्तरग्रंथस्तु साध्यव्यापकत्वगर्भलक्षणाद्यैवं परतया नेयः। अत एव साध्यव्यापकत्व इति बहुषु ग्रं
थेषु पाठः संगच्छत इत्याहुः। यत्संबंधितेति। यत्साध्यसंबंधितावच्छेदकरूपवत्त्वं यस्य साधनस्य तस्य साधनस्य साध्यसंबंधिता तत्साध्यव्या
प्तिरित्यर्थः। धूमसंबंधितावच्छेदकीभूततत्तत्क्रमवच्छेदकरूपवत्त्वमिति। संबंधिता च सामानाधिकरण्यं। तेन घटकारणतालक्षणा तत्सं
बंधितावच्छेदकदंडत्वावच्छिन्ने दंडे घटव्याप्यत्वं नापद्यत इति ध्येयं। नन्ववच्छेदकत्वं नावच्छिन्नप्रतियत्न न कल्प्यं। जनकस्य सा नियमगर्भ
त्वेनान्योन्याश्रयात्। नाप्यन्यूनानतिरिक्तदेशवृत्तित्वं। धूमस्यापि वह्निसामानाधिकरण्यस्य न्यूनदेशवृत्तित्वात्। आलोकादौ वह्नि

विष्ठ्र.भ. समानाधिकरणोऽवच्छेदकतानापि तदनतिरिक्तदेशावृत्तित्वं इदं सुखि। आत्मत्वादिमत्त्वव्यभिचारि गगनत्वात्। आत्मत्वस्य सुखसमानाधिकरणत्वेन।
१८ तमत्वत्वस्य सुखसामानाधिकरण्यानतिरिक्तदेशवृत्तित्वात्। न च साध्याभावसमानाधिकरणवृत्तित्वं तत्त्वं। आत्मत्वं त्वीश्वरात्मनि
सुखाभावसमानाधिकरणमेवेति वाच्यं। केवलान्वयिसम्भावात्। नापि साध्यसामानाधिकरण्याभावाधिकरणावृत्तित्वं। आत्मत्वं त्वीश्व
19 रात्मवृत्तित्वावच्छेदेन सुखसामानाधिकरण्याभावाधिकरणमेवेति वाच्यं। एवं हि अयमेतत्कपिसंयोगी एतत्त्वादित्यत्राव्याप्तिः स्यात्।
एतद्वृक्षत्वस्यापि मूलावच्छेदेन एतत्कपिसंयोगसामानाधिकरण्याभावाधिकरणत्वात्। एतद्वृक्षत्वे एतद्वृक्षत्वसामानाधिकरण्यसत्त्वात्क
थं तदभाववदिति यदि न तदात्मत्वेपि तुल्यं॥ अवच्छेदकभेदेन विरुद्धयोरेकत्र वृत्तिर्न विरुद्धेत्यपि तुल्यमिति चेत्॥ ॥अत्र ब्रूमः॥
अधिकरणैकदेशानवच्छेदेन साध्यसामानाधिकरण्याभाववान्यस्तद्वृत्तित्वमवच्छेदकत्वं विवक्षितं। एतद्वृक्षत्वेऽधिकरणैकदेशमूला
यवच्छेदेनैव साध्यसामानाधिकरण्याभाववत्त्वमिति विशिष्टव्यतिरेकस्य तत्रापि सत्त्वान्नाव्याप्तिः। आत्मत्वे तु ईश्वराधिकरणवृत्तित्वावच्छे
देनैव साध्यसामानाधिकरण्याभाववत्त्वं। ननु तदेकदेशावच्छेदेनेति न तत्रातिव्याप्तिः केवलान्वयिनि तादृशसाध्यसामानाधिकरण्या १८
भाववत्त्वं गगनादौ प्रसिद्धमित्यवधेयं। ननु यममभिधेयवान्प्रमेयत्वादित्यादिव्याप्तावव्याप्तिः। प्रमेयत्वस्य तादृशसामानाधिकरण्या
भाववति गगनादौ वृत्तेः। न च तत्र व्याप्तिरेवनेति वाच्यं। तत्रानुमानप्रवृत्तेर्निष्फलत्वे कथं प्रमेयत्वावच्छेदेनैव ग्रहणमाणयावृत्ति

मतिप्रमेये भिषेयव्यामेरवशणवाच्यत्वादिति चेन्न। हन्त्रिमत्प्रमेयत्वमादायतत्रोक्तलक्षणासत्वात्। इत्तिमत्वभागस्य च व्यभिचारवारक
त्वात्प्रमेयत्वमात्रेणैवतत्र निरूपणात्। न च प्रमेयत्वमात्र मतिप्रसक्तत यातन्निरूपकं नेतिवाच्यं। अर्थविशेषणत्वरहितत्वे सतिव्य
भिचारिव्यावर्त्तकत्वमेव हि धर्मस्य व्याप्तिनिरूपकत्वे तंत्रं। नत्वनतिप्रसक्तत्वमपि। गौरवात्। न चात्र हन्त्रिमत्प्रमेयत्वस्यैव तथा
त्वेनत्वव्यक्तित्वस्यैव व्याप्यत्वे स्यात्तत्रागमनादेरिति वाच्यं। इष्टापत्तेः। एतेन नीलधूमत्वस्यापि तथात्वात्तेनापि रूपेण तत्र व्याप्तिग्रहापत्तौ नी
लधूमस्यापि लिंगत्वेनोपन्यासे नीलत्वस्य वैयर्थ्यं न स्यादिति निरस्तं। तत्तद्रूपपुरस्कारेण धूमे व्याप्तिसत्वे गौरवात्तेन रूपेण तद्ग्रहापत्त्य
भावात्। तथाभूतधर्मोत्तरावच्छिन्नशरीरत्वे सतीत्यपि विशेषणमत्रैव व्याहुः। यत्तु यदाश्रय यदाश्रयसमानाधिकरणात्यंताभा
वप्रतियोगिनी साध्यासंबंधिता न भवति तदवच्छेदकं। ईश्वरात्मन्यात्मत्वसमानाधिकरणात्यंताभावप्रतियोगिन्येव सुखसंबंधि
तेतिनातिप्रसंग इति। तन्न। अत्र संबंधितासामान्ये सामानाधिकरण्यं वा। नाद्यः। दंडत्वादेर्व्याप्यतापत्तेः। नांत्यः। धूमेपि व
ह्निव्याप्यतानापत्तेः। वह्निसामानाधिकरण्यस्य धूमत्वाश्रयसमानाधिकरणात्यंताभावप्रतियोगित्वात्। न हि धूमत्वा
श्रयाधिकरणे महानसादौ वह्निसामानाधिकरण्यं किंतु धूम एवेति। यदपि साध्यासहचरासहचरितधर्मत्वं तत्त्वं। आत्मत्वं
तु साध्यासहचरीश्वरत्वसहचरितमिति नोक्तदोष इति। तदपि न। यद्यपि केवलान्वयिनि साध्यासहचरितराकाशादिः प्रसिद्धस

याधितद्रसहवृत्तित्वं तदधिकरणानधिकरणत्वं तद्धाप्रसिद्धमेवानचाग्निमासहवृत्तिपरस्पंदनधिकरणाधिकरणत्वमर्थः। धूमासहत्वस्पयोगो
त्नकत्वाद्यनधिकरणमहानसाद्यधिकरणवह्निवृत्तितयावह्नित्वस्य वह्नावपिधूमव्याप्यतापत्तेः। नचतदनधिकरणाधिकरणमात्रवृत्तित्वं
नता। वह्नित्वंच धूमासहवृत्त्ययोगोलकत्वाद्यधिकरणाधिकरणकेवह्नौवर्ततएवेतिवाच्यं। मात्रपदव्यवच्छेद्यस्यतदधिकरणा
धिकरणत्वस्यकेवलान्वयिन्यप्रसिद्धेः। तत्राकाशादेरेवसाध्यासहवृत्तित्वात्। यन्मतेएतद्व्याप्तिज्ञानमनुमितिजनकंतन्मतेऽव्यभिचा
रज्ञानेसत्यप्यनद्ज्ञानस्य निःप्रत्यूहत्वात्कथंनानुमितिरितिचिंत्यं। ग्राह्याभावज्ञानस्यैवविरोधित्वात्। अन्ये। तु अवच्छेदक
त्वंस्वरूपसंबंधविशेषः। संयोगादिषुशाखादौसएवावच्छेदकत्वं। संयोगस्यवृक्षेसमवायःसंबंधः। अवच्छेदकोविशेषणतावि
शेषएवेतिगुणकिरणावल्यामभिधानात्। एतद्व्याप्तिग्राहकेचान्वयव्यतिरेकाभ्यामव्यभिचरितसामानाधिकरण्यादिज्ञानं
तेनव्यभिचारज्ञानेसतितद्ज्ञानाभावेनतद्ग्राहकाभावान्नैतद्व्याप्तिग्रहइत्याहुः। अथवेति। संबंधिनाव्याप्तिरितिपूर्वलक्षणा
र्थः। तदवच्छेदकरूपवत्वंव्याप्तिरित्येतल्लक्षणार्थइतिनयोनरूपव्याप्तिमवधेयं। अवच्छेदकत्वंचपूर्वोक्तमेवग्राह्यं। नचात्रमतेधूम २०
त्वस्यैवव्याप्तित्वपर्यवसानेधूमत्वंकथमवच्छेदकंअभेदादितिवाच्यं। उपहितानुपहितभेदेनतयोरुपपत्तेः। उपाधिनेति। जनकत्वा
दिसंबंधेनार्द्रेंधनादेर्वह्न्यादौधूमादिसामानाधिकरण्यावच्छेदकत्वादित्यर्थः। यद्यप्यार्द्रेंधनप्रभववह्नित्वंविशिष्टंतया। तथापि

याधितरस रकत्वे विशेषणस्याप्यवच्छेदकत्वमिति भावः। अत्रैवोपष्टंभकत्वेन ग्राभाकरमतमाह। अत एवेति। उपष्टंभकांतरमाह अन
त्कत्वाद्य णावाईंधनादौ विदं लक्षणं भुवमित्यर्थः। अन्यथा न स्यात्तु पाधित्वे तत्त्वंथाह कमित्युपाधिलक्षणमति व्यापकं स्या
ततावि भवदेवं यदि तत्रावच्छेदकमाव्यापकं स्यादित्यत आह। व्यभिचारिणीति। अत एवेति॥ विरोधभंग नो यस्य साध्यसंबंधिता
धिक विव्यापकत्वादेवेत्यर्थः। अन्यथेति। व्यभिचारोपधायकत्वेनोपाध्यकल्पने ऽनुमानदूषकत्वेनैव तत्कल्पने स्फुरद्व्यभि
रता नुमानं न शक्यते। अप्रयोजकत्वात्। तथा चोपपादकं विना उपाधानुपपत्तिरूपतर्कसाचिव्याद्व्यभिचारेण तदनुमानं
त एवेति। यत एव साध्यसंबंधितावच्छेदकरूपवत्त्वमुपाधेरत एव तद्रूपलक्षणाव्याप्तिरूपाधिनिष्ठेति शेषः। साधनत्वाभिम
त्वं स्वस्त्रां तस्यासावुपाधिरुच्यत इति। एतच्च अनंतरोक्तलक्षणानुसारेणेति बोध्यं। नन्वेवं हेतौ स्वहत्तिसाध्यासंजकत्वमु
शेषएव पर्यवसितं तथा च विषमव्याप्तस्याईंधनादेरूपाधित्वं न स्यात्। न चेष्टापत्तिः। दूषणत्वमते न शास्त्रे तस्याप्युपाधित्व
तेन व्या... त्राह। लक्षणेत्विति। शास्त्रे उपाधिव्यवहारनिमित्तं। तथा च शास्त्रपरिभाषितेन तन्निमित्तवत्त्वाद्विषमव्याप्तेरपु
र्थः। तदेव द्रढयति अन्यथेति। जपाकुसुमादिसंनिधारणस्फटिके शक्तिधर्मोपसंक्रामकत्वात् रूपशक्तिनिमित्तत्वाद्योगात्तरं विषमव्याप्तो
त्वस्यैव व्याप्ति
रिसंबंधेनाईं पाह। विषमव्याप्तस्त्विति। प्रहृत्तीति। उक्तशक्तिनिमित्तत्वेत्यर्थः। नन्वेवं तेनैव रूपेणादूषकतापि स्यादिति विषमव्या

प्र २

21

चि॰चु॰भ॰ यापितरसहचारदर्शनमाह ॥ दूषकतावेति ॥ एतत्त्वं विषमव्याप्तसाधारणमेवेति भावः ॥ नन्वेवं व्यभिचारोन्नायकत्वमेवोपाधिलक्षणं ॥
लकत्वाद्यन्वितरेणोत्पत आह ॥ न चेति ॥ अप्रयोजकेति ॥ अप्रयोजकत्वसाध्यव्यापकव्यभिचारित्वयोरित्यर्थः ॥ न चेष्टापत्तिः ॥ शास्त्र
२० नतावद्विरुद्धभावादिति भावः ॥ ॥ नन्वस्तु निरुक्ताव्याप्तिस्तथापि तज्ज्ञानासंभवान्नानुमानं प्रमाणमित्यभिप्रेत्य मीमांस
20 धिकरणावां को भूयोदर्शनस्य व्याप्तिग्राहकतामपाकरोति ॥ सयमिति ॥ सकृद्दर्शनगम्यत्वे भुखनिरस्यमिति भावः ॥ अन
रतानेत्रा नवच्छायाभावत्वानस्यापि तेनजननापत्तेः ॥ तत्संस्कारा विषयत्वस्यानुत्पत्तेरित्यर्थः ॥ नन्वव्यभिचारविशिष्टः सहचा
रस्य स्फुटः ॥ न याच प्रत्यभिज्ञायामिव विशेषणाद्योसमानविषयत्वमेवेति विकल्पदूषणांतरमाह ॥ किंचेति ॥ आद्ये दोष
शेषएवेति ॥ द्वितीये त्वाह ॥ स्वरूपत्वेति ॥ यद्यपि प्रथमदूषणं नैव द्वितीयदूषणं संभवति तथाप्येकत्र घटे पाके न रूपवान्नु
तेन व्यभिचारपूर्णान्तरस्तु कं ॥ तृतीये आह ॥ एकत्रैवेति ॥ ननु भूयस्त्वं बहुत्वेन ज्ञानगतमस्येवेत्यत आह ॥ अपि चेति ॥ तर्कसहकृतामिति ॥ 21
थेः ॥ तदर्थं ति शेषः ॥ तद्येति ॥ व्याप्तिग्राहकमित्यर्थः ॥ ननु भूयोदर्शनं न सा ज्ञानाद्याप्तिग्राहकं किंतु तर्कोद्धापनद्वारेत्यत आहत्व २१
स्यैव व्याप्तिः ॥ तर्कमूलव्याप्तिज्ञानवत्तदित्यर्थः ॥ न चैवमिति ॥ सहचारादिसहकृततर्क एव व्याप्तिग्राहकोऽस्त्वित्यर्थः ॥ व्या
दिसंवेदनादेर्यावप्रशिथिलमूलत्वेन तस्य व्याप्तिग्राहकत्वाभावात् ॥ तथा च तर्कमूलव्याप्तिरपि तर्कान्तरेणग्राह्येत्यनवस्थेत्यर्थः ॥

विशिष्टस्यावच्छेमात्रस्येति। अतोनानवच्छेतिं। नहृदेवान्यत्रापि कचित्तर्कमूलयाभिज्ञानेन तर्को नपेक्षणाा इति भावः। केचित्तु कचिदेवा
एवेति। तत्र उपाध्यक्षापरिहारोयमित्याहुः। शंकते। सामान्येति। ततः किमित्यत आह। सामान्यरूपताचेति। तथा च सामान्यत्वेन भानेसमान
दित्यर्थः। ननु। वेत्यानेति तावच्छेकिंमानार्थ भूयोदर्शनापेक्षेति भावः। ननु सामान्यतयोनिर्विशेषनिषेधाइतस्यव्यत्यासत्त्रिम् अनुमते। अन्यथा न
वच्छेदकस्याज्ञानानुपपत्तिः पूर्वज्ञानस्याश्रकारत्वादिति भावः। इदं चाभ्युपेत्योक्तं वस्तुतो मया सामान्यत्र प्यासत्तिर्नाभ्युपेयत इत्याह ॥ तद
चारणात्तःशंकेति। अयोग्येति॥ ॥तथा चानौपाधिकत्वज्ञानं नव्याप्तिधीहेतुरिति भावः। मानांतरमाशंकते। अथेति। पूर्वमनौपाधिकत्वज्ञाने
मित्यर्थः। अपास्य कितं अधुनासाध्यादिसहचरितधर्माणामुपाधित्वसंशयसाव्यभिचारसंशयद्वाराव्याप्तिधीप्रतिबंधकत्वमिति तन्निरा
नेवकासे योजकत्वं पुरस्कृत्याशंकेतिनयो नसन्नमिति प्रेयं। अयोग्येति। तथा च तत्संशयस्याप्रति बंधकत्वमेव वा वं अतः किं तदुक्ते
पाधित्वमिश्रितदर्शनेनेति भावः। सवेति। अयोग्योपाधिसंशयात्क्षीनव्यभिचारसंशयोच्छेदद्वुत्यर्थः। उक्तमिति। उक्तमिवेत्यर्थः। ननु यत्रायो
ग्यव्यहारादि स्थानज्ञानानन्तरं भूयोदर्शनापेक्षास्यादित्यत आह। अपिचेति। संस्कारजन्यत्वे स्मृतित्वापत्तिरित्याशंक्याह। स्मरणो
पाधिस्य व्यहारविशेषणानरतापत्तेरिति। यदसाधारणासहकार्यसाध्यमनोबहिर्गोचरां प्रमांजनयति तस्यैव प्रमाणांतरत्वनियमादिति
पाधिपरत्नौ शंकाइ नमस्यानसुप पादयति। तथाहीति। आधाराधेयभावानुपपन्नेराह। तत्कालेति। तन्मते कालस्य परिदियवेघतयानचात्

चि॰ अ॰ सत्त्वादिविरोध इति ध्येयं। स्वप्रकाशरूपमित्यनेन चानुपपत्तिमुपपादितं। चक्षुर्जन्यज्ञानविषयत्वस्यैव चाक्षुषत्वादिति भावः। स्वमतेन दृष्टां
तमाह। दीर्घत्वेति। उपाधिस्मरणोसतीति। यादृशी सामग्री परमते उपाध्यभावग्राहिका तादृश्येव तद्धेतोरेवेति न्यायेनानुमितिहेतुरि
२२ त्यर्थः। व्यासीति। अधिकरणज्ञानस्य वस्तुत उपाध्यभावगोचरस्यापि तत्त्वाप्रकारकतया नोपाध्यभावत्वेन प्रकारकसंशयनिवर्तक
त्वं समानप्रकारकनिर्णयस्यैव संशयविरोधित्वात्। तथा च भूयोदर्शनात्तादृशनिर्णयानन्तरं न तु कापनीयत इत्यर्थः। अनुपे
स्यतत्प्रकारकनिर्णयानन्तरमपि तत्प्रकारकसंशयमुपपादयति। पदेति। स्वतः प्रामाण्यवादिनोप्यनुभूयमानस्य प्रामाण्य
संशयस्य कथंचिदुपपादनीयत्वादिति भावः। प्रत्यक्षइति। ननु मतेः लौकिकप्रत्यक्षाभावेन प्रत्यक्षमात्रस्य एव तथात्वमिति भावः। यद्य
पासन्यार्थपरस्य ज्ञानमात्रमसंभवि तथाप्यत्र प्रत्यक्षस्य पराभिमतत्वात्तदेवरवंडितमिति ध्येयं। स्वैकदेशिमतं दूषयितुमुपन्यस्य
ति। केचिदिति। प्रथमत इति। कचिद्बुद्धिं विनापि धूमः स्यादिति शंकायां वह्नित्वावच्छेदकत्वसंशयस्य प्रतिबंधकत्वादिति भा
वः। नैयायिकमुखेन मीमांसकमास्कंदति। मैवमिति। किंचेति। यावत्वादेः प्रथमदर्शने ग्रहीतुमशक्यत्वादित्यर्थः। नव्यास्त्विति। २२
नहेतुरिति। अनुमिताविति शेषः। विशेषणेति। यद्यपि विशेषणज्ञानजन्यत्वं विशिष्टज्ञाने परैर्न मन्यते तथापि विशेषणता
वच्छेदकप्रकारकज्ञानं विना विशिष्टवैशिष्ट्यज्ञानं न स्यादिति भावः। ननूपाधिस्मरणासत्त्वादिना न तद्धेतोरेवेति न्यायेन उपा

अभावत्वप्रकारकज्ञानसामग्र्येव हेतुरित्युक्तं॥ तथा च कथमुपाध्यभावज्ञानाधीनानुमितिः स्यादित्यापादनमित्यपरितोषादाह
॥वस्तुतस्त्विति॥ सहचारग्रहीत्यादिपदेन व्यतिरेकित्वादिपरिग्रहः॥ आशयमविद्वान् शंकते॥ अथेति॥ व्यभिचारसंशयवत्त्वमभि
चारधीविरहव्याप्तिपक्षे॥ अनौपाधिकत्वरूपव्याप्तिपक्षे तदभावसंशयोऽपि इष्ट एव॥ आशयमुद्घाटयति॥ नेति॥ किं त्विति॥ यद्यपि तादृशव्याप्यसं
शयस्य तन्निश्चयप्रतिबंधकत्वे योग्यतासंशयस्यापि शाब्दज्ञानकारणत्वं न स्यात्॥ तस्यापि व्याप्यसंशयपर्यवसन्नत्वात्॥ विशेषादर्श
नसहितत्वाच्च॥ तथापि व्यभिचारादिसंशयसत्त्वे न व्याप्तिनिश्चय इति सर्वसिद्धमित्यनन्यगत्या विशिष्यापि तत्प्रतिबंधकत्वं कल्पनी
यमेव॥ अत एवानुपदमेव सिद्धांते ज्ञानं निश्चय इत्यंशे का चेत्यनेन व्यभिचारसंशयस्य तत्प्रतिबंधकत्वमाविष्करिष्यतीति भावः॥ एवं न
भूयोदर्शनेन वा तर्कोपगृहीताप्तिग्राहक इति व्याप्तिज्ञानाभावान्नानुमानं प्रमाणमित्यभिप्रायेणाह॥ एवमिति॥ अत्रोच्यत इति॥ सहचा
रज्ञानत्वेनैव हेतुत्वं न तु भूयोदर्शनत्वेन सकृद्दर्शनत्वेन वा॥ तत्र तदुभयसाधारण्यात्॥ यदेव यस्य व्यभिचारज्ञानविरहसहितं तदेव
तेन व्याप्तिर्गृह्यत इत्यर्थः॥ ननु सहचारदर्शनस्य हेतुत्वे मानाभावः॥ न च विशेषणज्ञानत्वेन तस्य हेतुत्वं सहचारविशेष्यक
व्याप्तिग्रहे व्यभिचाराज्ञानसहचारज्ञानत्वेन तद्धेतुत्वस्य तथाप्यनुपपादनाच्च॥ किं च एवं व्याप्तिघटकपदार्थान्तरस्यापि विशेषणा
त्वेन तज्ज्ञानमपि कारणं स्यान्नोच्येत॥ यस्त्विदं व्याप्तिप्रत्यक्षे विशेषसामग्रीनिरूढकेति तन्नोक्तं तदा सहचारज्ञानेऽपि तुल्यं॥ तस्मादि

२ अनुतत्या॥ ...तेस्य ते ... हेतुत्वं सहचारविशेषणकत्वा। तद्ग्रहे विशेषणज्ञानत्वेन हेतुत्वात्॥ अव्यभिचारविशेषणके तद्ग्रह एव अन्यथा
२ सिद्धत्वादिति चेन्न। अव्यभिचारीत्येवं ग्रहे एव तद्धेतुत्वाभ्युपगमात् सहचारीत्यस्यानपेक्षितत्वात्। व्यभिचारज्ञानविरहस्यैव
२ तत्र हेतुत्वाद्भावविशिष्टज्ञानस्य च सामान्यसामग्रीत एवोपपत्तेरिति॥ पा वि रू ॥ ॥२॥

ग्र.भ.चि. चारज्ञानरूपप्रतिबंधकाभावे सति व्याप्तीन्द्रियसंनिकर्षादेव व्याप्तिनिश्चयो न तु व्याप्तिग्रहे तत्तदपेक्षेति॥ ॥अत्राहुः॥ अगृहीतसहचारस्य सर्वथा
व्याप्त्यग्रहात् सहचारस्य तत्रान्वयव्यतिरेकाभ्यां तस्य तद्धेतुत्वं। अत एव सहचारश्च मे व्याप्तिग्रहे इति वस्तुतो व्यतिरेकसहचारज्ञानस्यान्वयव्याप्ति
23 ग्राहकत्वमित्यग्रे स्फुटं। तस्य च न विशेषणज्ञानत्वेन हेतुत्वं॥ व्यतिरेकसहचारस्यान्वयव्याप्तौ विशेषणत्वाभावात्। नापि सहचारज्ञान
४३ त्वेन। अतिप्रसंगात्। किंतु व्यभिचारज्ञानविरोधिसहचारज्ञानत्वेन। तच्चान्वयव्यतिरेकसहचारसाधारणं। यद्यपि सहचारज्ञानस्य न
व्यभिचारज्ञानविरोधित्वं। महानसादौ वह्निधूमसहचारग्रहेप्ययोगोलके व्यभिचारग्रहात्। तथापि सहचारग्रहविषयीभूताधिकर
णाव्यभिचारधीविरोधित्वमस्त्येव। न हि यत्रैवाधिकरणे साध्यसाधनयोरन्वयो वा सहचारो गृहीतस्तत्रैव व्यभिचारज्ञानं संभवति। अ
न्वयसहचारज्ञाने साध्यात्यंताभावस्य व्यतिरेकसहचारग्रहे साधनस्य तत्राग्रहात्। साधने साध्यात्यंताभावसामानाधिकरण्यग्रह
स्य व्यभिचारग्रहत्वादिति। व्यभिचारज्ञानं च यादृशं केवलान्वयिसाधारणं प्रतिबंधकत्वेन हेत्वाभासग्रंथे निर्वाच्यं तद्विरहो हेतुत्वेन
बोध्यः। उपलक्षणं चैतत्। अव्याप्यत्वादिज्ञानविरहकूटस्यापि वा ज्ञानं चेतदपि विशेषादर्शने सति साधारणधर्मदर्शने तया
संशायकमेव स्यान्न तु निश्चायकमिति वाच्यं। कोटिस्मृतौ तत्स्मृतौ वा तर्कसहकारेण तस्य व्याप्तिनिश्चायकत्वात्। ननु व्यभिचा
रज्ञानविरहसहकृतं सहचारदर्शनं तदुत्तरं वा तिर्म्याये नानुमितावेव हेतुरस्तु न व्याप्तिज्ञाने इति चेन्न। व्यभिचारज्ञानस्याग्राह्यभा 23

वानवगाहित्वेनानुमितौ प्रतिबंधकत्वाभावेन तदभावस्याहेतुत्वात्। तस्मादनुमितिजनकीभूतमव्यभिचारज्ञानं विघटयन्न एव तस्या
नुमितिप्रतिबंधकत्वं न तु साक्षात्॥ ॥ याद्दृशतर्कस्य मूलव्याप्तौ व्याघातेन शंकैव नावतरति तादृशं वह्निधूमकार्यकारणभावव्या
हकं तर्कमुदाहरति। धूमो यदीति। घटादौ व्यभिचारवारणाय समन्तं। वह्निसमवहितसामग्रीजन्येनेत्युद्धारणाय विशेष्यं॥ धूमस्य
वह्निसमवहिताजन्यत्वमित्युपदर्शयाभेवतर्कोयमभिमतः। तेन सत्यंतविशेषणस्येव व्यतिरेकमादाय नास्य विपर्ययपर्यवसानं॥
एवं च वह्निसमवहिताजन्य इति पक्षविशेषणमप्यभिमतं। तथा चावह्नेरेव भविष्यति किंचिद्वह्निं विनापि भविष्यतीति शंकोदयमापाद्या
पादकव्याप्तिग्रहापरिपंथीभूतमपि पक्षविशेषणग्रहपरिपंथित्वादाशंकापरिहृतमिति ध्येयं। अप्रयोजकत्वं शंकते। अहेतुका
इति॥ नतुपादानमिति। ननु पादानहेतुभूतं धूमवह्न्यादिकार्यकारणभावज्ञानमेव त्वर्थः। शंकापावि रोधिनि ग्रयप्रतिबंधत्वादिति
ध्येयं। ननु धूमवह्न्यादि कार्यकारणभावः प्रथमं यदि गृहीतस्तदा किमनेन तर्केण। तत्कं तेष कार्यकारणभावग्रहस्य योग्य
वजानत्वात्॥ यदि तर्कात्पूर्वं स न गृहीतस्तदा प्रतिबंधकाभावेन कथं शंकाकवलितस्तर्क एव कथं ज्ञानमनुत्पादयेत्॥ ॥ अत्र के
चित्॥ धूमार्थवह्नेरुपादानं कथं कुर्यादित्यत्र धूमार्थवह्निसमवहितानुपादाने कथं कुर्यादित्येव विवक्षितं। तथा च दुपादान
मेवेत्यत्रापि वह्निसमवहितानुपादानमेव विव क्षितं॥ धूमार्थनियमतस्तदनुपादाने तद्भूतधूमस्य तदजन्यतापत्तेर्न वह्नि
त

न८

अ॰ वि॰ भ॰ धूमयोः कार्यकारणभावज्ञानेप्यन्वयव्यतिरेकदर्शनादिनामवतेव। तथा च वह्निधूमयोः कार्यकारणभावज्ञानं पूर्वमनुमानमेवानेनैव तर्के
णेत्याशयेन। तर्कस्याप्रयोजकत्वादेव धूमगोचरव्याप्यसमवहितत्वज्ञानात्कार्यसहेतुकमिति ज्ञानाज्ञोऽकशंकात्रयावकाशरहि
२४ तो भवतीत्याकूतं॥ तत्र धूमव्याप्यसमवहितत्वानुपादानस्यता दृश्यशंकाप्रतिबंधकत्वेमानाभावात्। शंकायां विरोधिनिश्चयनिवर्त्यत्वात्॥
धूमव्याप्यसमवहितत्वज्ञानाभावान्न तदुपादानस्यात्। तस्य वह्निजन्यत्वज्ञानाभावाद्वह्निं विनापि स्यादित्याशंकापि स्यात्कोवि
रोधः॥ ॥ अन्येतु तदुपादानपदेन तदुपादानप्रयोजकान्वयव्यतिरेकानुविधायित्वज्ञानमेव। तदेव शंकाप्रतिबंधकं। परवह्नि
का २५१ देनयद्व्यापकधूममदर्शनेन तद्ज्ञानस्यापि तच्छंकाविरोधित्वात्। अतएव धूमत्वाद्यवच्छे[illegible] व्याप्तिग्रहे धूमादर्शनादेव पर्वते वह्नि धूमेन
व्याप्तिकसंशयइति। नचिंत्यं। अन्वयाद्यनुविधायित्वज्ञानस्यासत्त्वासिद्धत्वेन चासाधारण्येन शंकाप्रतिबंधकत्वाभा
वात्। नियमघटितज्ञानं च कारणत्वादिग्रहपर्यवसन्नमिति पूर्वोक्त[illegible]षानतिवृत्तिरिति॥ ॥अत्रोच्यते॥ नहि सर्वत्रानेन
व तर्केण धूमवह्निकार्यकारणभावग्रहः। कोटिस्मरणादिविरहेण स्वतःसिद्धशंकाविरहेऽन्वयादिज्ञानवतो व्याप्तिग्रहेवा
धकाभावान्नाप्यस्वतःसिद्धशंकाविरहेऽनेनापि तर्केणात इहेबाधकाभावाच्च। तदिदमुक्तं क्वचित्स्वतःसिद्ध एवेति। तस्मात्स्वतःसु २४
वत्र शंकास्यादेव ततः कुत्रापि न व्याप्तिग्रहस्ततोऽनुमानमप्रमाणमिति यच्चार्वाकादिमतं तन्नरसु चानेनायं नियमः साध्ये

त्सर्वत्रशंकेतितथासत्येतादृशस्थलेऽपिनाशंकायांभवतोधूमार्थंवह्न्युपादानंव्याहन्येतेति।नदिदमाहनहिसंभवतिस्वयंवह्न्यादिका
र्यार्थंनियमतउपादेयत्वेनतत्कारणत्वेनज्ञात्वाशंकनंचेतीति।तथाचशंकानवकाशप्रभावान्नव्याप्तिग्रहानुपपत्तिर्नवानवस्थेतिसिद्धमनुमानमि
तिसर्वमवदातं॥ ॥व्याघातज्ञानंनशंकाप्रतिबंधकंयेनतस्यानियमतयानवस्थास्यात्किंतुस्वक्रियैवेत्याह।एतेनेति।तत्रापीति।
व्याघातज्ञानेनापीत्यर्थः।स्वक्रिययावाइति।अत्रस्वक्रियापदंस्वहेतुभूतनि[illegible]फलज्ञानपरंविरोधिनिश्चयस्यैवशंकाप्रतिबंधकत्वा
दिति।ध्येयं।अतएवेति।व्याघातोयद्यस्तितदाशंकास्त्वेवास्वक्रियाविरोधप्रतियोगित्वात्शंकायांजातायामेवस्वक्रियाविरोधा
त्मनोव्याघातस्यावतारात्।निष्प्रतियोगिकविरोधासंभवात्।नचेतत्व्याघातइत्यनुषंगःप्रतिबंधकत्वाभिमतव्याघातविरहात्तत्रासु तत:९
नरामेवशंका।तथाचव्याघातावधिराशंकातर्कैःशंकावधिरितिकुतः।व्याघातस्थलेऽपिशंकावश्यंभावेननत्रिवर्तनार्थमपिपुनस्त
र्कानुसरणेनवस्थापत्तिरितिरिक्तंनक्रतोक्रमतएवापास्तमित्यर्थः।नहीति।यत्रव्याघातःशंकायास्तत्रशंकावधिर्भवतीत्युच्यतेनहितत्रव्या
घातज्ञानंतत्रशंकाप्रति[illegible]बंधकंभवति।किंतुस्वक्रियैवव्याघातापरपर्यायाशंकाप्रतिबंधिकेत्यर्थः।नेचेति।यदिहि।विपरीतनिश्चय
जनितविरुद्धस्वक्रियास्थलेऽपिशंकोत्पद्यतएवकिंतुस्वक्रियाव्याघातःपरंतदाशंकोपयकोऽवतरनितदाविपरीतनिश्चयात्कवि
हिपरीतशंकानिवृत्तिरपिनस्यात्।नहियस्मिन्नित्थित्वेयाशंकोत्पद्यतेसाततोनिवर्ततइतिभावः।भूयोदर्शनेऽविनेतिप्राय्या

वारः।अनुत्पन्नस्य प्रथमदर्शनेऽपि निर्कोवकता रात्रासइति।भूयोदर्शनरूपोऽर्थइत्यर्थः।अश्मास्वादिप्रापाततः।वस्तुतस्तर्कस्य प्रमाणत्वे
पिनिर्व्यापारतयैव संस्कारस्यन प्रमाणत्वमितिद्रष्टव्यं।तत्रेति।व्यभिचारज्ञानविरहसहकृतसहचारदर्शनमित्यर्थः।व्याप्तिग्र

सहइति।व्याप्तिग्रहत्वविशेषइत्यर्थः।यद्यपिबाधाभावतया व्यभिचारज्ञानविरहस्य साध्यप्रसिद्धितयापदार्थोपस्थिति
तयाचसहचारज्ञानस्यशब्दानुमितोरपि हेतुत्वमस्तितथापिवाधसंशयस्यतदुभयजादोषतयाव्यभिचारनिश्चयविरह
मात्रस्यहेतुत्वेनसहचारज्ञानस्यतत्रेनाजनकतयाचेनदुक्तमितिध्येयं।भ्रांतोदेशयति।नन्विति।अपरेत्विति।अन्वेदयनभि
मतिवीजं।एवंस्तनपानस्कूलेनवस्थोद्वारेऽपिवह्निधूमयोर्व्याप्तिग्रहप्रमाणायोग्यत्वाशंकावतारे तदुक्तप्रकारस्यैवानुसरणीयस्या
प्रयोजकत्वमिति।यन्निति।अनादिसत्त्वेनतानात्रिःशंकमवगम्यमानःकार्यकारणभावविरोधादिःकेषांचित्तर्काणांमू
लमतोनतर्कानवस्थेतिभावः।तत्रेति।तत्रमूलभूतस्यकार्यकारणभावविरोधादेरनादिसिद्धत्वेप्रमाणानुसंधानेअनुमा
नएवपर्यवसानात्।तथाचतत्रापितर्कानरापेक्षायामनवस्थेतिभावः।अनुपपत्तेरिति।तथाचेपुनरनवस्थेतिभावः।व्यभि
चारादिति।वैजात्यकल्पनेप्रमाणाभावइतिभावः।अनौपाधिकत्वंग्रहमिति।तथाचतज्ज्ञानमेवव्याप्तिधीहेतुरस्तु
त्विभावः।नत्साधनइति।साध्यव्यापकत्वसाधनव्यापकत्वसाधनइत्यर्थः।धीहेतुरस्त्वितिभावः।तत्साधनइति।साध्या

व्यापकत्वसाधनव्यापकत्वसाधनद्वयस्य व्याप्तिग्रहे परंपरया। पि तर्कस्य न प्रयोजकत्वमिति ये वदंति तेषामनुमानमात्रोच्छेदप्रसंग इत्य
हये चेति। ननु व्यापकव्यतिरेकेणापि व्याप्यव्यतिरेकस्य साधनमनुमानमेव। तत्रापि च प्रश्ने तदन्तस्तद्भावाद्व्यतिरेकसाधनेऽनवस्थानु
मानादेव साध्यसिद्धिः स्यात्। किंचानुमानमात्रोच्छेदकत्वलक्षणप्रतिकूलतर्कादेव तस्य न साध्यव्यापकत्वग्रह इति नो
क्तदोष इत्यत आह अपि चेति। यद्व्यतिरिक्ते तिसाध्यं परमतेन इष्टव्यं। क्षित्यादौ हि कर्तृकत्वानुमानमस्मन्मते अप्रयोजकं
वाध्यं। तस्मादिति। व्यभिचारेण तर्कस्य व्याप्तिग्रहहेतुत्वं निषिद्धं न तु व्यभिचारशंकानिवृत्तिद्वारा प्रयोजकत्वमपीति भा
वः॥ ॥उक्तव्याप्तिप्रकारेष्विति॥ अन्योन्याभावगर्भव्याप्तावत्यंताभावेऽप्रतियोगिसमानाधिकरणत्वप्रवेशादन्योन्याभावगर्भ
व्याप्त्यपेक्षया गौरवमिति भावः। अत्र वदंति। न व्याप्तिरनुमितिहेतुः किंतु तज्ज्ञानं। तथा च यज्ज्ञानस्य तद्धेतुत्वं तदेव हे य
दकं लघु भवति सैव व्याप्तिरूपादेया। तादृशी च गुरुशरीरात्यंताभावगर्भैवसा। न हि तत्र प्रतियोगिसमानाधिकरणाभा
गस्यात्यंताभावविशेषणस्य ज्ञानमनुमित्युपयोगीति तस्योपादानं। किंतु व्याप्तिस्वरूपकथनमात्रार्थं। तस्य तत्र ज्ञाने वि
नापि स्वसमानाधिकरणसकलात्यंताभावप्रतियोगिवह्निसमानाधिकरणधूमवानयमिति ज्ञानेनानुमितेर्विलंबाभावात्। सं
योगात्यंताभावोऽपि न प्रतियोगिसमानाधिकरण इति ज्ञानवतोऽपि उक्तत्वादिना संयोगाद्यनुमानाच्च॥ एवं च साधनसमानाधिकरण

अ. चिं. म० योऽत्यंताभावः प्रतियोगिसमानाधिकरणत्वेन नज्ञायते तत्प्रतियोगित्वेन ज्ञायमानं यत्साध्यं साधननिष्ठतत्सामानाधिकरण्यज्ञा
नत्वमेव तद्व्याप्तिज्ञानस्यानुमितिहेतुतावच्छेदकं वाच्यं। तच्चान्योन्याभावगर्भव्याप्तिज्ञानस्य तद्धेतुतावच्छेदकं यत्तदपेक्षया लघुशरी
२६ रमेव भवति। तस्यापि हि तद्धेतुतावच्छेदकेनोक्तस्वरूपज्ञानत्वमेव। तथा सति संयोगवदन्योन्याभाववान् व्याप्यवान् इति ज्ञानवत्तो
द्रव्यत्वेन संयोगानुमानापातात्। किं तु साधनसमानाधिकरणो योऽन्योन्याभावः प्रतियोगितावच्छेदकसमानाधिकरण
त्वेन नज्ञायते तत्प्रतियोगितानवच्छेदकत्वेन ज्ञायमानं यत्साध्यं साधननिष्ठतत्सामानाधिकरण्यज्ञानत्वमेव तदवच्छेदकं
वाच्यं॥ एवं च तदपेक्षया गुरुशरीरमेव स्थाने द्वयेऽवच्छेदकपदस्याधिकस्य प्रवेशादिति॥ ॥अत्रेदं चिंत्यं॥ भवेदेवं विपरीतगौ
रवं यद्यत्यंताभावगर्भीयां प्रतियोगिसमानाधिकरणत्वेनाज्ञायमानत्वमन्योन्याभावगर्भीयां च प्रतियोगितावच्छेदकसामा
नाधिकरण्येनाज्ञायमानत्वं स्वरूपसदवच्छेदकं स्यात्। किं तूभयत्रस्वाभावसमानाधिकरणत्वेनाज्ञायमानत्वमेव विशेष
णमस्तु। स चाभावोऽत्यंताभावस्य प्रतियोग्येव अन्योन्याभावस्य तु प्रतियोगितावच्छेदकमित्यन्यदेतत्। अवच्छेदकत्वं तु २६
स्वाभाववत्वेनैव। न तत्तेन रूपेणेति कुतो विपरीतगौरवं तस्मादुभयत्रास्मिन्नस्वरूपसदवच्छेदके समाने कृतो लाघ
वादन्योन्याभावगर्भैव व्याप्तिरनुमितिहेतुरित्यवधार्यते। न तथा च विनिगमनाविरह इति दूषणमत्र द्रष्टव्यं। यद्वा अन्यो

न्याभावे प्रतियोगिवृत्तित्वेनाज्ञायमानत्वमेव विशेषणमस्तु तथा च न विपरी। तं गौरवमिति॥ वयं तु ब्रूमः॥ विपरीतमेव गौर
वं किंतु प्रकारान्तरेणैवातथा हि। निरुक्तस्वरूपसदवच्छेदकेऽभयत्र समानेऽपि अन्योन्याभावगर्भायामवच्छेदकान्तरप्र
वेशआवश्यकः। न हि स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकसाध्यसामानाधिकरण्यं व्याप्तिरित्यत्र वि
वक्षितं। तथा सति तत्रोक्तस्थले सत्त्वहृदसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकतया धूमेऽपि वह्निव्याप्त्यभावापत्तेः॥
किंतु तादृशान्योन्याभावप्रतियोगितावच्छेदकतावच्छेदकं यत्र भवति तदवच्छिन्नसामानाधिकरण्यं। वह्नेश्च तदवच्छेद
कत्वेऽपि वह्नित्वेन नावच्छेदकता। किंतु तत्रह्रदित्वेन धूमवान् वह्निमान् भवतीति प्रतीतेः। अत्यन्ताभावगर्भायां तु तादृ
शात्यन्ताभावप्रतियोगितावच्छेदकं यत्र भवतीत्येव विवक्षितं। तावतैवोक्तदोषनिरासः इति। एवं च यद्यन्योन्याभावगर्भायां
स्वरूपसदवच्छेदकं न प्रवेश्यते तथाप्यवच्छेदकान्तरमतिरिक्तं प्रविष्टं अत्यन्ताभावगर्भायां च प्रतियोग्यसामानाधि
करण्यमिति कृतं लाघवादिप्रमेव हेतुरित्यपि चिंतनीयं। न चाभावगर्भत्वेन तत्स्याः गुरुत्वमिति वाच्यं। अवच्छेदकस्या
प्यनतिरिक्तवृत्तित्वार्थकत्वेन तुल्यत्वात्॥ अन्ये तु लाघवं लघूपस्थितिकत्वाद्धीघोपस्थितिकत्वादिति यावत्। ननु
तु लाघवं॥ तथा चात्यन्ताभावापेक्षयाऽन्योन्याभावस्य शीघ्रोपस्थितिकतया तद्गर्भा व्याप्तिरपि तथैवेति सैवानुमितिहेतुः।

चिं॰ अ॰ म॰ न्तु चरमोपस्थितत्वात्। न च शीघ्रोपस्थितिकत्वमसिद्धं तस्यावश्यकत्वात्। तथाहि धूमवह्निसामानाधिकरण्यग्रहकालेऽधिक
रणग्रहानियमात् तदभावो नावश्यं गृह्यते। अन्योन्याभावस्तु धूमवह्न्योरप्यतो गृह्यत एव। तथा च तत्प्रतियोगित्वेन वह्निमति
२७ मुग्रहे। न चात्यन्ताभावप्रतियोगिनोऽपि ज्ञानमस्त्येव अतो धूमत्वादेरेव ग्रहादिति वाच्यं। समत्वादेर्धूमत्वलाघवस्याप्रतीत्या
प्रतियोगितावच्छेदकावच्छिन्नत्वेनाज्ञानात्। अत एवाप्रतियोगिन्यां तथापि चान्योन्याभावगर्भे नैवाप्रतियोगित्वाभावस्य
27 तियोगिनिरूपणाधीननिरूपणत्वात्। तथा विलम्बितोपस्थितिकत्वादिस्फुटः। तदपि विशिष्टधूमरूपादेरधिकरणस्य महानसा
देश्चान्यतमाभावप्रतियोगिनस्तत्रापि ग्रहसम्भवात्। वह्न्यादिना रूपेण गृह्यमाण एव ग्रहात्। न च प्रमेयत्वादेः केव
लान्वयिनो व्याप्ये प्रमेयत्वादेरधिकरणे तथा स्वस्मिन्नपि स्फुटत्वात् स्वस्यान्योन्याभावप्रतियोगिनो ग्रहापत्तेरिति वाच्यं।
केवलान्वयिनि प्रमेयत्वादिघटकपदार्थस्य कस्यचिदन्योन्याभावप्रतियोगिनस्तत्रापि ग्रहसम्भवात्। अपि च। अस्तु
प्रथमोपस्थितत्वं। तथाप्युभयव्याप्युपस्थितिदशायां गुरुलाघवेनान्योन्याभावगर्भाया एव हेतुत्वग्रहे प्रथमगृहीतस्या २७
पि प्रामाण्यस्वात्। प्रथमोपस्थितिलाघवापेक्षया वस्तुलाघवस्य बलवत्त्वात्। अत एव व्याप्यतावच्छेदकप्रकारकज्ञानस्या
प्रथमोपस्थितत्वे उभयोपस्थितिदशायां लाघवेन व्याप्यत्वप्रकारकज्ञानस्यैव हेतुत्वग्रह इत्यग्रे वक्ष्यते। अत एव प्रथमग्र

हीतापि कार्यान्विते शक्तिरयेलाघवानुरोधेन त्यज्यत इति दिक्॥ यत्तु वस्तुतस्तु योयो धूमवान्सोग्निमानित्युदाहरणवाक्यात्रात्यंताभावग
र्भानवान्योन्याभावाभावगर्भाव्याप्तिः प्रतीयते। साधनसमानाधिकरणात्यंताभावप्रतियोगिकपदादेस्तत्वाभावो वा न किंतु साधनस्वरूपावच्छेदकध
र्मत्वावच्छिन्नसाध्यसंबंधितारूपाव्याप्तिर्धूमादौ नातोवगम्यइतिसैवानुमितिहेतुरिति। तन्न। निरुक्तावच्छेदकस्योदाहरणवाक्या
दप्रतीतेः। यदपि यस्यज्ञानं विरोधि तदभावगर्भं तस्य सामानाधिकरण्यं हेतुर्वाच्यः। अत एवोपाधिज्ञानमविरोधीत्यतो नोपाधिक
त्वमहेतुः। विरोधि च साध्यवदन्योन्याभाववद्धेतुत्वज्ञानंत्यंताभावज्ञानमपि। तथा च तदुभयगर्भैव व्याप्तिरनुमितिहेतुः। अन्योन्या
भावगर्भैवेत्युपलक्षणं। अत एवायं नोपाधिकत्वं यदवच्छिन्नमनोपाधिकं तत्तल्लक्षणमिति। न चैवमननुगमः। साध्यविरोधिसा
मानाधिकरण्यधी विरोधिसामानाधिकरण्यज्ञानत्वेन सर्वव्याप्तीनामनुगमात्। साध्यविरोधित्वं च साध्याधिकरणानधिक
रणत्वं साध्यवदन्योन्याभावसाध्यात्यंताभावसाधारणमिति। तदपि न। अन्योन्याभावगर्भव्यभिचारसत्वेप्यत्यंताभावगर्भ
व्याप्तिज्ञानादनुमित्यापत्तेः। कारणतावच्छेदकावच्छिन्नपत्तिं विना तत एव कार्योत्पत्तेः। ग्राह्याभावानवगाहित्वेन तत्र तस्या
प्रतिबंधकत्वात्। न चेष्टापत्तिः। अनुभवविरोधात्। वैपरीत्यस्यापि संभवेनात्यंताभावगर्भव्यभिचारज्ञानस्याप्रतिबंधक
त्वे व्यभिचारस्य हेत्वाभासतानापत्तेश्च। न च तावद्व्यभिचारज्ञानानां प्रतिबंधकतया तदत्यंताभावकूटस्याप्यनुमितौ हेतुत्वमिति

चिं॰ अ॰ वाच्यं तथा सति व्याप्तिज्ञानस्य हेतुत्व एव मानाभावात् तत्कूटसहकृतसहचारज्ञानस्यैव हेतुत्वापत्तेः । वयं तु पश्यामः ॥ अत्यन्ताभावगर्भस्यो
न्याभावगर्भव्यभिचारज्ञाने सति नानुमितिरिति सर्वजनसिद्धं । तथा च यज्ज्ञाने सति न तदुभयव्यभिचारास्फूर्त्तानं सैव व्याप्तिरनुमितिहेतुः
२८ तादृशी चाशेषसाधनाश्रयाश्रितसाध्यसंबंधरूपैव साध्यवत्त्वग्रहस्य साध्यात्यन्ताभावसाध्यवदन्योन्याभावग्रहविरोधित
28 या सकलसाधनाधिकरणे तद्ग्रहणस्योभयव्यभिचारग्रहविरोधित्वात् । न च साधनाश्रये महानसादौ सकले प्रत्येकं वह्नि
राश्रितत्वाभावादिदमयुक्तमिति वाच्यं । यावत्साधनाश्रयाश्रितं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यस्य विवक्षि
तत्वात् । न च साधनाश्रये महानसादौ साध्यतावच्छेदकस्य वह्नित्वादेराश्रितत्वाभावादिदमप्ययुक्तमिति वाच्यं स्वाश्रयघटि
तपरंपरासंबंधेन तस्यापि तद्वृत्तित्वात् । इयमेव व्याप्तिरुदाहरणे न प्रदर्श्यते इति तस्य व्याप्त्युपदर्शकाव्ययत्वमपि सर्वमिदं
संगच्छते । न च वीप्साबलेन ततः सकलधूमाधिकरणे वह्निसंबंधप्रतीतावपि वह्नित्वेन तत्प्रतीतिः परंपरासंबंधाभावादिति ना
वाच्यं सकलसाधनाधिकरणे वह्निसंबंधे वह्नौ च वह्नित्वसमवाये भासमाने तस्यापि भानात् । अत्यन्ताभावगर्भो न्यो
न्याभावगर्भो च व्याप्तिरतल्लक्षणं । अनौपाधिकत्ववत् । अत एवैतद्ज्ञाने अत्यन्ताभावगर्भाया व्याप्तेः । शब्दादिनापि २८
प्रतीतावतीतावपि नानुमितिः । उक्तयुक्त्या लाघवेन चास्या एव हेतुत्वात् । अत एवान्योन्याभावगर्भादिव्याप्तिग्रहहेतुता ।

दिनः शब्दादिनाप्यनौपाधिकत्वरूपव्याप्तिग्रहोपि नानुमितिहेतुरिति संक्षेपः॥ ॥लक्षणमिति॥ ज्ञापकमित्यर्थः। नन्विति। अनौ
पाधिकत्वस्य व्याप्तित्वानभ्युपगमादिति भावः। हेतुत्वादिति। व्याप्तिज्ञानं हेतुत्वादित्यर्थः। तदीति। व्यभिचारधीरित्य
र्थः। न च साम्यमित्याह। नचेति। न चानयोरिति। यद्यपि केवलान्वयिसाधारणापादनुरोधेन साध्यसाधनसमानाधिकरण
त्वं ताभावप्रतियोगित्वमेव व्यभिचारस्तथाप्यस्य विशेषणविरहेपि विशिष्टसामानाधिकरण्यविरहत्वं न संभ
वतीति भावः। एतद्वसंप्रदायमतेनामणिकारमते चान्योन्याभाववद्गामित्वं व्यभिचारो बोध्यः॥ ॥इंद्रियेति॥ ॥संयुक्तसमवा
यादिनाइंद्रियसंबद्धे धूमत्वादौ स्मादिव्यक्तीनां विशेषणाभावादित्यर्थः। नन्वेवं सामान्यप्रत्यासत्तिर्न स्यात्। अस्माभावादित्याह कविशेषणता
रूपत्वात्। अत एवालौकिकत्वमप्यस्याः सर्वसिद्धमनुपपन्नं स्यादित्यनुशयेनाह। अतिरिक्तैवेति। तथा च विशेषणतानभिन्नत्वेनोभयमप्य
स्याउपपन्नं रोपादापुरिणपाने तु लौकिकाभिप्रायकमिति भावः। फलवलेनेंद्रियसंबद्धमेव सामान्यं प्रत्यासत्तिस्तेन निमीलितावस्थात
ज्ञान्यानवाह्यपक्षीरिति समंतव्यं। मीमांसकमतमूलोन्मूलयति॥ तदपरइति। धूमत्वावच्छिन्नेति। येवं धूमत्वावच्छिन्ना सकलधूम
वृत्तिः सेवसंनिकृष्टात्मिः प्रत्यक्षेणज्ञायत इत्यर्थः। ततइति। यदवच्छेदेन यद्ग्रहस्तद्धर्मवत्त्वग्रहस्यैवतदुपनयहेतुत्वादिति भावः। तद
नभ्युपगमइति। तृतीयलिंगपरामर्शानभ्युपगमइत्यर्थः। नचैवं संनिकृष्टधूमे धूमत्वेन व्याप्तिग्रहे धूमांतरे व्यभिचारसंशयग्रहेप्यनुमि

चिं० अ० स्यात्तु पत्तिरितिवाच्यं। तन्मते व्यभिचारज्ञानाभावस्याप्यनुमितौ हेतुत्वादिति भावः। व्याप्त्यनुभवेति। व्यापारवतः करणत्वमितमभिप्रेत्य
करणत्वाभिप्रायेण व्याप्त्यनुभवोपादानमिति ध्येयं। व्याप्तिज्ञानत्वेनानुमितिहेतुत्वात्स्वरूपयोग्यताभिप्रायेण तदुक्तमित्यन्ये॥
२९ एकेति। तस्यावश्यकत्वादिति भावः। गवादिपदेष्विति। तथा च तत्रापि शक्तिग्रहे सकलगोव्यक्त्युपस्थित्यर्थं नानात्वोपकार इति भावः॥
29 एतन्न परस्मिन्ज्ञानमभिप्रेत्य। स्वमते ज्ञानानेव शक्तिग्रहादिति। नाम इति। अनुभव इत्यर्थः। वह्निमानिति। ननु पदमुभयत्र देयं। ते
नन व्यभिचारादिकमिति ध्येयं। धूमस्यापीति। तथा च धूमत्वस्यापि प्रत्यासत्तित्वमावश्यकमिति भावः। दृष्टान्तेति। यद्यपि सत्त्वादिज्ञानादि
साधकमनुमाने विशेषणाभि ज्ञानजन्यत्वमस्ति तथापि तस्य न तेन तज्जनकत्वं किन्तु विशेषणतावच्छेदकप्रकारकत्वेनेति भावः। प्रसि
द्धधूमाविच्छिन्नसंदेहानुगमादिति। न च प्रसिद्धधूमेऽपि देशान्तरे व्यभिचारस्य शंका स्यादिति वाच्यं। प्रसिद्धधूमे यावत्त्वं देशान्तरे वह्नि
विधावगमेऽप्यनुकूलतर्कादिविरहे धूमो वह्निव्यभिचारी न वेति संशयस्यानुभवसिद्धत्वादिति भावः। अत्रेदं चिन्त्यं। सामान्यलक्ष
णप्रत्यासत्तिस्वीकर्तॄणामनुमानप्रामाण्यमवश्यं स्वीकरणीयम्। एवं चानुमानादेव कालान्तरीयदेशान्तरीयधूमोपस्थितिसंभवे किं
मनया प्रत्यासत्त्या। न च तदवतारस्य व्याप्तिस्मृतिविलंबितत्वमिति वाच्यं। तदनवतारदशायामपि व्यभिचारसंशय इत्यत्र मानाभा २९
वात्। तथा च सर्वत्र तत्संशयो नास्त्येव॥ कश्चित्कोटिस्मरणादिविरहस्यापि संभवात्। यत्र च तत्संशयस्तत्र प्रसिद्धविशेषदर्शना

तदकल्पने १

दप्रसिद्धज्ञानजनकं किंचित्कल्पनीयं। तच्चावश्यकल्पनीयत्वेनानुमानमेव कल्प्यते। ननु प्रत्यासत्तिः। अज्ञातसत्वात्। नवं पक्षवृत्तिलिंगेच्छा
श्यपदाम्परामर्शाभावे नानुमानमपि नस्यादिति वाच्यं। व्याप्यतावच्छेदकप्रकारकज्ञानस्यैवानुमितिहेतुत्वमिति परसिद्धांतात्। अ
तएव तदकल्पने पक्षीयसाध्यज्ञानाभावान्नानुमानमिति परास्तं। विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारकज्ञानस्यैव
हेतुत्वमिति सिद्धांतात्। नन्वेवमनागतधूमज्ञानार्थं तदनन्तमुपगमेपि अनागतगोचरप्रत्यासत्त्यर्थं सामान्यप्रत्यासत्तिस्वीकार
आवश्यकः संशयेप्यनागतविशेष्यके विशेष्यप्रत्यासत्तिजन्यत्वस्वीकरणादिति चेन्न। संशयस्य मानसत्वेनाप्युपपत्तेः प्रत्यासत्त्य
न्तराकल्पनात्। अतीन्द्रियविशेष्यकसंशयवत्। चक्षुरन्वयव्यतिरेकविधानस्य महत्त्वादिसाधारणधर्मदर्शनोपक्षीणत्वात्। अन्य
था बाधकाभावेन तस्य चाक्षुषत्वात्। अत एव व्यभिचारसंशयोपपादकत्वेनानुमानमाचार्यचरणैः कुसुमांजलौ शंका चेदनुमा
स्त्येवेत्यनेन प्रसाधितं। तस्माद्व्यभिचारसंशयानुरोधेन न तत्सिद्धिरिति॥ ॥ अन्ये तु यदि सामान्यप्रत्यासत्त्या प्रसिद्धाप्रसिद्धसक
लधूमोपस्थितावप्रसिद्धधूमे विशेषादर्शनेन धूमो वह्निव्यभिचारी न वेत्याकारः संशयस्तदा एतदिंधनखंडप्रभवधूमः प्रमे
द्धावनुगतस्याज्ञानात्स्यैव। प्रसिद्धे चेतन्यभवे वह्निसंबंधस्यावगतत्वात्तदिंधनखंडप्रभवधूमगोचरएतदिंधनप्रभवो धूमो वह्निव्य
भिचारी न वेत्याकारसंशयो न स्यात्। प्रसिद्धे तत्र विशेषदर्शनात्। अप्रसिद्धस्य चैतस्यासत्वात्तदिंधनप्रभवधूमत्वरूपसामान्यप्रत्या

विं॰ शा॰ सम्मासस्याप्यनुपस्थितेः। न चासावसिद्ध एव। अत्र तु कूलंतर्कादिविरहदशायां धूमो वह्निव्यभिचारी न वेति संशयवन्नस्यापि सर्वात्मभवसि
३० द्धत्वात्। अथ यत्किंचित्तत्रैव एतद्धिनप्रभव धूमत्वं वह्निव्यभिचारि इति निर्णये त्वादिसंशयाहितस्तत्र संशय इति मतं तर्हि धूमेऽपि धूमत्वं व
ह्निव्यभिचारि इति निर्णये त्वादिसंशयाहितः एवं तादृशः संशयोऽस्तु किं तदर्थं सामान्यलक्षणया। ननु सामान्यलक्षणां विना यथोक्त
संशयस्याप्यनुपपत्तिः। तथा हि। वह्निव्यभिचारित्वेनोपस्थितास्तु वह्निव्यभिचारिघटादिव्यक्तिषु धूमत्वव्यतिरेकनिश्चयेन धूमत्व
३० त इति तत्संशयाभावाद् वह्निव्यभिचारित्वरूपसामान्यप्रत्यासत्त्यैव विशेषदर्शनयस्तव्यक्त्यतिरिक्तव्यक्त्युपस्थितिर्वाच्येति चे
त्। वह्निव्यभिचारित्वेनोपस्थितेषु वृत्तं धूमत्वव्यतिरेकनिश्चय इत्यन्न मानाभावात् सामग्रीविरहात्। पूर्ववदनुमानेनोपस्थिते
ष्वा। यत्तु तदिंधनप्रभवत्वस्य धूमस्याप्रसिद्धस्येव विशेषस्याभावात्तत्संशयो न भवत्येव। प्रकृते चाप्रसिद्धस्य धूमस्य सत्वात्संशयो
न भवितव्यमिति। तत्र। उक्तसंशयाहितस्याचित्याद्वह्नितस्य संशयस्याप्रसिद्धविषयस्यापि संभवात्। प्रामाण्यसंशया हि तद्विषय
संशयवत्। तस्मादेतद्विगमयितुमाहुः। वयं तु ब्रूमः॥ ॥वह्निमानित्यनुमितौ विशेषणज्ञानजन्यत्वानुमानादेव सामान्यप्र
त्यासत्तिसिद्धिः। न च हेतोरभावः। तथा सति तत एव गौरिति विशिष्टज्ञानेऽपि विशेषणज्ञानजन्यत्वानुमितिविरहे निर्विकल्प
कासिद्धिपर्यवसानात्। यद्विचसाध्यप्रसिद्धिपरार्थोपस्थित्या स्वानुमित्यादौ विशेषणज्ञानत्वेन हेतुत्वे यद्विशेषयोरिति न्यायेन वि ३०

शिष्टज्ञानमात्रे विशेषणज्ञानत्वेन हेतुत्वे बाधकाभावादिति तत्सिद्धिरिति मनसैव तदा प्रकृते पि तुल्यं यद्यपि परस्या निर्विकल्पकासिद्धि
रिष्टैव तथापि तत्साधकत्वं परोप्यंगीकारयितव्य इति स्वमतावष्टंभेनेदमुक्तमिति ध्येयं। न चानुमानादेव धूमविशेषणज्ञानमस्त्विति वा
च्यं। अनवस्थानात्। तत् मान्तरं क्रमासामान्यप्रत्यासत्तिर्धूममात्रे व्याप्त्यादिकमपि ग्राहयतीति तत्त्वं। यत्तु धूमत्वावच्छिन्नाप्रसि
द्ध्या धूमनिष्ठ एव न तु सन्निकृष्टधूममात्रनिष्ठा। तया च संबंधविशेषरूपायास्तस्याः संबंधिभूत सकलधूमनिरूप्यत्वात् सकलधूमो
पस्थितिं विना ज्ञानमशक्यमिति तदर्थं सामान्यप्रत्यासत्तिस्वीकार इति। तन्न। सकलसंबंध्युपस्थितिं विनापि एकत्रापि संबंधस्य
नेकनिष्ठसंबंधस्याज्ञानात्। एकस्मिन्नपि कपाले गृह्यमाणे घटसमवायग्रहणात्। सकलधूमनिष्ठसामान्यस्यापि स्मरणाद्याः
एकस्मिन्नेव पक्षधर्मे धूमे तत्तल्लिंगपरामर्शादिनास्वीकाराच्च। ननु बाष्पे धूमभ्रमानंतरं धूमत्वेन व्याप्तिग्रहे कथं धूमत्वस्य
प्रत्यासत्तित्वं। पुरोवर्तिनि तस्यासत्त्वात्। न च तत्र तस्य न प्रत्यासत्तित्वं। तथा सत्यन्यत्रागृहीतव्याप्तिकस्ततो वह्न्यगृहीतव्याप्तेः पर्वते धूम
दर्शनादनुमितिर्न स्यादिति चेन्न। वैज्ञानिकेन संबंधेन पुरोवर्तिनि तस्यापि सत्त्वादिति॥ ॥ननु समानविषयत्वेनापीति॥
अत्र वदंति। इदं रजतमिति ज्ञानस्य समानविषयत्वेनापि रजतान्तरज्ञानजनकत्वं। ननु समानप्रकारकत्वमात्रेण त
यासति रजतत्वेन समानं न नीयेत तन्नियामकाभावाद्रजतेपि ततः सा स्यात्॥ ननु स्वप्रकाराधिकरण एव ज्ञानस्येच्छाजनक

प्रका।२

चिं॰ अ॰ त्वमतोनियमइतिचेत्। नातथासतिरजतत्वप्रकारकज्ञानाङ्कुरशुक्तौरजतत्वप्रकारिकाइच्छानस्यानस्यात्। किंतुरजतएवस्यात्। नचतत्र
३१ परस्येष्टापत्तिः। शुक्तौरजतार्थिप्रवृत्त्यनुरोधेनतेनापितदंगीकारात्। ननुसमानविषयत्वेनापितस्यकारणत्वेपरस्यमते
तत्रशुक्तौसानस्यात्। तन्मतेरजतत्वप्रकारकज्ञानस्यशुक्तिविषयकत्वादितिचेन्नहिभ्रमोन्यथाख्यातिरूपएवान्यगत्यास्वीक
31 रणीयइत्यभीष्टमेवास्माकं। यदिचेदंत्वेनज्ञाततायामेवशुक्तौउपस्थितरजतभेदाग्रहादेवस्यात्तत्राभवतीतिपरेणनान्यथाख्या
तिःस्वीकरणीयातदापिज्ञातएवविषयेइष्टभेदाग्रहादिच्छेतितेनाप्युपपत्तं। अन्यथातिप्रसंगात्। तथाचभाविनिज्ञात
एवेच्छाभवतीतितज्ज्ञानार्थंसामान्यप्रत्यासत्तिस्तेनाकामेनापिस्वीकरणीया। वस्तुतस्तुलाघवेनेष्टाभेदग्रहस्यैवेच्छाजनक
त्वमित्यन्यथाख्यातिसाधनावसरएवोक्तप्रायं। तस्मादत्रापिज्ञानस्यसमानविषयत्वेनेच्छाजनकत्वादनागतसुखज्ञानार्थ
मवन्यपसामान्यप्रत्यासत्तिःस्वीकरणीयेति। तन्न। अस्तुतावत्समानविषयत्वेनज्ञानस्येच्छाजनकत्वं। तथाप्यनागतसुखज्ञा
नस्यानुमानेनाप्युपस्थितेस्तदर्थंसामान्यप्रत्यासत्तेःकल्पयितुमशक्यत्वात्। उक्तरीत्यैवोपपत्तौबहुतरकल्पनानवकाशात्।
नचलिंगादिप्रतिसंधानंविनापितद्दर्शनादिदमयुक्तमितिवाच्यं। असिद्धेः। सिद्धौवाअन्यकालोत्पन्नज्ञानागतगोचरानुभि ३१
तिजनितसंस्कारजन्यस्मृत्यैवोपपत्तेरितिदिक्॥ ॥इसाध्यत्वाभिमतेति॥ ॥०॥ साध्यत्वसाधनत्वेव्यापकत्वव्याप्यत्वेन

नसोपाधौवह्नौनसत्वात्अव्याप्तिः।अभिमतपदंध्येयं।ननुव्यापकत्वंव्याप्तिनिरूपकत्वं।तथाचव्याप्तेरगृहीतायामुपाधिप्रत्ययस्तत्प्रत्ययेचतत्
दभावरूपानौपाधिकत्वप्रत्ययाधीनव्याप्तिप्रत्ययइत्यन्योन्याश्रयइत्यतआह।अनौपाधिकत्वैतीति।यद्यपिभिन्नभिन्नव्याप्तिसत्वा
न्नान्योन्याश्रयस्तथाप्यनवस्थायांनानुपर्यमित्याकूतः।अप्युपगमवादेनाह।यद्वेति।नचसाधनत्वस्यव्याप्तिघटितत्वेपुनःसएवदोषइ
तिवाच्यं।विशिष्यतत्तद्रूपेणैवसाधनत्वादिनिर्वचनात्।तद्रूपस्याननुगतत्वेनाननुगमस्यादोषत्वात्।एवंचाभिमतपदंनदेयमि
तिध्येयं।तद्वदिति।प्रतियोगिसमानाधिकरणात्यन्ताभावविशेषणं।तेनसंयोगस्यद्रव्यत्वव्यापकत्वंस्यादितिध्येयं।ननुप्रति
योगित्वंविरोधित्वंतच्चमहानसवृत्तिनियमइतिपुनरन्योन्याश्रयइत्यतआह।प्रतियोगित्वेति।प्रकृतव्यापकत्वनिरूपा सा०प०६
विदंप्रतियोगित्वमभिमतंननुतल्लक्षणमिदं।गोत्वाश्वत्वयोराकाशघटात्यन्ताभावयोश्चव्याप्तिप्रसंगात्।अन्योन्याभावप्रतियो
गित्वस्यसत्त्वाच्च।एवंवह्न्यादिसाधनसमानाधिकरणाकाशात्यन्ताभावाधिकरणमहानसाद्यधिकरणावृत्तितयासाधनाव्यापकत्वाभावा
द्दाइ धूमवत्वादिकमप्युपाधिर्नस्यात्।इतिरूपणासमन्वयदूषणान्तरमाह।साधनेति।साधनपक्षधर्मावच्छिन्नोक्तमेणोदाहरति।मित्रेति।
तनूजस्यश्यामत्वस्येति।उद्भूतपदंप्रत्यक्षपरंसमव्याप्तोपाध्यभिप्रायेण।पक्षा।साधनव्यापकत्वशंकापरिहारार्थंनेदितिध्येयं।पक्षेतरस्यो
पाधित्वंमन्वानोपिपरोनैयायिकसिद्धान्तानुसारेणोत्कलक्षणमितिव्याप्तिंददाति।पक्षेतरस्योपाधाविति।बाधानुन्नीतपक्षेतरइत्यर्थः।पक्षमित

चिं॰ ग्र॰ रयतीति ब्रुवन्नपर्वतेतरत्वादिपरं पक्षेतरपदं पक्षातिरिक्तेसाध्यव्यापकताभिप्रायेणेदं वोध्यं। अनित्यासिद्धेरिति। तच्चमनइति शेषः। ननु व्यतिरे
केऽर्थविशेषणत्वशून्यत्वे सतीत्युक्तलक्षणविशेषणीयं अतो नातिप्रसंग इत्यत आह नचेति। नस उपाधिरिति। सनोक्तलक्षणाक्रांतइ
३२ त्यर्थः। तन्मात्रैकत्वादिति। तथा चोक्तलक्षणसत्वाद्वाव्यतृतीयपक्षेतरेति व्याप्तिसत्वदवस्थैवेति भावः। वस्तुगत्येति। दाधात्रीनस्तु
नसाध्यव्यापकइतिनतत्रातिव्याप्तिरिति भावः। पक्षातिरिक्तइति। तथा चोक्तलक्षणे साध्यव्यापकपदं पक्षातिरिक्तसाध्यव्यापकप
32 रमेव वाक्यं तथा चातिव्याप्तिसत्वदवस्थैवेति भावः। विपक्षेति। निर्विशेषणोगोत्वादावुपाधावव्याप्तिवारणाय निवेशइत्यानभावः। प्र
मेयत्वादेरिति। तस्य केवलान्वयित्वेनाव्यावर्तकत्वादिति भावः। परस्मिन्दृष्टान्तानुसारेण परोक्तस्योपाधित्वलक्षणस्य पक्षेतरेति
व्याप्तिरत्वासंभवस्त्वनुमानद्वेषी चार्वाकस्तस्योपाधित्वमुपपादयति। तथापिचेति। विपक्षाव्यावर्तकविशेषणशून्यत्वाभावेपी
त्यर्थः। तत्वेति। पर्वतेतरत्वादावित्यर्थः। नच्छाद्यत्येति। अत्रेदं चिन्त्यं। पक्षेतरत्वादेः पक्षनिष्ठसाध्यव्यापकत्वाभावात्सेत्पक्षातिरिक्त
साध्यव्यापकत्वसंभवाभिप्रेतं। एवं चलक्षणस्य पक्षेपक्षातिरिक्तसाध्यव्यापकत्वेपि पक्षनिष्ठसाध्याव्यापकत्वेः। कथं व्यभि ३२
चारः। साध्यतावच्छेदकावच्छिन्नप्रतियोगिकात्यन्ताभावसामानाधिकरण्यस्य व्यभिचारत्वादिति। विशेषणमिति। विपक्षाव्या
वर्तकविशेषणशून्यत्वरूपमित्यर्थः। दूषणेति। यद्यप्युपाधिनाव्यभिचारोन्नयनेपि पक्षेतरत्वस्योपाधित्वसंभवेन नास्य दूषण

समर्थत्वं तथाप्याननतएउक्तं प्रकारान्तरमिति। तद्व्यत्वे सतीत्यादिविशेषणमित्यर्थः। उपाधित्वाभावेपीति। उपाधित्वाभावाभ्युपगमेपीत्यर्थः। एवं च दूषण
समर्थत्वेनोपाधित्वमेव स्वीक्रियतां किं नद्या द्यसमर्थप्रकारान्तरानुसरणेनेत्यर्थः। पक्षेतरे दूषकताबीजमेव नास्ति तथा च तद्द्या द्यसमर्थप्रकारान्तरानुस
रणमुचितमेवेत्याशयेन शंकते। अथेति। नन्विति। व्याप्तिविरहोन्नायकतयावेत्यपि द्रष्टव्यं। साध्यव्याप्यत्वमिति। साध्यव्यभिचारित्वे त्वपि द्र
ष्टव्यं। एवं हीति। पक्षवृत्तित्वेप्युपाधिर्न स्यादित्यपि दूषणं द्रष्टव्यं। इष्टापत्तिमाशंक्य दूषणांतरमाह। किं चैवमिति। यद्यपि वाधोन्नीतपक्षेतरेनासाधा
रणं। बाधेन व्यतिरेके पक्षस्यैव सपक्षस्यैव सपक्षत्वेन तद्धाप्तत्वाभावात्। तथापि पक्षमात्रवृत्तिरसाधारणः इति मताभिप्रायेणेदं बोध्यं। अथे
ष्टापत्तिं तरस्कः शंकते। नन्विति। नोपाधिनियमः। न पक्षमात्रवृत्तिव्यतिरेकप्रतियोग्युपाधिनियमः। अतज्जत्वादेरिति। तद्व्यतिरेकस्य नप
क्षमात्रवृत्तित्वः। प्रवृत्तिः। प्रदीपादावपि वृत्तेरिति भावः। अतेजस्त्वविनेति। पर्युष्यत्रापि वह्नीतरत्वादिकमुपाधिर्भवत्येव उपाधेर्नित्यदोषत्वात्। नच व
ह्नीतरत्वव्यतिरेकस्य पक्षभागासिद्धतया सत्प्रतिपक्षानुत्थापकत्वान्नोपाधित्वं। अतेजस्त्वसमनियतस्याप्यनेकस्योपाधित्वसंभवात्। तथा
पि पक्षमात्रवृत्तिव्यतिरेकप्रतियोग्युपाधिं विनान्यस्योपाधेरसंभवादित्यर्थः। एतदपि शुद्धसाध्यव्यापकोपाधिमभिप्रेत्य। अन्यथा तेजोघ
टान्यतरत्वावच्छिन्नसाध्यव्यापकघटत्वाद्युपाधिसंभवादसंगतिरेव स्यादिति ध्येयं॥ ननु सपक्षाद्यवृत्तत्वमेवासाधारण्यं न तु पक्षमा
त्रवृत्तित्वं केवलव्यतिरेकि विलयापत्तेः तथा च वाधोन्नीतस्थले कासाधारण्यमित्यपरितोषादाह। अपिचेति। ह्रदेति। पर्वतो यत्र ह्रदसंयोगी
तच्चेदं बोध्यं। असाधारण्याभावादिति। पर्वतानवयवरूपादौ सपक्षेष्वेवेरिति भावः। व्यतिरेकिणीति। पर्वतेतरत्वव्यतिरेकेणापि व्यतिरेकव्या

चिं॰ अ॰ त्रिपुरस्कारेणासत्प्रतिपक्षत्वसंभवादित्यर्थः। तस्यापीति। असाधारणस्यापीत्यर्थः। तथा च सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवदत्रासाधारण्ये न दोषः। सा
३३ तमव्यवधानेन पक्षपतीतिस्थायादेके नापि वहुमं इति वेधात्वेतिभावः। नन्वेवमुपाधेर्दूषकतैव न स्याद्व्यभिचारोन्नायकतापक्षस्य प्रयोगे दूषितत्वा
सत्प्रतिपक्षोत्थापनस्य तत्रैव दूषितत्वादित्याशंक्योपसंहरति। तस्मादिति। उभयोः। साध्योपाध्योः साध्यसाधनयोश्चेत्यर्थः। तच्चेति। तथा च
तद्वारणार्थं विशेषणोपादानमनर्थकमिति भावः। पक्षेतरमात्रस्योपाधित्वे तेनासाधकतानुमानेऽपि स एव दोषः स्यादित्यभिप्रायेणास्य
स्योपाधित्वं परिहरन् पुनरतिव्याप्तिदोषमालम्बते। भवन्त्विति। आचार्यलक्षणं दूषयितुमाह। नापीति। पर्वतेतरत्वादिकेन समव्याप्
मिति नातिव्याप्तिरिति भावः। विषमेति। तथा च तत्राव्याप्तिरिति भावः। अत्र साधनाश्रयवह्निव्याप्तसाध्यव्यापकोपाध्यव्याप्तिरपि बोध्या। स
मव्याप्तस्यैवोपाधित्वमित्यत्रोपपादकान्तरमाशंकते। अथेति। अभवतोऽविद्यमानस्य। भवतः। विद्यमानस्य। अन्यथा। विषम
व्याप्तस्योपाधित्वे। पक्षेतरस्यापीति। बाधोन्नीतपक्षेतरस्यापीत्यर्थः। तत्र यद्यपि साध्यव्यापकतापि नास्ति पक्षस्य व्यभिचारात्तथापि
पक्षातिरिक्तसाध्यव्यापकताभिप्रायेण बोध्यम्। एवं सति पर्वतेतरत्वस्य वह्निसामव्याप्त्यादेरुपाधित्वं स्यादेव पक्षातिरिक्ते साध्यसमव्यापकता
दिति दूषणे सत्येव दूषणान्तरमाह। दूषणेति। पुनस्तदेव शंकते। नन्विति। स्वव्याप्तिधर्मोपसंक्रामकत्वरूपोपाधिपदप्रवृत्तिनिमित्तानु ३३
धानात्साध्यव्याप्यत्वं व्यभिचारोन्नयनार्थं च साध्यव्यापकत्वमित्यर्थः। तत्समव्याप्तस्यैवोपाधित्वमित्यर्थः। ननु विषमव्याप्तस्याप्यन्यत्र वि

र्मविरुद्धादौ दोषवशादारोप्यत एवेति कथं न तस्य लक्ष्यता। ननु व्याप्तिरूपधर्मसंक्रामकत्वं तत्र प्रवृत्तिनिमित्तमिति गाचं दृष्टं तेजःपाकुसु
मादावभावादिति दूषणे तोऽसत्त्वेवदूषणान्तरमाह। तन्किमिति। त्वभावादाविति। तद्भेदेन विषमव्याप्तेष्पाधिपरप्रयोगे विरोधाभावादिति
भावः। ननु लोकव्यवहारानुमेयः संकेतः। न चलाभादावित्यत्रापि लोकव्यवहार इत्यत आह। किं चेति। लौकिकव्यवहाराभावेऽपि प
रीक्षकव्यवहारादत्रोपाधिपदवाच्यत्वमिति भावः। समव्याप्तस्यैवोपाधित्वमुपपादयितुं कस्यचिन्मतमाह। अन्ये त्विति। यस्य साध्य
व्यापकस्य साधनाव्यापकतया अभावः साधनव्यापकत्वमिति यावत्। तदपि प्रसंजितं बोध्यं। अन्यासंभवात्। उपाधेः साधनाव्याप
कत्वात् एवं च यदीयेन प्रसंजितेन साधनाव्यापकत्वेन हेतुसाध्ययोर्व्यभिचारमापादयितुं शक्यते स साधनाव्यापकस्तत्र हेतावुपाधि
रित्यर्थः। तादृशश्च समव्याप्त एव। तस्य साध्यव्याप्यत्वात्। नन्वेवं धूमो विनाशी जन्यत्वादित्यत्र विषमव्याप्तेर्भावत्वोपाधावतिव्याप्तिः।
जन्यत्वं यदि भावत्वव्याप्यं स्यात् तदा विनाशित्वं व्यभिचारि न स्यात् इत्यापादनसंभवात्। जन्यभावत्वस्यैव नाश्यतावच्छेदकत्वादिति चेन्न। वि
पक्षाव्याप्यत्वं सर्वत्र साधने तस्य व्यभिचाराभावमापादयितुं तस्य विवक्षितत्वात्। भावत्वव्याप्यत्वं च प्रमेयत्वादौ प्रसंजितं न
तमापादयति प्रमेयत्वस्य भावत्वव्याप्यत्वेऽपि विनाशित्वव्यभिचारे विरोधाभावादिति। तस्याभावेऽपीति। विषयव्याप्तस्य साधन
व्यापकत्वेऽपीत्यर्थः। व्यतिरेक इति। साधनव्यापकत्वे इत्यर्थः। ननु सर्वत्र समव्याप्तस्याभावाद् व्यभिचारे चावश्यमुपाधिरित्यभिप्र
तदा प+तथा तद्व्याप्यत्वे हेतोः साध्यव्यभिचाराज्ञानं नियमात् व्याप्यव्याप्यस्य सुतरां व्याप्य+प

वि॰ अ॰ मित्सत आह। व्यभिचार इति। वस्तुतः साध्यसमनियतस्य अनेकं तथा भवतीति ध्येयं। एवमपि वस्तुतः साध्यव्यापकत्वस्योपाधौ व्यर्थत्वात्सम
व्याप्तस्यैवोपाधित्वमिति भ्रममेवेत्याह। नवापीति। न चेष्टापत्तिरित्याह। न चेति। तथा चेति। साध्यव्याप्यत्वनिश्चयस्य व्याप्तिज्ञानाधी
३४ नतानोपाधिकत्वज्ञानाधीनत्वादिति भावः। एतज्ज्ञानोपाधिकत्वज्ञानं व्याप्तिधीकारणमिति मतमालंब्योक्तमिति ध्येयं। तत्किं सा
ध्यव्यापकव्याप्यत्वमेव। नोपाधिकत्वं तथा च न तज्ज्ञाप्तिलक्षणं स्यादुक्तगुणत्वाद्यतिव्याप्तेरित्यत आह। अनोपाधिकत्वे चेति। त
था च यावत्साध्यव्यापकव्याप्यत्वेन ज्ञानाति व्याप्तमिति भावः। तदेवेति। तथा च विषमव्याप्तस्यापि तथात्वाद्दूषणान्तरमिति भावः।
ननु यद्व्यतिरेक इति। ननु समव्याप्तव्यतिरेके व्यभिचाराभावनियमेप्यनुमितिनियमो नास्ति जलह्रदो वह्निमान् धूमादित्या
दौ तादृशोपाधेरभावेपि स्वरूपासिद्ध्याद्यनुमित्यभावादिति चेन्न। पक्षसत्त्वे सति बाधप्रतिरोधाभावे सति यद्व्यतिरेके लिंगस्य
समीचीनत्वनियमस्तद्वद्दूषणमित्यर्थात्॥ विरुद्धत्वादेरिति। आदिपदाद्व्यभिचारादिपरिग्रहः। अन्यतरव्यतिरेकसत्त्वेप्यन्यतरस
त्त्वे लिंगस्यासमीचीनत्वनियमादित्यर्थः। यद्यपि यद्व्यतिरेके भवत्येव व्यभिचाराभाव इत्यर्थे त्वे यथाश्रुतेनैवोपपत्तिः। युक्तं च त
था। व्यभिचारविरोधित्वेन न पूर्वपक्षे तथैवोक्तत्वेन तस्यैव निराकर्तुमुचितत्वात्। तथापि कुसुमांजलिप्रकाशानुरोधेनैवं ३४
व्याख्यातं। तत्रापि परस्परकंठरवेणाभिधानात्। साधनावच्छिन्नेति। प्रागभावो विनाशीजन्यत्वादित्यादौ भावत्वाद्युपाधावव्यापना

नु

रित्यर्थः। अन्ये तु नात्र लक्षणमात्रनिर्वचनं प्रकृतं किं तु येन रूपेणोपाधिर्ज्ञातो हेतुदोषस्तेन रूपेण तस्य निर्वचनं। न चोक्तेनैव रूपेण ज्ञातः स
तथा। तत्त्वेनाज्ञातस्यापि साधनावच्छिन्नसाध्यव्यापकत्वेन ज्ञायमानस्य भावत्वादेस्तत्रोपाधित्वे न दोषत्वादिति भावः इत्याहुः। यद्वेति अभि
धेय इति। एतच्च पक्षातिरिक्तसाध्यव्यापकत्वमादाय द्रष्टव्यं। आर्द्रेन्धनवत्त्वादेरिति। यद्यपि इन्धनादेरेव तत्रावच्छेदकत्वं संभवति अ
न्यथासिद्धत्वेनोपगतेस्तथापि तेन रूपेणाज्ञातस्य शुद्धसाध्यव्यापकत्वेनैवज्ञातस्य तस्य दोषत्वादिति भावः। तथा च येन रूपेण ज्ञातस्य दो
षत्वं तन्निर्वचनं यदीदं तदेदं लक्षणमिष्टव्यं। यद्वा। अवच्छेदकस्य साध्यव्याप्यतावच्छेदकत्वमभिप्रेत्यैतदुक्तं। तथा चार्द्रेन्धनव्याप्यता
वच्छेदकं धूमत्वमेव न त्वन्यद्गौरवादिति भावः। पक्षधर्मेति। वायुः प्रत्यक्षः वायुत्वात् इत्यत्र मेयत्वादेरुद्भूतरूपवत्त्वाद्युपाधावव्या
रि पनादित्यर्थः। जलमिति। इदमपि पक्षातिरिक्तसाध्यव्यापकतामादायैव। परमार्थतस्तत्र व्याप्तिरेव दूषणं ज्ञेयं। न तु व्यभिचारि
त्वादित्यस्याभावगर्भतया स्वरूपाभावेन वैयर्थ्यमन्यथा साध्यव्यापकव्यभिचारित्वा। रित्वादित्यत्रापि साध्यव्यभिचारित्वस्यै
व व्याप्यतया उपाधिना असाधकत्वानुमानं तस्मादित्याशयेनाह। किं चेति। परम्परया तत्रोपयोगान्नार्थान्तरमिति शंकते। अथे
ति। अप्रामाण्यकालत्वादिति। तदानीं विशिष्टव्यभिचारस्यानाकांक्षितस्याभिधानादिति भावः। तत्रासिद्धाविति। शुद्धसाध्यव्यभि
चारलिंगीभूतविशिष्टसाध्यव्यभिचारसिद्ध्यर्थमुपाधिरुद्भाव्यत इत्यर्थः। नहीति। साक्षादेव शुद्धसाध्यव्यभिचारोन्नायकस्योपाधि

चिं० अ० नदूषणात्वेनाभ्युपगमादिति भावः। ननु साक्षात्संयुक्तवित्यनुशयेनाह। किं चेति। नोपाधिरिति। तस्य साध्यव्यभिचारव्यधिकरणतया तद्व्या
प्यत्वेन तत्साधनायोपन्यासानर्हत्वादिति भावः। रत्नकोशकारमतमाशंकते। स्यादेतदिति। पक्षधर्मतावलम्बमिति। तथा च बाधा
३५ उन्नीतपक्षेतरेऽपि नातिव्याप्तिरिति भावः। क्लृप्तकल्पमिति। यद्यप्यत्र व्याप्तिमत्त्वे व्यभिचारव्याप्तोपाधेरनुपपत्तिः। न च पक्षधर्मताव
३६ लम्बानित्यत्वव्यभिचारस्य प्रमेयत्वे सत्त्वान्नोक्तदोष इति वाच्यं। एवं हि तादृशवह्निव्यभिचारितया धूमस्यापि सोपाधित्वापत्तेः
तथापि सत्प्रतिपक्षोत्थविरोधमात्रस्य तंत्रत्वेन पर्यवसितानित्यत्वरूपसाध्याभावसाधनद्वारा तदुद्भावनस्य मतये वोपाधित्वमि
र्ये ष्टे तन्मतेनायमर्थः। न च क्लृप्तकल्पस्य पक्षवृत्तितया तद्व्यतिरेकस्य स्वरूपासिद्धत्वेन सत्प्रतिपक्षोद्भावकत्वमपि कथमस्तीति
वाच्यं॥ शब्दो नित्य इत्यादावादिना उपाधिः। तन्मते शब्दस्य क्लृप्तकल्पादिति भावः। अत एव क्लृप्तकल्पसाधनमाशंक्य नह्ययमिति चेति। दूष
कत्वेति। सत्प्रतिपक्षोद्भावकत्वादित्यर्थः। तथा च व्यभिचारोन्नायकतापक्षे एवोपाधेर्व्यभिचारव्याप्यत्वं न त्वन्यथापीति भावः। ननु प
र्वतो वह्निमानित्यादौ पाषाणवत्वादिकमुपाधिः स्यात्। तस्यापि पक्षधर्मतावलम्बपर्वतीयवह्निव्यापकत्वात्साधनाव्या
पकत्वाच्च। न च दृष्टान्ते प्रमेयत्ववद्व्यभिचरितस्यापि सोपाधित्वाविरोधादिति वाच्यं। पक्षस्य वृत्तित्वे नास्य सत्प्रतिपक्षोद्भा ३५
वनेऽप्यसमर्थत्वात्। धूमे वह्निव्यभिचाराभावेन तदुन्नयनस्याप्यसम्भवात्। तथा च तज्जातिव्याप्तिर्वह्निलेपायितैवेति दूषणोऽस्तन्येव

दूषणांतरमाह। एवं हीति। असमवेतत्वपर्यवसानवारणायाह। सावयवत्व इति। जन्येति। अत्र परमाणुसिद्धिदशायां मनसोऽणुत्वासिद्धि
दशायां च गगनादौ व्यभिचारवारणाय जन्यपदं। अखंडाभावे वा न वैयर्थ्यमिति ध्येयं। व्यभिचारवारकस्यापि व्याप्तिग्रहोपयोगित्वा
देव न वैयर्थ्यमित्यन्ये। जन्यमहत्त्वमहत्त्वावांतरजातिविशेष एवेति नैव वैयर्थ्यमित्यपरे। निस्पर्शेति। अत्र द्वयपदं समव्याप्तोपाध्यभिप्राये
ण बोध्यं। ननु पक्ष एव साध्याव्यापकत्वात् पर्यवसितसाध्यव्यापकत्वं नास्त्येवेति नातिव्याप्तिरित्यपरितोषादाह। किं चेति॥ ॥कर्तव्यो
पाधिलक्षणस्य प्रथमं संध्याद्यमाह। यद्व्यभिचारित्वेनेति। यद्व्यभिचारित्वेन लिंगेन साधनस्य साध्यव्यभिचारित्वं प्रमीयते स ध
र्म उपाधिरित्यर्थः। न चाकाशादिसाध्यके घटादेरुपाधितापत्तिः घटव्यभिचारित्वेनाकाशव्यभिचारित्वप्रमासंभवादिति वाच्यं।
वा घटव्यभिचारित्वं हि घटात्यंताभावसामानाधिकरण्यं। एवं च साधिकरणत्वमात्रस्यैव गमकत्वे घटवैयर्थ्यात्। यस्य साध्यसमानाधि
करणस्येति व्यभिचारित्वेनेति वा विवक्षितत्वात्। साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाधिव्यभिचारित्वेन यथा साध्यव्यभि
चारानुमितिस्तथाग्रे स्फुटं। पक्षधर्मेति। ननु पक्षधर्मतावच्छेदकत्वं। न तथा च न पूर्वोक्तदोष इति भावः। ननु साध्यप्रसिद्ध्यवच्छेदकधर्म
स्य यावत्त्वं पक्षीकिंचित्त्वं वा। नाद्यः। वायुः प्रत्यक्षः स्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वस्यानुपाधित्वापातात्। तस्य साध्यप्रसि
द्ध्यवच्छेदकप्रमेयत्वावच्छिन्नप्रत्यक्षत्वाव्यापकत्वात्। नांत्यः। धूमेऽपि महानसत्वावच्छेदेन प्रसिद्धवह्निव्यापकत्वेन वह्न्यादेरुपा

चिं॰ अ॰ विताप्रत्रेरितिचेन्न। अत्र केचित्। यत्किंचिद्धर्मस्य वैशिष्ट्ये सिद्धः किंतु साधनव्यापकीभूतः। विशेषणाव्यभिचारित्वात् इत्यग्रिमग्रन्थपर्यालोचन
यातथैवलाभात्। अंजनवत्त्वं च न श्यामव्यापकीभूतधर्मावच्छिन्नवह्निव्यापकीभूतमितिनोक्तदोषः। न चैवं प्रमेयत्वेन वा यावद्बहिरिंद्रि
यग्रत्यक्षत्वेसाध्ये द्रव्यत्वावच्छिन्नबहिरिंद्रियग्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वं कोकिलादिसाधारणेन मित्रापुत्रत्वेन मित्रातनयेश्यामत्व
३६ साधने मित्रातनयत्वावच्छिन्नश्यामत्वव्यापके शाकपाकजत्वे नोपाधिः स्यात्। न चतयोः शुद्धसाध्याव्यभिचारानुन्नायकत्वेना
उ नुपाधित्वमिष्टमेवेति वाच्यं। प्रमेयत्वं बहिरिंद्रियप्रत्यक्षत्वव्यभिचारि द्रव्यत्वे उद्भूतरूपवत्त्वव्यभिचारित्वा द्व्यणुकत्ववत्। मित्रापुत्रत्वं
36 श्यामत्वव्यभिचारि। मित्रातनयेनरेण शाकपाकजत्वव्यभिचारित्वात् घटत्ववदित्येवं तयोरपि शुद्धसाध्यव्यभिचारोन्नायकत्वा
दितिचेन्न। उक्तरीत्या तयोस्तत्र व्यभिचारोन्नायकत्वेपि अनुपाधित्वे प्यनुपाधित्वस्येष्टत्वात्। अविशेषितेनैव पक्षव्यभिचा
रित्वेन लिंगेनविशिष्टसाध्यव्यभिचारसाधमानेहेतोः पक्षधर्मतावलात् केवलसाध्यव्यभिचारः सिध्यतीतीदृशस्यैव शुद्धसा
ध्यव्यभिचारोन्नायकस्योपाधित्वव्यवहारात्। सच साधनव्यापकधर्मावच्छिन्नसाध्यव्यापकएवभवति। न चैवं तत्र व्यभिचारोपि
न स्यात्। तस्योपाधिव्याप्यत्वादितिवाच्यं। न हि तत्रोपाधिरेव नास्तीति ब्रूमः। किं त्वनयोरनुपाधित्वं। प्रत्यक्षसामग्र्यादेः साध ३६
नव्यापकधर्मावच्छिन्नसाध्यव्यापकस्य तत्रोपाधेः सत्वादित्याहुः। तन्न। शुद्धसाध्यव्यभिचारोन्नयनस्य दूषकतावीजस्यानु

त्वेतयोरनुपाधित्वस्य व्यञ्जकमशक्यत्वात्। निरुक्तलक्षणतावच्छेदकेन तयोः संग्रहाद्वा स्वयं लक्षणाकरणसामर्थ्येनैव व्यावर्त्तनायत्त
त्वविशेषणान्तरप्रक्षेपस्यानुचितत्वात्। अन्यथा शुद्धसाध्यव्यापकमात्रसंग्राहकलक्षणतावच्छेदकमभिधाय साध्यव्यापकत्वे स
ति साधनाव्यापकमित्युपाधिलक्षणं सुकरमेव स्यात्। यदि च तत्स्फुरणे पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधिस्फुरणे व्य
भिचारोन्नयनेनानुमितिप्रतिबन्धान्न स्यादुपाधित्वात् तल्लक्षणाव्याप्तिरिति मन्यसे तदा साधनव्यापकैः पक्षधर्मावच्छिन्नसाध्य
व्यापकसाध्यव्यापकयत्त्वसामग्र्या ह्युपाधेः स्फुरणे उक्तरीत्या व्यभिचारोन्नायकयोस्तयोः स्फुरणेऽप्यनुमितिप्रतिबन्धा
त्तयोरप्युपाधित्वे एतल्लक्षणाव्याप्तेर्वज्रलेपायमानत्वात्। विशेषणाव्यभिचरितत्वादिकं तूपरक्तताभिप्रायकं। अन्यत्तु
प्रकारान्तरेणापि शुद्धसाध्यव्यभिचारोन्नयनमिति ध्येयं। यत्तु यद्धर्मावच्छेदेनेत्यत्र साधनवतीति शेषः। तेन यद्धर्मावच्छेदेन सा
धनवति साध्यं प्रसिद्धं तदवच्छिन्नसाध्यं पर्यवसितं तत्त्वेनाभिमतमिति। तन्नुच्छं। वायुः प्रत्यक्षः वायुत्वादित्यत्रोद्भूतरूपवत्त्वाद्युप
पाध्यव्याप्तेः। उक्तलक्षणतावच्छेदकसंगृहीतत्वाद्व्यभिचारोन्नयनसमर्थत्वेन तदनुपाधित्वस्य वक्तुमशक्यत्वात्। न चैवमुक्तरी
त्या व्यभिचारोन्नायकत्वेन संग्राह्यत्वं। संग्राहकं च यद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति तद्धर्मावच्छिन्नसाधनाव्यापकत्वं। यत्र साध
नाव्यापकत्वं न तु हि धर्मावच्छिन्नसाध्यव्यापकत्वं। स्वानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वा

विं॰अ॰ लक्षणमस्तु। अथैवं गंधप्रागभाववच्छिन्नो घटो गंधवानित्यादौ तद्गंधप्रागभावकालीनत्वावच्छिन्नसाध्यव्यापकं तद्गंधप्रागभावका
लीनत्वावच्छिन्नपृथिवीत्ववति पक्षे साधनाव्यापकमेतत्कालीनत्वोत्कर्षवत्त्वमुपाधिः स्यात्। न चैष्टापत्तिः। अपसिद्धांतादिति चेन्न
३७ न। यद्धर्मवति साध्यव्यापकत्वं तद्धर्मवति साधनाव्यापकत्वमित्यर्थात्। उक्तोपाधिश्च न तथा। तद्धर्मवति पक्षे साध्याव्यापकत्वात्।
न चैवं सश्यामो मित्रापुत्रपुष्टत्वादित्यत्र नरत्वावच्छिन्नश्यामत्वव्यापकं मित्रापुष्टहंसादौ साधनाव्यापकं शाकपाकजत्वमु
37 पाधिर्न स्यात्। नरत्ववति साध्यव्यापकस्य तद्वति साधनाव्यापकत्वाभावात्। मित्रापुष्टस्य नरस्य सर्वस्यैव शाकपाकजत्वादिति वा
च्यं॥ नरहंसान्यतरत्वमादाय तत्राप्युक्तलक्षणसत्त्वात्। अत्र नव्याः प्रत्यक्षः प्रमेयत्वादित्यादौ रूपत्वावच्छिन्नसाध्यव्यापक
उद्भूतत्वमुपाधिः संग्राह्य एवेति न तत्रातिव्याप्तिः। प्रमेयत्वं प्रत्यक्षत्वव्यभिचारि रूपोद्भूतत्वव्यभिचारित्वाद्गुणत्ववदित्यादि
क्रमेण तस्यापि शुद्धसाध्यव्यभिचारोन्नायकत्वसंभवात्। न च स्वीकृतत्रिविधोपाधिबहिर्भावाउपाधित्वस्वीकारे अपसिद्धांतः।
तस्योपलक्षणत्वात्। पक्षधर्मावच्छिन्नसाध्यव्यापक एव प्रवेशाद्वा। पक्षधर्मपदेन साधनसमानाधिकरणधर्मस्यैव विवक्षित
त्वादिति॥ ॥अत्र वदंति॥ ॥घटः पृथिवीद्रव्यत्वादित्यत्र घटान्यत्वावच्छिन्नपृथिवीत्वव्यापकं पटत्वमेव साधनाव्यापकं घटान्य ३७
निर्गुणवत्त्वादिकमुपाधिः। तत्र चोक्तानि लक्षणान्यव्याप्तानि। घटान्यत्ववति साध्यव्यापकस्य तस्य तद्वति साधनाव्यापकत्वाभावात्।

यत्र कुत्राव्यावृत्तिर्न तु घटधर्मोऽन्यत्वे सति घटावृत्तिगुणत्वव्यभिचारित्वादिति हेतुः ४। अत्र गुणत्वादिकं दृष्टांतः॥ ६

पक्षे साधनाव्यापकस्य तद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वाभावात्। स्वानधिकरणीभूतसाधनाधिकरणीभूतपक्षधर्मावच्छिन्नसाध्यव्या-
पकत्वाभावाद्वा। न च शुद्धसाध्यव्यभिचारानुन्नायकत्वेनायमनुपाधिरेवेति वाच्यो द्रव्यत्वं पृथिवीत्वव्यभिचारि द्रव्यत्वपटत्वप्रमेयत्वानी-
तिष्ठतीति विशेष्यत्वे सति घटावृत्तिगुणवत्त्वव्यभिचारित्वात्प्रमेयत्ववदित्यादिक्रमेण तत्संभवात्। अत्र च स्वरूपासिद्धिवारणाय द्र-
व्यत्वेति। न च व्यभिचारावारकत्वेन वैयर्थ्यमिति वाच्यं। त्रितयगोचरप्रतीतिविशेषविशेष्यत्वे वैयर्थ्यशंकानवकाशात्। वैयर्थ्यविशेष्य-
त्ववारणाय पटत्वेति। एवं च पटत्व एव व्यभिचारवारणाय विशेष्यमिति मंतव्यं। व्याप्तिग्रहस्थानार्थमाह। प्रमेयत्वेति। घटत्वे व्यभि-
चारणाय सत्यंतं। न च यद्व्यभिचारस्मारकेणासाधनस्य साध्यव्यभिचारानुमितिः स एव संग्राह्यः। अस्य च विशेषणांतरप्रक्षेपेण तथा-
त्वमिति वाच्यं। एवं वायुप्रत्यक्षादौ साध्ये प्रमेयत्वादौ साधने उद्भूतरूपवत्त्वादिकमुपाधिर्नेति किं तत्संग्रहार्थमुक्तलक्षणानुस-
रणप्रयासेनेति स्वासामर्थ्येनैतच्छ्रावर्तनाय लक्षणतावच्छेदकविशेषणोपादानमनुचितमेवेति। वयं तु ब्रूमः। यथोक्तरीत्या व्यभिचा-
रोन्नायकस्योपाधित्वे न संग्राह्यत्वं तत्पर्यवसितसाध्यव्यापकत्वे सति साध्यसमानाधिकरणत्वे सति वा साध्यव्यभिचारिसा-
धनाव्यापकत्वमुपाधिलक्षणं वाच्यं। अत्र निरधिकरणसाध्ये तिरुद्धे च सर्वथोपाधिरहितव्यवहाररहितेति व्याप्तिवारणाय
सत्यंतं। व्यंजनवत्त्वादेर्धूमादिहेतावुपाधित्वप्रसंगवारणाय साध्यव्यभिचारीति। ननु एवमुपाधिज्ञानकाल एव साधने साध्यव्या-

प्र॰ यद्धर्मसाध्यव्यापकताश्रयस्थलानिरिक्ते साधनसमानाधिकरणो यो धर्मस्तदवच्छिन्नसाध्यव्याप
५४क त्वे सति साधनाव्यापकत्वमुपाधित्वं॥ ५

वि॰व्या॰ भिचारभानेन नियमाद्धेतुन्नयनद्वाराऽस्य दूषकत्वं न स्यादिति चेत्तन्न्यांतोसिानत्वेनैव रूपेणाज्ञानस्य व्यभिचारोन्नायकत्वं। किंतु शु
द्धसाध्यव्यापकत्वपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिना। इदं तु संग्राहकमात्रं। यथा साधारणादिनां विपक्षवृत्तित्वादिने दूषकत्वे संग्रा
३८ हकमात्रमुभयकोटिव्यापककत्वादि। इदं च सर्वैरेवास्युपेयं। अन्यथापर्यवसितत्वाद्यस्फुरणे शुद्धसाध्याव्यापकत्वस्फुरणेपि
व्यभिचारोन्नायकत्वं न स्यात्। न चानुमितिप्रतिबंधकज्ञानविषयतावच्छेदकमुपाधित्वमिह निरूप्यमिति स्वग्रिमग्रंथविरोध इति
वाच्यं। तस्य यथाश्रुताभिप्रायेण साधनाव्यापकत्वाभिप्रायेण वास्तवसमाधेयत्वात्। नन्वेवं पर्वतत्वरूपपक्षधर्मावच्छिन्नवह्निव्याप
३८ कत्वेन धूमाव्यापकत्वेन ज्ञातस्य पाषाणवत्वादेः शुद्धसाध्यव्यभिचारानुमापकत्वं स्यात्। अन्यथा तेन रूपेणाज्ञातस्याभूत
रूपवत्वादेरपि न त्वस्यादविशेषादिति चेन्न। धूमे वह्निव्यभिचारस्य बाधितत्वेन तत एव तदनुमित्यसंभवात्। बाधानवतारद
शायां लिंगादिप्रतिसंधानकाले तत्र भ्रमात्मानुमितेरिष्टत्वादिति दिक्। न च पक्षव्यभिचारीत्यादिना निरुक्तस्यैव सकलसंग्राहक
त्वे संभवति किमनेनेति वाच्यं। तस्य लक्षणतावच्छेदकत्वेनोपयोगात्। अस्य च लक्षणत्वात्। अत एव लौकिकप्रत्यक्षलक्षणादि ३८
केयं यथाश्रुतान्त्यतावच्छेदकमभिधाय वोक्तं। इतरभेदानुमाने एकस्य पक्षतावच्छेदकत्वेनोपयोगादिति निष्कर्षः। क्वचित्सा
धनमिति। ध्वंसो विनाशीजन्यत्वादित्यादौ भावत्वाद्युपाधावित्यर्थः। क्वचिदव्यभिचारीति। वायुर्बहिरिंद्रियग्राह्यः प्रमेयत्वादि

त्वादौ रूपवत्त्वाद्युपाधीवित्यर्थः। कश्चिन्महानसव्यभिचारीति। अयं धूमवान् वह्निमत्त्वादित्यादौ व्यंजनवत्त्वाद्युपाधावित्यर्थः। सर्वविधस्योपाधेरुक्त

स्वरूपमुपपादयति। तथाहीति। अत एवेति। नहि विशिष्टव्यभिचारसाधनानंतरं विशेषणव्यभिचारसाधनं येनार्थांतरं स्यात् किंतु न त्वसिद्धि

रेव पक्षधर्मताबलाद्विशेषणव्यभिचारमादाय। यदा लिंगानं विनापक्षे साध्यप्रतीत्यपर्यवसाने तदेव पक्षधर्मताबलात्सिध्यतीति भावः॥

एतदेव दर्शयति। अन्यथेति। एतच्च प्रकृताभिप्रायं। अन्यथोक्तप्रकारांतरेणापि शुद्धसाध्यव्यभिचारोन्नयनेपि नार्थांतरमिति ध्येयं।

ननु विशेषणाभावविशिष्टाभावयोर्भेदेन विशेषणव्यभिचारविशिष्टव्यभिचारयोरपि भेदात्पक्षधर्मताबलादपि विशिष्टव्यभिचार एव सिद्ध्ये

त्। अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमादित्याशयेनाह। पक्षेति। साध्ये हेतौ च प्रत्यक्षपरं वह्निरिंद्रियप्रत्यक्षपरं। तत्रैव प क ५

र्वतो द्रव्यभिचाराद्य हसत्यंतो। द्रव्यत्वमभिचारिव्यापकं यस्येत्यर्थः नतु षष्ठीतत्पुरुषः। तथा सति तत्त्वंतमात्रस्यैव व्याप्यत्वेपि वैय

र्थ्यापत्तेः। दृष्टांतासिद्धिस्वरूपासिध्योरापत्तेश्च। तत्र घटवारोव्यभिचाराद्याह। द्रव्येत्यादि। अत्र यद्यपि प्रत्यक्षत्वव्यापकव्यभिचारित्वादि

त्यस्यैव गमकत्वे द्रव्यपदस्य हि न सत्यं न वैयर्थ्यं। तथापि व्यभिचारस्याभावगर्भतया द्रव्यत्वघटितप्रतियोगिकाखंडाभावगर्भे हे

तौ न वैयर्थ्यमिति भावः। वस्तुतस्तु द्रव्यप्रत्यक्षत्वव्यापकपदं उद्भूतरूपवत्वाद्युपाधिपरं। अतो नोक्तदोषः। नचैवमस्योपाधित्वेनास्या

व्यभिचारानुमापकत्वं न निर्वहेन्नचदाहितन्निर्वहति यदि पर्यवसितसाध्यव्यापकत्वज्ञानं व्यभिचारानुमानप्रयोजकं भवतीति वाच्यं।

निं॰ अ॰ विपक्षबाधकत्वेन व्याप्तिग्रहोपयोगिनया तत्प्रयोजकत्वसंभवात्। यद्यपि प्रमेयत्वादिहेतौ प्रत्यक्षत्वव्यभिचारित्वानुमाने निरुक्तद्वयसत्त्वा
३९ व्यभिचारित्वं स्वरूपासिद्धं तथापि द्वयोरूपत्वव्यभिचारित्वादिना वानुमानेन तत्र। न ह्येकेनैव रूपेण सर्वत्र व्यभिचारानुमानमिति नि
यम इति भावः। उक्तप्रकारं साधनावच्छिन्नसाध्यव्यापकोपाधिस्थलेप्यभिति दिशति। तथा मित्रेति। हेत्वर्थः पूर्ववत्। न वा घटत्वदृष्टान्ते
39 साधनवैकल्यं। यत्र मित्रातनयत्वं कुतोप्यप्रमाद्याकपादितः शाकपाकजत्वाभावो वा ततस्तस्यैवाकचघटस्य घटभिन्नस्य यो धर्मस्तस्यैव
दृष्टान्तत्वात्। तत्रोपाध्यभावान्वयात्। नोसंदिग्धोपाधितापत्तेः। [illegible]ऋ इति वत् घट इति कस्यचिन्मित्रातनयस्य संज्ञाभेदः न तु ज्ञाति धर्म एवाघ
टत्वमित्यप्याहुः। अन्ये तु यत्किंचित् तदधिकरणव्यक्तिवृत्ति श्यामत्वाभावप्रतियोगित्वमेवाव्यभिचारित्वं प्रकृते विवक्षितं तत्र यद्यपित
त्सामानाधिकरण्यमात्रपर्यवसन्नं व्यभिचारिसाधारणं तथापि सतीति पदमहिम्ना विशिष्टवैशिष्ट्यलाभात्तदधिकरणावच्छेदेन
मित्रातनयत्वसामानाधिकरण्यरूपं तद्व्यभिचारविशिष्टता तदधिकरणावच्छेदेन शाकपाकजत्वे वैशिष्ट्यं हेत्वर्थोभिमतः तेन न
व्यभिचारिसाधारण्यं। इदं च रूपमश्यामपत्तिकं चिन्मित्रातनयव्यक्तिवृत्तित्वाद्यरातन्न वण्यस्येवेति। व्यभिचार × न तत्र साधनवैकल्य
मित्याहुः। एवं साक्षात्कृतसाध्यव्यभिचारोन्नायकस्योपाधित्वमंगीकृत्य विशिष्टसाध्यव्यापकस्यापि साक्षादेव तथात्वं दर्शितं। संप्रति ३९
साक्षाद्विशिष्टसाध्यव्यभिचारानुमानद्वारा वा तदुन्नायकस्य दोषत्वे विशेषाभावात् कथंचिद्व्यभिचारोन्नायक एवोपाधिरित्यभिप्रे

स्यादाहायदेति। साधनं व्यभिचारि यस्य। साधनाव्यापक इत्यर्थः। साध्याव्यभिचारोन्नायकः। स्वव्यभिचारित्वेनेति शेषः। तेन साध्यव्यभिचा
रोन्नायकः प्रयोजकत्वादेनं व्यभिचारः। अभ्युपेत्याह। किं वेति। अर्थान्तरस्येत्युपलक्षणं। अप्राप्तकालत्वस्यैत्यपि द्रष्टव्यं। तत्राभावादि
ति। तत्रास्फुरणादित्यर्थः। तत्रेति। पक्ष इत्यर्थः। विशिष्टव्यापकत्वादिति। साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यस्य पक्ष एव व्यापकत्वा
दित्यर्थः। तत्रेति। यद्यप्यनुकूलतर्केयि यत्र कस्मिन्ने न व्याप्तिग्राहकस्तथापि तदभावे निवर्तकाभावेन व्यभिचारसंशयात् साध्यव्या
पकत्वनिश्चय इति भावः। पक्षमात्रेति। यद्येप्येतत्सदुपाधावपि क्वचित्तथाप्यनुकूलतर्काभावादेव साध्यव्यापकत्वानिश्चयादिति
भावः। अत्र यद्यपि पर्वतपदं पर्वतावयववृत्तिरूपादेरपि व्यावर्तकतया पुरुषस्योपाधेरुपाधितायां तत्तेन तस्य न प्रयोजकत्वे किं तु तस्य
पक्षमात्रव्यावर्तकत्वमात्रमेवेति तथात्वेनैवोक्तोपाधेः साधनाव्यापकतानिर्वाहादित्यभिप्रेत्य तयोः कमेव चोपाधिना प्रयोजकीकृ
तपक्षमात्रव्यावर्तकेति प्रयोजकविशेषणावत्त्वादिति प्रकृतग्रंथार्थी द्रष्टव्य इत्याकूतः। त्रिषु यथासंख्यं तर्कमाह। तदुत्कर्षेत्यादि। चतु
र्थे तर्कमाह। घटेति। प्रतियोगिध्वंसप्रागभावानवच्छिन्नसमयस्य प्रतियोगिकालत्वनियमादित्यर्थ इति भावः। घटे [illegible] नम इष्टेव
[illegible] केतो। तत्किमिति। रसादेरपि रूपाद्यव्याप्यतापत्तिरिति भावः। नेति। सर्वजकार्यकारणभावस्यापजीवनमात्रस्य [illegible] कतिपयत्वात्क
त्विमरं परयेतिभाव [illegible] पाकुः। पक्षेतरस्येति। स्वव्याघातकत्वलक्षणप्रतिकूलतर्केण तस्य साध्याव्यापकत्वनिर्णयादिति भावः। यद्यपि विरो

वि० अ०
३ ४०
५०

ाद्दर्शनरूपायाश्चोपाधिसंशयेन व्यभिचारसंशयाधायकत्वं तस्यापि तथापि वस्तुतउपाधिनाऽभावेन संदिग्धोपाधित्वं तस्य नास्तीति भावः।
साध्यव्यापकत्वापन्नमिति। साध्यव्यापकता को हि मित्यर्थः। एवं चोक्तरीत्या साध्याव्यापकतानिर्णय एव वा यस्तेन न तत्संशयाधायकत्वमि
ति भावः। उभयमिति। अनुकूलतर्काभावरूपोपाधिश्चेत्युभयं। उपाधेरिति। आत्मनः साध्याव्यापकतानिर्णयार्थमित्यर्थः। अनुकूलतर्कसत्त्वे
हि हेतोः साध्यव्याप्यतयोपाधेस्तद्व्यापकतया साध्याव्यापकत्वनिश्चयादिति भावः। सोपाधाविति। साधारण इति शेषः। विरुद्ध
साध्यसाधनसंबंधाभावे प्रत्युपाधिस्वीकारादिति ध्येयं। विनिगमनाभावादिति। उपाध्यभावे निरुपाधित्वभंगप्रसंग एवानुकू
लतर्कः स्यादित्यनुकूलतर्काभावस्यापि स्वरूपत्वाभावार्थमुपाध्युपजीवकत्वं। एवं चोभयोरपि परस्परापेक्षितया स्थले। मस्त्वावि
शेषाद्विनिगमनाविरह इति भावः। अन्यत्त्विति। क्वचित्साधनवति यत्र स्वालिंगनयस्य साधनस्य साध्यव्याप्तिरनुमातुः शक्य
ते तस्मिन्साधने सदुपाधिरित्यर्थः। स चेति। एतच्च पक्षवृत्तित्वमुपाधिमभिप्रेत्योक्तं। तदन्यस्थले चान्यत्रैव क्वचित्साधनवति स्वव्यभि
कात्साध्याभावत्साधने व्यभिचारज्ञानद्वारैव तस्य दूषणत्वमिति भावः। साध्यसाधनसंबंधाभावोऽपि तत्रास्तीति कृत्वा तदुक्तं वस्तुतः
साध्याभावमात्रे तात्पर्यात्। तावतैव दूषणत्वसंभवात्। अत एव यद्धूमवत्साध्यं व्यावर्तते तदुक्तं। अत एव चाह। व्यावर्तते च तत्राद्र ४०
र्द्रेन्धनवत्त्वमिति। तत्रेति। अयोगोलक इत्यर्थः। यत एव तत्साध्यं व्यावर्तते। अत एव साधनसंबंधोऽपीत्यर्थः। यत्तत्र साधनावच्छिन्नसाध्यवत्ता।

पकत्वे सति साधनाव्यापक उपाधिरिति तात्पर्यगत्यात् लक्ष्याप्तिमिति। तन्न। तस्य पूर्वपक्ष एव दूषितत्वात्। विरुद्धोपाध्यसंग्रहापत्तेश्च एतेन साध्यसा
धनसंबंधव्यापकत्वे सति साधनाव्यापकत्वमित्यनेनोक्तमिति निरस्तं। विरुद्धे साध्यसाधनसंबंधाभावेन तदुपाध्यसंग्रहात्। स्वव्याघातक
त्वेनेति। तेनापि स्वव्यतिरेकद्वारा साध्याभावसाधने पक्षे तस्योपाधित्वप्रसंगेनेत्यर्थः। कस्यचिन्मतं दूषयितुमुपन्यस्यति। यत्तिति।
केवलान्वयिनः साधनव्यापकत्वेन व्यभिचारोन्नयनादिद्वारा दूषकत्वाभावादुपाधित्वमसंभववीति तन्निरुह्य सार्थव्यतिरेकी सुक्तं। यपा
द्येति। वह्निधूमसंबंधोपाधित्वाप्रसिद्धेरित्यर्थः। वह्निधूमसंबंध इति। नह्यत्र वह्निधूमसंबंधोपाधित्वमापाद्यं किंतु वह्निधूमसंबंधे पर्वते तदौ
पाधिकत्वं। एतच्च पर्वते तद्बाधितसाध्यके पर्वते तद्वृत्तिहेतौ प्रसिद्धमिति भावः। धूमाव्यापकत्वेन निश्चिते पक्षेतरत्वे वह्निव्यापकत्वमापा
द्यमित्यत्र तात्पर्यमित्यन्ये। सत्प्रतिपक्षोत्थापकत्व बाधोत्थापकत्वेनापि दूषकत्वे विशेषाभावात् साध्यव्यापकत्वे सति पक्षाद्यवृत्तित्वे
नैवोपाधित्वे प्रयोजकमिति भयेनान्यं तन्मतमुपन्यस्यति। केचिन्निति। अत्रेदमनभिमतिबीजं। सोपाधाववश्यं व्यभिचार इत्यादि
नोपाधेर्व्यभिचारव्याप्यत्वस्य सर्वसिद्धत्वात् व्यभिचारित्वेन तदसंभवः। न च तत्र व्यभिचारोन्नयनवदत्रापि बाधोन्नयनस्य दूषकता
बीजस्य सत्वादुपाधित्वं स्यादेवेति वाच्यं। एवं सत्यनुमितिविरोध्युपस्थापकमात्रस्यैवोपाधित्वे प्रयोजकत्वादेवमुपाधिना पक्षे। तदौ
पाधिव्यवहाराभावापत्तेरिति यदि तदा व्यभिचारि एव हेतौ साधनाव्यापकोपाधित्वव्यवहारस्यापि नततामिति तुल्यं। यत्रेति। हेतोः

चिं·अ· पक्षवृत्तित्वेन व्यापकीभूतस्योपाधेरपि पक्षवृत्तिनियमात् व्यतिरेकस्य स्वरूपासिद्धत्वे बाधाद्यनुद्भावकत्वादिति भावः। ननु साध्यरूप उपाधावुक्तलक्ष-
४२ णमव्यापकं स्वस्य स्वाव्यावर्तकत्वादित्यत आह॥ साध्यं चेति। तथा च व्यभिचारोन्नयनपक्षे साध्याविशिष्टत्वाद्यथास्य न संग्राह्यत्वं तथा तत एवाव्या-
पीति भावः। यद्यप्ययं साध्यव्यभिचारी साध्यव्यापकव्यभिचारित्वादित्यत्रोपाधिभेदान्न साध्याविशिष्टं तथापि साध्यवद्धेतोरपि संदिग्धत्वे न सा-
ध्याविशिष्टं। वस्तुतः साध्यव्यापकत्वज्ञानस्य विपक्षबाधकत्वेन व्यभिचारानुमानप्रयोजकत्वादुपाधिव्यभिचारित्वमेव तत्र हेतुरित्युक्तं। ए-
वं च साध्याविशिष्टमिति भावः। अनुमिनोतीति। अत्रेदं चिन्त्यं। सिद्धे तौ साध्यस्य साधनाव्यापकत्वाभावादेवानुपाधित्वमिति कथमनुमानमात्रोच्छे-
दः। न चानन्तरोक्तसाधनव्यापकोपाधिवादिमतदूषणमिति वाच्यं। तन्मतेपि यत्र पक्षमात्रव्यावृत्तिर्हेतुस्तत्रैव तस्य तथात्वेन पक्षवृत्तिहेतौ साध्यस्यानुपा-
धित्वेनानुमानमात्रोच्छेदासंभवादिति॥ ॥प्रसंगादाह। स चेति। कश्चित्सोपाधिरस्ति न वेत्याकारको न संदिग्धोपाधिः सन्न स्पष्टं क्वापि स्थावी-
केनाप्रतिबंधकत्वादित्यत एवाह॥ यत्रेति। अर्थान्तरमित्यापाततः। परमार्थतस्तु भयसाधनेपि प्रत्येकमुपाधिर्दूषणं स्यादेवेति दूषणा-
मत्र इष्टव्यं॥ नन्वीयं संदिग्धोपाधिमुदाहरति। यथा शाकेति॥ इदं तु साध्यव्यापकताग्राहकवैद्यकशास्त्रानवतारदशायां बोध्यं॥
संदिग्धेति। दूषणत्वमात्रे दृष्टान्तोयं॥ यद्यपि प्रथमेन संदिग्धोपाधिना साध्याभाववति साधनसंदेहो नाधेयः किंतु साधनवत्येव पक्षेप ४२
क्षसमे वा स्वव्याप्तिसंदेहेन साध्याभावसंदेहः। स च व्यभिचारसंदेहतया न दोषः। अनुमानमात्रोच्छेदापत्तेः। तथापि न उक्तदर्कं तैपा स्वर

मि १

सवाहितस्तस्याप्रतिबंधकत्वेप्यन्याहितस्यतस्यापिप्रतिबंधकत्वमेवाफलबलात्।। अतएववह्नित्यादिकं द्विकर्तृकमित्यादावप्रयोजकत्वाहित
त्वादेशोपिप्रतिबंधकएवेतिभावः। यद्वा। उपाध्यादिसंदेहेनहेतौवत्कारकोटिकोव्यभिचारसंदेहआधीयतइतिफलबलात्तस्यप्रतिबंधक
त्वं। यद्यप्युपाधिसंदेहःस्वरूपसत्त्वेनप्रतिबंधकोनज्ञातइतिपरंप्रतितदुद्भावनंनज्ञापकत्वंतु तदुक्तादृक्तमित्यपिकिंचित्करं तथापिसंदेह
ज्ञापनमुखेनपराभिमतव्याप्तेःसाधकमानाभावप्रदर्शनपरं तदितिपरस्यतत्रसाधकमानाभावमापादयितुंसंशयमात्रेदयतीतिभ
योजनमित्याशयः। तुल्यमेवेति। ज्ञातमितिशेषः। इष्टापत्तिमाशंक्यदूषणांतरमाहसंदिग्धोपाधेरिति। तद्व्यतिरेकस्येति। एतच्चपक्षेसा
ध्यनाव्यापकत्वासंदेहेनयःसंदिग्धोपाधिस्तदभिप्रायेणोक्तं। ननुतद्व्यतिरेकेनासाधारण्यं। बाधस्थलीयासपक्षीभूतेपक्षएवहेतोः
नचयत्रपक्षेऽस्यसाध्याभावनिश्चयाभावस्तत्रैवव्याप्यादिनापक्षेतरस्योपाधित्वनिश्चयस्तदभिप्रायेणेदमितिवाच्यं।। तत्रापिव्यति
रेकेणसत्प्रतिपक्षसंभवात्। नचासाधारण्य।। तस्यापिसत्प्रतिपक्षोद्भापकतयादोषत्वादित्यपरितोषादाह। पक्षेतरत्वेति। पक्षे
तरेतिज्ञानदशायामुपाधेर्दोषत्वंनस्यादितिभावः। स्वतइति। यद्यप्युपाधिज्ञानस्यस्वतःप्रतिबंधकत्वंनाशंकितंकिंतुकिंत्वनोपाधिक
त्वज्ञानविघटकत्वं तथाप्यनौपाधिकत्वज्ञानमेवनव्याप्तिधीकारणमित्युक्तमितिभावः। तर्हिव्यभिचारज्ञानद्वारेवास्यदूषणत्वम
स्त्वित्याशंक्याह। नापीति। तस्मादिति। यद्यपिज्ञायमानतयाप्रतिबंधकत्वाभावादेनाभासत्वशंकानास्त्येवतथाप्युपाधिदोषत्ववादिना

चिं॰ अ॰ केनापिरूपेणास्यदोषत्वेवरूपवक्ष्यमाणव्यभिचारानुमित्यसाधारणदोषत्वमेवहेत्वाभासत्वंवाच्यमितिभावः। व्यभिचारोन्नायकत्वेनास्यदूषणत्वमि-
४२ त्यभिसंधाय पूर्वोक्तदोषंनिरस्यन्नाह। आर्द्रेधनेति। वीजचिंतनमिति। निश्चितोपाधिदूषकताभिप्रायेणेदं। तस्मादुपाधेर्निश्चयादिति।
उपाधेर्निश्चयादौ चित्पावज्र्जितोमानसोव्यभिचारनिश्चयः। यथेः व्याप्तिविरहेति। तदुन्नायकतयेत्यर्थः। यद्यपीदंदूषकतावीजमा-
काशादव्याप्त्या व्याप्यतद्वृत्त्येकगुणवत्त्वाव्याप्यत्वादिति न्यायेन गुणवत्त्वादावप्यस्ति। न च तस्योपाधित्वमेव। तद्व्यतावच्छेदकासंग्रही-
तत्वात्। आकाशावृत्तिविशिष्टान्यताभावप्रतियोगित्वरूपसाधनाव्यापकत्वाभावेन लक्षणासंगृहीतत्वात्। तथापि दूषकतावीजा-
तिप्रसंगस्यादोषत्वमेव। अत एवाप्रयोजककालादेरपि व्यभिचाराद्युन्नायकत्वे दोषत्वे वास्य व्यभिचारित्वेन व्याप्तिविरहोन्नायकत्वं तदु-
न्नमिति भावः। यदुपाधिर्नास्य व्यभिचारित्वमनुमेयमेवेत्याह यद्वेति। एतच्च यत्र व्यभिचारोपाधिकरणसंनिक-
र्षाभावादयोग्यस्तत्र बोध्यं। अन्यथोपाधिव्यभिचारित्वरूपविशेषदर्शनजन्यव्यभिचारप्रत्यक्षमेव विवक्षितं। कदाचिद्दर्शनजन्यपुरु-
षप्रत्यक्षवत्। समानविषये प्रत्यक्षसामग्र्या बलवत्त्वात्। न च यत्रापि व्यभिचारानुमितिस्तत्रापि तज्ज्ञानकपरामर्शस्यैव व्याप्तिधीप्रतिबंध-
कत्वे स भवति न तस्याः प्रतिबंधकत्वमिति वाच्यं। प्रत्यक्षेणाव्याप्तिग्रहे विरोधिव्याप्यदर्शनस्य प्रतिबंधकत्वात्। अनुमाने न च तज्ज्ञहेतुस- ४२
त्त्वप्रतिपत्तितया तत्प्रतिबंधकत्वस्येष्टत्वात्। न च ग्राह्याभावानुमितेरपि प्रत्यक्षप्रतिबंधकत्वमिति वाच्यं। प्रत्यक्षसामान्ये तदभावे पि ग्राहि-
हे

सत्पक्षत्वं प्रत्यसाधारण्येनानुमित्यादिसाधारण्येऽपि व्यभिचारज्ञानसामान्यस्यैव प्रतिबंधकत्वकल्पनात् । कथमन्यथा सत्प्रतिपक्षान्तराप्रतिबंधकत्वमपि
ग्राह्याभावसंदेहात्मनो व्यभिचारसंदेहस्यापि व्याप्तिधीप्रतिबंधकत्वमिति भावः । व्याप्तिविरहाद्यनुमानद्वये उपाधिमात्रं कथं निराकरोतीति न
चेति । साधनेति । वह्निर्धूमव्यभिचारी आर्द्रेंधनव्यभिचारित्वादित्यादौ वह्न्यभाववद्वृत्तित्वादिकमुपाधिरित्यर्थः । यद्यप्येतत्र योगोलकत्वादौ
साध्याव्यापकमपि तत्रापि व्यभिचारास्फुरणदशायामेवोपाध्युपन्यासेन तदीनिरुपाधित्वभ्रमाहितव्यभिचारानुमितिप्रतिबंधः स्यादि
ति भावः । उपाधीति । तथा च तदुच्छेदापत्तिलक्षणप्रतिकूलतर्केण तस्य साध्यव्यापकत्वनिर्णयान्नोक्तदोष इति भावः । ननु नोपाधिमात्रो
च्छेदः । प्रमेयत्वादौ व्यभिचारित्वासाधने तदभाववद्वृत्तित्वस्योपाधेरसंभवात्साधनाभावाप्रतीत्युच्छेदइत्यनुशयेनाह । अथ हेतीति । अ
त्र व्यभिचारास्फुरणदशायामपि साध्यव्यापकत्वसुग्रहस्यैवेति भावः । एतच्च व्याप्तिविरहानुमानाभिप्रायेणोक्तमिति ध्येयं । इति
यदि तद्व्यभिचारस्योपाधेर्नासंभवेन तत्साध्यके साध्याव्यापकत्वाभावात् । यत्तूभयकोटिरूपस्थापकतावच्छेदकरूपवत्त्वलक्षणो व्यभि
चारोऽत्र बोध्यः । स च सपक्षविपक्षव्यावृत्तत्वमात्ररूपसाधारणासाधारण्यस्यैवेति । तन्न । अनुमितिप्रतिबंधकार्थं हि व्यभिचारानुमानं । न च तस्य
ज्ञानमनुमितिप्रतिबंधकं । अविरोधिविषयत्वात् । किंतु विपक्षगामित्वज्ञानमेवेत्येतेति । ननु हेतुमत्त्वपक्षधर्मावच्छिन्नस्य साध्यव्याप
कत्वान्नोक्तदोष इत्यपरितोषादाह । संयोगादाविति । संयोगविशेषादावित्यर्थः । तथा च संयोगविशेषादौ गुणः प्रत्यक्षत्वात् संयोगविशेषः

चिं॰ अ॰ पक्षज्ञानव्यभिचारीति व्यापकव्यभिचारीत्यादित्यनुमाने संयोगविशेषाभावस्य हृदित्वं तद्व्यापकव्यभिचारित्वादिरूपसाधनव्यापकत्वादौ
पाधिरित्यर्थः॥ ॥उपाधिवदवभाससमानानामुपाधित्वज्ञानाधीनज्ञानत्वादाह। अथेति। व्यभिचारानुन्नयनदशायां सत्प्रतिपक्षोद्भावप्रे
४३ नुमितिप्रतिबंधानुकूलापनद्वारा स्वरूपकत्वमेव दूषितत्वं नियममपक्षइत्यभिप्रेत्याप्राप्ताधेः सत्प्रतिपक्षोद्भावकताप्रसमालंव्येवतदाभासा
43 नाह। असाधारणेति। केवलान्वयिनि सपक्षस्य केवलव्यतिरेकिणि विपक्षस्य व्यतिरेकेऽसंभवादसाधारणापासंभवइत्यत आह। अन्व
यव्यतिरेकिणीति। पूर्णावावर्तकेति। पक्षाव्यापकविपर्ययइत्यर्थः। पूर्वसाधनतायाइति। अत्र च पूर्वसाधनव्यतिरेकत्वं नोपाधित्वेप्र
योजकमिति तात्पर्यं॥ साध्यव्यापकतामाह केसतितादृशस्यापि अज्ञेयत्वादेरूपाधित्वस्वीकारादिति। नत्विति। समीचीनव्याप्ति
ज्ञोच्छेदः इति तीयस्यप्रपति पक्षस्य सोपाधित्वनियमइति यावत्। ननु सत्प्रतिपक्षेहेत्वाभासोच्छेद इत्यर्थः। सत्यपि तस्योपाधित्वे तदप्रति
संधानेदशाविशेषेण दूषकत्वसंभावात्। किंच। यथा श्रुतेयत्रोपाधेः साध्यव्यापकत्वं तत्रैव वस्तु व्यापनायां व्यभिचारे साध्याव्यापक
त्वाग्रहेणोपाधिनानदूहे व्यभिचारेणोभयथाविशेषादर्शनासंभवेसत्प्रतिपक्षासंभवादितिमयथविरोधः। तथा च यथोक्तमेवम ४३
नोरमं। आभाससत्वमिति। व्यभिचारेणेति शेषः। तत एवेति। आभासता प्रयोजकव्यभिचारादित्यर्थः। नित्यत्वादिरिति। यद्यपि नि
त्यत्वसदुपाधिरेव। न च प्रागभावे साध्याव्यापकत्वात् न तथा। भावत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात्। तथापि तत्वं नो

पाधितात्प्रयोजकं वस्तुमवस्थानुपपत्तेरेव। किंतु साध्यव्यापकताग्राहकानुकूलतर्कादिसत्त्वं तत्सत्त्वे चाभासत्वमिति पक्षतातात्पर्यं। सा
ध्यव्यापकताग्राहकाभावादुपाध्याभासत्वमुक्त्वा साधनाव्यापकताग्राहकाभावान्नदाभासानाह। एवमिति॥ ॥ अवसरसंगत्याह। व्या
प्ती ति॥ व्याप्तिनिरूपणानंतरमित्यर्थः। पक्षत्वे निरूपिते तद्धर्मत्वं च निरूप्यमिति तन्निरूपयति। तत्रेति। संदिग्धेति। केवलान्वयिन्यपि संदेह
स्याप्रयोजकत्वादिति भावः। अव्यावर्तकेति॥ अतीतस्यानुपलक्षणत्वेनात्रेदृशसंशयविषयत्वात्साध्यस्यासिद्धसाधनेपि पक्षतास्या
त्यर्थः। व्यासज्यवृत्तिप्रतियोगिकाभावाभिप्रायेणाह। उभयेति। केवलान्वयिनि बाधकाप्रसिद्धेरित्यपि द्रष्टव्यं। नन्वेवमस्त्वित्यत आह
नापीति। ननु शब्दातिरिक्तत्वं साधके विशेषणमत आह। प्रत्यक्षेति। सजातीयत्वं तत्र विशेषणमात्यं क्वाह। एकेति॥ संदेहवदिति।
न चेश्वरसिसाधयिषामादाय तथापि तत्सत्त्वमस्त्येवेति वाच्यं। व्यधिकरणसिसाधयिषामादाय सिद्धसाधनेपि पक्षतापत्त्या सिद्धिसमा
नाधिकरणसिसाधयिषाया एव विवक्षणीयत्वात्॥ न चैतद्वारणाय स्वजनकज्ञानमेव विवक्षितं तत्र चेश्वरसिसाधयिषासाधारणमिति
वाच्यं॥ तदपि हि न सिसाधयिषात्वेन ग्राह्यमिति प्रसंगात्। किंतु सिद्धिसमानाधिकरणसिसाधयिषात्वेनैव। एवं चावश्यकत्वात्प्रथमो
पस्थितत्वाच्च तदेवास्तु। किं चैवं सिद्धसाधनोच्छेदः। भगवदिच्छायास्तत्रापि सत्त्वात्। न चैतत्र तत्सत्त्वेपि न तस्याः सिसाधयिषात्वं। तत्सिद्धि
सामग्रीसाहित्यमेव हि सिसृक्षादिवत्तस्यास्तथात्वमिति वाच्यं। एवं हि तत्र तत्सामग्र्यभावे सिसाधयिषाविरहस्तदभावे तत्सामग्रीविरह

चिं॰ अ॰ त्पन्नो न्याश्रयान्तराधेयोत्पन्नायाइति तदवच्छेदकरूपापरिचयादिति भावः॥ ॥सिसाधयिषाविरहसहकृतेति॥ अत्र साधकमानपदं सिद्धिपरं तेन
तादृशसिद्ध्यभावः पक्षता। नचैवं संशयोत्तरप्रत्यक्षस्थलेपि पक्षतासत्वेनुमित्यापत्तिः। समानविषये सिसाधयिषाविरहसहकृतप्रत्यक्षसा
४८ मग्र्या अपि तत्प्रतिबन्धकत्वेन ततएव तत्रानुत्पत्तेरित्यभिहितमनुमितिलक्षणव्याख्यानावसरे तत्रैवानुसंधेयं॥ ननु संदेहावत्परा
५५ मर्शे एवं सिसाधयिषाया अप्यभावादिति किमर्थमेवोक्तं त्वान्नदा तत्प्रयुक्ता कथं पक्षता। उपलक्षणापक्षस्य तद्देवातिप्रसक्तत्वादिति चेन्न॥
अत्र वदंति। परामर्शोत्पादानंतरं स्वकारणादनुमित्सा तदुत्तरक्षण एव पुनः स्मरणात्तृतीयक्षणे परामर्शस्ततश्चतुर्थक्षण एवानुमितिरिति वि
नश्यदवस्थानुमित्साप्रयुक्ता पक्षता तत्र तदानीं निर्विघ्नैव। यद्वा। प्रथमं तत्रानुमितीष्टसाधनतायाः प्रकृतत्वात् स्यादेष्यसमूहालंब
नस्य समेकमेव स्मरणं ततस्तृतीयक्षणेनुमित्सा तदुत्तरक्षण एव विनश्यदवस्थायां प्राग्वत् स्मरणात् सा विद्यमानस्य परामर्शस्तदुत्तरक्ष
ण एव चानुमितिरित्यतोपि सा तदा तत्र सुलभेति। यदा तु कदाचित्स्मरणादिरूपपरामर्शानंतरमनुमित्सोत्पद्यते ततो विनश्यदवस्थप
रामर्शादनुमितिस्तदा विनश्यदवस्थाया अनुमित्सायाः पूर्वं सत्वादनुमित्यनंतरं तदनुमित्यात्मकपरामर्शोत्पन्नरनुमित्यंतरमा
भूदतः स्वविषयानुपहितसिसाधयिषासिसाधयिषापदेन विवक्षितेति द्रष्टव्यं। अन्ये तु द्वित्रिक्षणानंतरितायामपि सिसाधयि
षायामनुमितेरनुत्पत्तेर्मानत्वात्सिसाधयिषापदेन स्वोत्पन्नंतरकालीनस्वविषयसिद्ध्यनुत्पादकालत्व एवात्र विवक्षितः। न चैवम ४८

ग्रूसिसाधयिषायां व्यासंगादिना सिद्ध्यनुत्पादे मासाधनंतरं संशयेन पक्षीकृतेपि विषये पक्षतासत्वे नानुमित्यापत्तिरिति वाच्यं । सिद्ध्यनंतु गुणानां तरि
तत्वेनाप्यनुत्पादकालस्य विशेषणत्वाद्यज्ञानात् । लिंगदर्शनव्याप्त्यादिस्मरणादिव्यवहितद्वित्रिक्षणानंतरितायां सिसाधयिषायामेतदस्तीतिनिश्च
यानुमितिः । मासाध्यनेतरं च नानुमितिः । तत्र सिसाधयिषायावद्भिरुदासीनैरंतरितत्वोरित्याहुः । अत्रेदं चिंत्यं । एवं यत्रानुमित्सानंतरं सिद्ध्यनंतु
गुणविषयांतरसंचारस्तद्व्यवहितोत्तरक्षण एव स्मरणात्तत्क्षणः परामर्शस्तत्रानुमितिर्न स्यात् । न चेष्टापत्तिः परामर्शपूर्वसमये विनश्यद
वस्थानुमित्सासत्वेनैकक्षणानंतरितायां तस्यामनुमित्यनुत्पादो लिंगपरामर्शादिना द्वित्रिक्षणांतरितायां तस्यामनुमित्युत्पादश्च । तत्रमो
नाभावात्तस्याभावापरीभूते नवचनस्याभयत्रापितुल्यत्वात् । तस्माद्यदि व्यवहितायामपि सिसाधयिषायामनुमित्युत्पादोभ्युपेयते तत्
दायावत्क्षणानंतरमनुमित्यभावप्रभयसिद्धस्यावक्षणानंतरितत्वेनानुमित्युत्पादकालो विशेषणीयः इति वक्तुं युक्तमुत्तरेषामतः नैव
वमनुमित्यनंतरं प्रत्यक्षीकृतेपि विषये तदग्रिमक्षणे तत्र परामर्शेनानुमितिजननापत्तिः । तन्मतेत इष्टापत्तेः । प्रत्यक्षानंतरोत्पन्नायां
द्वित्रिक्षणानंतरितायां तस्यामनुमित्साभावं नतु प्रत्यक्षाव्यवहितनष्टक्षणोत्पन्नायां द्वित्रिक्षणाव्यवहितायां तस्यामित्यत्र नियामकाभा
वादिति । सिसाधयिषा च न सिद्धित्वप्रकारिका किंतु सिद्धीच्छा विवक्षिता । मननस्थलेन हि रहेणापक्षतानापत्तेः । नापि सिद्धिविषयेच्छा
मात्रं प्रत्यक्षेणजानीयामितीच्छायामपि पक्षतानापत्त्यानुमित्यापत्तेः । नाप्यनुमितित्वप्रकारकेच्छामात्रं । एकलिंगकव्याप्तेलिंगांतरेण

सिं॰ अ॰ नुमित्सायामप्यनुमित्यभावापत्तेः। नाप्यनुमितिमात्रगोचरेच्छा सा सिद्ध्यनंतरं पुनर्ज्ञानीयामितीच्छायां प्रत्यक्षादिसामग्रीविरहकाले परामर्शसत्त्वेप
नुमित्यभावापत्तेः। किंत्वनुमितिगोचरेच्छामात्रं विवक्षितं। सा सिद्धित्वप्रकारिका ऽन्यप्रकारिका वेति विशेषो नादरणीयः। नचैवं श्रमेण वह्न्यनुमि
४५ त्सायामालोकेनापि तदनुमित्यापत्तिः। यानुमितिर्येनोत्पद्यते तज्ज्ञानगोचरानुमित्साया विवक्षितत्वात्। नचैवं पुरुषं जानीयामितीच्छायां संशयस्थ
ले प्रत्यक्षसामग्र्यां सत्यामनुमित्यापत्तिः। अनुमित्सासत्त्वे प्रत्यक्षसामग्र्या अपि प्रतिबंधासंभवादिति वाच्यं। प्रत्यक्षसामग्र्यां प्रत्यक्षातिरिक्त
सिद्धिमात्रगोचरेच्छाया उत्तेजकत्वात्। तस्याश्च तत्रासत्त्वात्। ननु भ्रमत्वेकैवानुमित्सा विवक्षितेति। ननु सिसाधयिषा न तु रूपीया तत्साध्यी
या तत्कालीना वश्यं विवक्षणीया॥ अन्यथा व्यधिकरणमन्यसाध्यीयमन्यकालीनां च सिसाधयिषामादाय पक्षतासत्त्वे सिद्धसाधनमुक्तस्थले
प्यनुमित्यापत्तिः। एवं च तादृशसिसाधयिषाया घनगर्जितस्थलेऽप्रसिद्धेः कथं तद्घटिता तत्र पक्षतेति चेत्। अत्रोच्यते स्वीयसिसाधयिषा
विषयत्वाभावसमानाधिकरणसिद्धिविषयत्वाभावः साध्ये पक्षता। नन्वत्रापि सिसाधयिषायां तत्कालीनत्वं विवक्षितं नवा। आद्ये घनग
र्जितस्थलादावप्रसिद्धिः। अंत्ये ऽन्योऽन्यकालीनसिसाधयिषामादाय सिद्धसाधनेऽपि पक्षतास्यादिति चेन्न। सिसाधयिषाविषयत्वस्य विशेष
णत्वेन तत एव तत्कालीनत्वलाभात्। न च तदपि विशेषणं प्रवेशयेनोक्तदोषः स्यादिति। एवं च द्विविधव्यापकानिरिता यो सिसाधयिषायो ४५
मनुमितिविषयस्तु पर्यन्तमते न कथं स्यादिति चिंत्यं। किं च पदार्थांतरे तत्कालीनसिसाधयिषायामत्र पक्षे सिद्धसाधनेऽपि पक्षतास्यात्। तामेव

सिसाधयिषामादाय विशिष्टाभावसत्त्वात्। न च स्वीयतत्पुरुषीयसिसाधयिषाविषयत्वाभावो विवक्षितः। यत्र पक्षे तस्य पुरुषस्य कदाचिदपि न सि
साधयिषा तत्र तत्पुरुषीयानुमितिस्थले पुनरप्रसिद्धेरिति चिंत्यं। वस्तुतो व्यधिकरणाया अन्यकालीनायाश्च सिसाधयिषायास्तदा तत्पुरुषे विरह
एवेति तामादायातिप्रसक्त्यभावात् तल्लिंगकतत्पक्षकतत्साध्यकानुमितिगोचरेच्छाविवक्षणीया। ताद्दशी च घनगर्जितादिस्थलेऽपीष्टत्वेन प्रसिद्धेति
नोक्तदोष इति ध्येयं। यत्तु सिषाधयिषितानुमितित्वावच्छिन्ने सिसाधयिषाविशेषसामग्री सामान्यसामग्रीपरामर्शमात्रमिति विशिष्टाभावरूपा पक्ष
तानुमितिं प्रति हेतुरेवेति। तन्न। एवं मणिसमवहितदाहत्वावच्छिन्ने जनकं विशेषसामग्रीति विशिष्टाभावस्तत्रापि न स्यात्। यथा चात्र नेष्टापत्ति
स्तथा शक्यो वक्तुमिति। ननु ताद्दशसिद्धेः प्रतिबंधकतया तदभावरूपा पक्षता प्रतिबंधकाभावरूपतया हेतुर्वाच्या। तच्च न संभवति। तच्च न संभ
भवति। कार्यसमानकालीनत्वात्। अन्यत्र प्रतिबंधकाभावस्य कार्यसमानकालीनत्वेनैव हेतुत्वावधारणादिति चेन्न। मण्यादिसमव
धानेऽपि दाहापत्त्या बाधकेनान्यत्र तथा करणात्वेऽप्यत्र तदभावे न गौरवेण च यथा ताद्दशहेतुत्वाभावात्। कार्याभावातिरिक्तप्रतिबंधकाभावेन
यानियमाद्य॥ ॥ व्याप्तिस्मरणमिति। व्याप्तिनिश्चय इत्यर्थः। लाघवादिति॥ ॥ अतिरिक्तविशिष्टवैशिष्ट्यावगाहिज्ञानकाल्पनापेक्षया
लाघवादित्यर्थः। ज्ञानद्वयादिति। अत्र ज्ञानद्वयत्वमविवक्षितं। उभयविषयकैकसमूहालंबनादप्यनुमित्युत्पत्तेरिति ध्येयं। लाघवादिति। व्या
प्यतावच्छेदकप्रकारकज्ञानत्वापेक्षया व्याप्यत्वप्रकारकज्ञानत्वस्य कारणतावच्छेदकस्य लघुत्वादित्यर्थः। उपजीव्यत्वादिति। व्याप्यत्वमहं

चि-ग्र० विनाव्याप्यतावच्छेदकत्वज्ञानादित्यर्थः। ननु सामग्रीवलेन व्याप्यत्वप्रकारकज्ञानसिद्धौ युगपदुपस्थितिः स्यादिति शंकते। अथेति। वलवत्त्वादिति। स
मानविषये प्रत्यक्षसामग्र्या वलवत्त्वेपि भिन्नविषयतयानुमितिसामग्र्या वलवत्त्वादित्यर्थः। तथा च युगपदुपस्थित्यभाव एवेति भावः। इन्द्रियेति। तथा
४६ च व्याप्तिविशिष्टज्ञानेपि न हेतुत्वमिति भावः। परामर्श इति। तथा च व्यभिचार इति भावः। प्रमाणान्तरनापत्तेरिति। प्रमाणान्तरत्वेन परिशिष्टा
नापत्तेरित्यर्थः। नन्वन्वमतं इति। धूमे वह्निव्याप्यत्वपरामर्शे धूमत्वेपि वह्निव्याप्तिव्याप्यत्वपरामर्शस्यासंभवः। विशेष्यासंनिकर्षस्याभ
46 यत्रापि समानत्वात् धूमत्वत्वेन व्याप्तिस्मृतिर्धूमत्वत्वे न धूमज्ञानमिति मदुक्ता धूमे व्याप्यत्वानुमितिसामग्रीति नास्त्येवेति भावः। अत ए
वेति। यत एवोक्तव्याप्यत्वावच्छेदकप्रकारिकाधीरनुमितिहेतुरत एव यदा धूमादिप्रत्यक्षं तत्र वह्निव्याप्य वह्निनि समकालं वह्निव्या
प्यनिष्ठमहाव्याप्यान्तरविषयैयो वह्निव्याप्यवान्नो वह्निव्याप्यवान्नो वह्निमानिति ज्ञानं तदा परमनुमितिर्न तु तदभावेपी
त्यर्थः। अत्र धूमे वह्निव्याप्यत्वादिस्मरणमस्ति न वा। अन्त्ये तदभावादेव नानुमितिः। आद्ये त्वाह। धूमो वह्निव्याप्य इति। उक्तमित्यापातत
यं वस्तुतः संशयाभाव एवेत्यर्थः। अन्यथा साक्षाद्विरोधिनः संशयस्य जनकीभूतव्याप्यत्वनिश्चयविघटनद्वारैव प्रतिबंधकत्वं स्या ४६
त्तत्वस्येति ध्येयम्। पर्वतीति। यदवच्छेदेन यद्धर्मनिश्चयस्तद्धर्मेतानेन तद्धर्मकोटिकसंशयविरोधित्वावान्न तन्नतदवच्छिन्नेतरकोटिकसं
शयविरोधिगौरवादित्यर्थः। नन्वघटत्वेनेतरभेदनिश्चयेपि वीतेन तत्संशयस्याप्रसक्तत्वात्कथमेतदिति वाच्यम्। एतदंशे संशयादेवाक्त

मातांतराद्विति भावः। न केवलं व्यावर्तकधर्मदर्शनादेव संशयाभावः किंतु भिन्ने विषये पक्षसामग्रीतोनुमितिसामग्र्या बलवत्वादपि न संशय
इत्याह। वस्तुतस्त्विति। एवकारो भिन्नक्रमः। अनुमितिरेव भवति न तु संशय इत्यर्थः। नन्विति। इह पर्वते भावोऽभावो वा उभययापि प्रमे
यमस्तीति भावाभावान्यतरोऽप्रमेयानुमितौ भावत्वाभावत्वयोरपि अवच्छेदकयोरनिश्चयेऽनन्वेमत्या व्याप्यत्वधीहेतुरित्यर्थः। ननु
भावत्वादिना प्रमेयत्वे साध्ये भावत्वाभावत्वमेपदं तद्धि धर्मपरमित्यर्थः भावो वाऽभावो वा उभयथापि प्रियेय इति पुल्लिंगनिर्देशा
त्तेः। लिंगत्वाभावादिति। लिंगतावच्छेदकत्वाभावादित्यर्थः। भावाभावान्यप्रसिद्ध्या तद्रूपस्य तस्याप्यप्रसिद्धत्वादिति भावः। लिं
गत्वादिति। लिंगतावच्छेदकत्वादित्यर्थः। लिंगमिति। अयमालोको धूमो वा उभयथापि वह्निव्याप्य इत्यत्र निश्चयः। तत्राप्रसिद्ध्या भावादि
ति भावः। यद्व्यतिरेकज्ञानमिति। व्याप्यातिरिक्तयद्व्यतिरेकज्ञानमित्यर्थः। यत्तु यद्व्यतिरेकज्ञानत्वावच्छिन्नं यत्र प्रतिबंधकमित्यर्थः। अत
एवोक्तज्ञानमिति। ननु ग्राह्याविरहज्ञानत्वावच्छिन्ने तथा। ग्राह्यविरहसंशयस्य ग्राह्यग्रहप्रतिबंधकत्वादिति यथाश्रुते नैवोपपन्नो
व्याप्यातिरिक्तविशेषणमयुक्तमिति। तत्रा एवमव्यभिचारमतिरेकज्ञानत्वावच्छिन्नमव्यभिचारनिश्चयप्रतिबंधकं न च तन्निश्चयस्य
हेतुरिति विशेषणस्यावश्यकत्वात्। न च धूमत्वेनेति। पूर्वपक्षधर्मविषयस्य धूमो न वह्निव्याप्य इत्यस्य सामान्याकारस्यैव व्याप्यत्वे
दज्ञानस्य प्रतिबंधकत्वमयेत्यादिना शंकितं संप्रति पक्षधर्मधूममात्रविषयस्य तथात्वमाशंकते इत्यपौनरुक्त्यं। न चेह धूमव्या

वि॰ अ॰ क्तिपदवत्तत्र पक्षधर्मपदसत्वेनोक्तगतत्वभावइतिवाओसामान्याकारभेदज्ञानस्यापिपक्षधर्मविषयत्वाविरोधित्वात्तन्मात्रविषयकत्वबोध
कपदस्यचाभावात्। यत्तुव्याप्यभावत्वमपरत्र भेतस्य। तस्यव्याप्यभेदत्वमपरत्वमित्यपौनरुक्त्यमिति। तन्न। वह्निव्याप्यानेतिपदस्यालोच
४७ नयास्यापिव्याप्यभेदत्वमपरत्वाल्लु... त्। अतएवास्तुवेत्यादिनाभेदाग्रहस्यहेतुत्वमुक्तदोषनिरासायवक्ष्यतिननुव्याप्यभावग्रहा
भावस्येति। अन्यथेति। यथेतु ...। तत्सामग्र्यामनुमित्यनुत्पादस्तदेत्यर्थः। निश्चयेति। निश्चयसामग्र्यां व्याप्याभेदनिश्चयसामग्र्यांसत्यांभ्रमा
भावाद्व्याप्यभेदभ्रमाभावात् नेतरं निरंतरं परामर्शः कुतोनभवतीत्यर्थः। तथाचपरामर्शस्वीकारपक्षेयद्युत्तरोत्तरपरामर्शधारानोत्प
द्यतेतत्रानुमितिसामग्रीबलवत्वं तंत्रमित्यत्रापिज्ञानद्वयात्मकतत्सामग्रीसत्वेऽनुमितिरेवस्यान्ननुव्याप्यभेदप्रत्यक्षमितिभावः।
अनेनुयदितत्रतादृशभ्रमोत्पत्तिरभ्युपेयातदात्वदभिमतविशेषदर्शनादिरूपपरामर्शसामग्र्यांसत्यामुक्तभ्रमासंभवात्तदनुमानत
त्पधिकरणत्वाभिमतकालेपरामर्शएवकुतोनभवतीतितन्मतेपर्यनुयोगइत्याशयःअंते पेत्याह। अस्तुवेति। अभेदेति। यथापितामहस्य
स्यजनकत्वानाविरोधिनोभेदज्ञानस्यलिंगपरामर्शप्रतिबंधकत्वस्वीकारात्। एतस्यकथंजनकत्वानाविरोधित्वमित्यतउक्तंच
भेदज्ञानस्येति। नहिभेदज्ञानंपरामर्शजनकमितिकश्चिदभ्युपैति। तथाचव्यभिचारान्नायंनियमइत्यर्थः। ग्राह्याभिन्नत्वविशेषिता ४७
पिनेयंव्याप्तिरप्रयोजकत्वादित्यत्रतात्पर्यं। गोत्वेगोपदप्रवृत्तिनिमित्तत्वंधर्मांतरमसत्यत्रउक्तमभ्युपगत्वेति। तस्याःपदविशेषप्रवृत्तिनि

भिन्नत्वमपि नास्तीति भावः। व्यक्तेरिति। व्यक्तिघटितधर्मस्येत्यर्थः। नहीति। नह्यनयोर्ज्ञानयोर्गोत्वविषयतायामविशेषइत्यर्थः। निर्विकल्पकत्वेति।
गोरितिज्ञानेयथागोत्वांशे निर्विकल्पकत्वं एवमत्रापि निर्विकल्पकत्वापत्तेरित्यर्थः। तथा चात्र व्यक्तिरेवप्रकारइति न। विशेषइतिभावः। अनुपप-
त्तादिति। व्याप्यतावच्छेदकताकप्रतीतेरितिभावः॥ ॥लिंगेति। लिंगतावच्छेदकं। नचेति। तत्रेतिशेषः। अन्यथा धूमादेरपि तत्सहेतुत्वं न सिध्येदिति
भावः। व्यभिचारेति। व्याप्तिग्रहानुपयुक्तविशेषणावत्त्वादित्यर्थः। पुरुषइति। तथा च स्वार्थानुमितौ न किंचिद्बाधकमिति भावः। तदन्यान्यादि-
ति। क्वचित्तदन्यान्यमिति पाठस्तदा तदन्यदन्यद्युतइति वक्तव्यं। वीहिवोध्यः॥ तदन्यान्यत्वादिति॥ धूमत्वालोकत्वान्यान्यधर्मवत्त्वादित्यर्थः। ननु धू-
मालोकान्यान्यत्वादित्यर्थः। तथासति व्यर्थविशेषणात्वशंकानवकाशान्यत्पद्यते हीत्यादिना व्यर्थविशेषणात्वमभ्युपेत्य परिहारा-
संभवात्। नहि धूमालोकान्यान्यत्वे वह्निव्याप्तिव्याप्यतावच्छेदकमन्यान्यत्वमपहाय धर्मान्तरमस्ति येन व्यर्थविशेषणात्वं स्यात्॥ धूमा-
लोकादेर्वह्निव्याप्यतावच्छेदकं धूमत्वादिकमेवास्तीति तत्र व्यर्थविशेष+त्व×णात्वंयुक्तं। व्याप्यत्वाभिमतेत्यनुनावच्छेदकेन व्याप्तिग्र-
हसंभवतिगुरुणा। तदन्यहा[illegible] धूमत्वादेरवच्छेदकत्वात्तदन्यान्यत्वेनावच्छेदकं गौरवादिति भावः। प्रत्यक्षं हीति। यद्यप्युक्तरीत्या व्यर्थ-
विशेषणात्वाभावेन धूमालोकान्यान्यत्वा[illegible] वह्निव्याप्यत्वानुमानं संभवत्येव तथापि प्रत्यक्षसमयावलंबत्वात्तत्स्थले तद्ग्रानस्यापि विशेषदर्शी-
नत्वेनैवोपयोगइति भावः। अन्वयेति। कारणानामन्तरवत्त्वनिश्चयानन्तरं संशयो न स्यात्तत्त्वास सर्वसिद्धं ना हु वोरपि धूमवत्त्वालोकत्वा

विं॰च्चा॰ स्मान्यधर्मवत्त्वस्य ज्ञानं प्रतपन्नसहकारिस्यादित्यर्थः। ननु तदन्यान्यधर्मवत्त्वज्ञानमपि स्वरूपेण प्रत्यक्षसहकारि न वाच्यं अतिप्रसंगात्। किंतु वह्नि
व्याप्तिव्याप्यत्वेन। तच्च न संभवति। धूमत्वादेर्व्याप्यतावच्छेदकस्यानिश्चयात्। निश्चितस्य तदन्यान्यधर्मवत्त्वादेर्गौरवेण तदनवच्छेदकत्वा
४८ दिति चेन्न। व्याप्यतावच्छेदकरूपेणानुपस्थिते पि फलबलेन व्याप्तिग्रहस्वीकारात्। सहचारदर्शनादिव्याप्तिधीसामग्रीसत्त्वे तद्व्यतिरेकेण
४८ व्याप्तिग्रहव्यतिरेकादर्शनात्। अत एव व्याप्यतानवच्छेदकेन धूमालोकान्यान्यत्वेनोपस्थितपक्षधर्मे व्याप्तिग्रहः सर्वसिद्ध इति भावः।
एवं च वह्निव्याप्तिव्याप्यत्वपरामर्शस्यापि सत्त्वात्तदनुमानमपि संभवति तथापि प्रत्यक्षसामग्रीसत्त्वेन तन्निरवकाशमिति तथोक्तमिति सं
क्षेपं। ननु व्याप्यतावच्छेदके न तदनवच्छेदके न वा व्याप्यत्वनियतसमानाधिकरणतया प्रकीर्तीयमानेन रूपेण पक्षधर्मताज्ञानमनु
मितिकारणमस्तु तच्चात्र प्रत्यक्षे वेत्यनुशये नाह। किंचेति। अथ वह्नीति। तथा च यो वह्निव्याप्यवान्सो वश्यं वह्निमानिति वह्नि[illegible]।
वच्छिन्नसकलधूमादिहेतिमहाव्याप्तिज्ञानवत एवानुमितिरितिमतं ज्ञानुमितिसामग्रीतत्रापि प्रत्यक्षे वेति भावः। ननु यो यो धूमवान्स व
ह्निमानिति वा यो वह्निव्याप्यवान्सो वश्यं वह्निमानिति महाव्याप्त्यनुभवो दुरपह्नवः। अन्यथा पूर्वोक्तव्याप्तिलक्षणाभावमति व्याप्तिप्रसं ४८
गात्। एवं च शाब्दपरामर्शस्थलेप्यनन्यगतत्वात् ज्ञानकल्पनीयमिति मतमुक्तसामग्रीतत्राप्रत्यक्षे वेत्यनुशयादाह अपि चेति। तथा च वा
दिति। व्याप्यतावच्छेदकप्रकारकत्वापेक्षया धूमत्वप्रकारकत्वस्य लघुत्वादित्यर्थः। एवं च वह्निव्याप्यवानयमिति शाब्दपरामर्शस्थले

वी॰

पिमहाव्याप्तिज्ञानं न कल्पनीयमितिभावः। सप्रमाणकत्वादितिलाघवसहकृतप्रथमप्रवृत्तविशिष्टज्ञानकारणताग्राहकप्रमाणमूलकत्वा
दित्यर्थः। ननु गौरवाद्रेव प्रमाणं कथं प्रवर्त्तेत तेन तज्ज्ञानकारणतेति। विशिष्टज्ञानकारणताग्रहः। फले। तन्तु स्वरूपस्थितिर्विनिर्णय
स्यात्फलमुखत्वात्तथा च विशिष्टज्ञानस्यासिद्धौ गौरवज्ञानस्यासत्त्वादेव न तत्कारणताग्रहपरिपंथित्वं। तत्सिद्धौ चात्र ग्रहेकमानकविशि
ष्टज्ञानमूलकस्य गौरवज्ञानस्य न तद्ग्रहपरिपंथित्वं उपजीव्यविरोधादितिभावः। ननु व्याप्यत्वप्रकारकज्ञानविशेष्यीभवद्धर्मि
मात्रगतत्वेन यत्संनीयते तेन तत्प्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वमस्तु। तच्च विशिष्टज्ञाने ज्ञानद्वये चास्ति। प्रथमे व्याप्यत्वस्य द्वितीये
धूमत्वादेस्तादृशस्य प्रकारत्वेनोभयोरनुगतस्य तस्य हेतुतावच्छेदकत्वात्। तथा च यत्र सामग्रीबलेन विशिष्टज्ञानं तत्र तस्यापि हेतुत्वं।
यत्र तु ज्ञानद्वयं तत्र तत एवानुमितिर्न त्वतिरिक्तविशिष्टज्ञानकल्पना। गौरवादप्रयोजकत्वाच्चेति चेन्न। एतदपेक्षया व्याप्यत्वप्रका
रकत्वस्य लघुत्वात्। ननु यद्येवं कारणता स्यात्तदातिरिक्तविशिष्टज्ञानकल्पनास्यादिति तर्कितं तदादायगौरवज्ञानानाद्धर्मि
कल्पनातोधर्मक[illegible]सीतिन्यायेन ज्ञानद्वयस्य कारणत्वे गुरुणाप्यवच्छेदकत्वं कल्प्यत इति चेन्न। एवंविधगौरव
ज्ञानस्य प्रमाणप्रा[illegible]त्वस्य परिपंथित्वात्। यत एव लाघवेन कर्मधारयप्रवृत्त्या निषादस्थपत्यधिकरणे शूद्रस्य विद्याप्रयुक्ति
पूर्वोकल्प्यत इति तत्रापि सिद्धांतः। अन्यथा यत्र कर्मधारयः स्यात्तदा शूद्रस्य विद्याप्रयुक्तिकल्पनागौरवं स्यादिति तत्र किं तत्त्वनिसि

चिं॰ अ॰ धानेन तत्कल्पनमपि न स्यादिति। एतेन ज्ञानद्वयसाधारणमन्यपदप्रयवच्छेदकं निरस्तं। व्याप्यत्वप्रकारकत्वापेक्षया सर्वस्यैव गुरुत्वात्। ननु
सामान्यस्यौत्सर्गिकतया गुरुणापि पूर्वोक्तावच्छेदकेन हेतुत्वमस्तु। अत एव कार्यतावच्छेदककार्यत्वमुपाधिरूपं नतु जातिरूपमपि घ
४८ टत्वादिकमिति चेन्न। तत्र [illegible] ज्ञानादीनामानन्त्यात्। यत्र विशेषस्यैकस्यैव लघुत्वं तत्र न सामान्यस्य गुरोरवच्छेदकत्वं। अत एवाख्यात
वाच्यत्वेऽपि यत्नत्वमेव न तु व्यापारत्वमिति संक्षेपः। अनुमानयोरिति। क्वाचित्काभिप्रायेणेदं वोध्यं। अन्यतरसाध्यमन्यतरानुमा
नेपक्षतावच्छेदकीकृत्यानुमानेऽपि सहचारग्रहस्य क्वाचित्संभवात्। नियतेति स्वरूपनिर्वचनं। अनियतस्य व्याप्यत्वाभावादिति
वधेयं॥ ॥संस्कारात्स्मरणाद्वेति मतभेदेनान्यथा गितिः स्वातन्त्र्येणेत्यर्थः। व्याप्तिस्मरणादिना संशयस्यैव नावस्थानं कुतस्तज्ज्ञानक
कोटिस्मृतेरित्यनुशयादाह। न वेति। गौरवादित्युपलक्षणं। प्रामाण्यसंशयजन्यार्यसंशये व्यभिचारादित्यपि द्रष्टव्यं। सामान्यल
क्षणायाः पर्वतेऽपि वह्निग्रहगमादाह। विशिष्येति। अलौकिकप्रत्यक्षं निरस्य लौकिकं तदाशंक्य निराकरोति न चेति॥ विशेषदर्शनमि
ति॥ इदं तु संशयाद्युत्तरस्य मतद्वयमभिप्रेत्य। अन्येतु यद्वच्छेदेनोपनेयज्ञाने तद्दर्शनपरं तदित्याहुः। व्याप्तिविशिष्टेति॥ व्याप्त्यापि समं ज्ञा
न लक्षणप्रत्यासत्त्या संज्ञादित्यर्थः। वह्नेरसंनिकर्षादिति। संयोगलक्षणसंनिकर्षाभावादित्यर्थः। ननु व्याप्यैव यात्ज्ञानमेव प्रत्या ४८
सत्तिस्तथा वा ह्यावपि तदेवास्तु। न च व्याप्तेः सामानाधिकरण्यात्मकत्वेन संयोगरूपतया संयुक्तसमवाय एव तत्र प्रत्यासत्तिरिति वाच्यं।

नहि संयोग एव व्याप्तिः किंतु साध्यादिनापि पदार्थविशिष्टं। न च विशिष्टे संयुक्तसमवायः। न च साध्यादिकं विशेषणविशेषणं न च तत्संनिकर्षो
पेक्षणीयो मानाभावादिति वाच्यं। विशेषणसंनिकर्षस्यापि हेतुत्वे मानाभावात्। विशेष्यसंनिकर्षत्वापेक्षया विषयसंनिकर्षत्वेन हेतुत्वं
लाघवादिति यदि तदा विशेषणविशेषणसंनिकर्षेपि तुल्यत्वात् सौवायथ्या तथास्तु। वह्नौ ज्ञानमेव प्रत्यासत्तिरस्तु। न च पर्वते पुरा वह्नेरनव
गमात् कथं तदुपनीतभानं तत्रेति वाच्यं। सामान्यलक्षणया धूमवत्त्वावच्छेदेन वह्निबोधे न पर्वतेपि तद्भानात्। विशिष्यतज्ज्ञानस्याप्रयोज
कत्वात्। अन्यथा पक्षधर्मव्याप्तिप्रत्यक्षानुपपत्तेः। वस्तुतस्तु यद्यवच्छेदेन यो धर्मो भातस्तदवच्छेदेन तद्धर्मज्ञानं तद्धर्मोपनयसामग्री। त
था च धूमवत्त्वेन ज्ञाते पर्वते वह्निमत्तोपनयः स्यादेवेति चेन्न। ज्ञानरूपया हि प्रत्यासत्त्या पर्वते वह्निप्रत्यक्षमापाद्यमानमलौकि
कमेव स्यात्। न चालौकिकप्रत्यक्षसामग्री मानांतरप्रवृत्तिप्रतिबंधिका। तस्याः समानविषये अनुमित्यादिसामग्रीतो दुर्बलत्वात्। अ
न्यथा मानांतरविलयापत्तेः। शब्दादिस्थलेपि पदार्थादिस्मारितपदार्थानां लौकिकविकाव्यमूलभूतज्ञानवन्मनसैव प्रत्यक्षसंसर्गप्रत्ययसं
भवात्। बलवत्त्वस्य फलबलक[illegible]म्यत्वात्। य घप्येवंकारभ्रमात्संशयोत्तरप्रत्यक्षपुरुषभ्रमो न स्यात्। तस्यालौकिकत्वात्। अलौकिक
प्रत्यक्षसामग्र्या अपि बलवत्त्वे धूमभ्रमादहृदे वह्निमिति भ्रांता न स्यात्। तथापि फलबलादनन्यगत्या दोषविशेषस्यैव तत्र बलवत्त्वप्रयो
जकत्वमिति ध्येयं। तस्मात्समानविषये लौकिकप्रत्यक्षसामग्र्या बलवत्त्वात्तत्त्वे वह्निप्रत्यक्षमेव स्यान्नत्वनुमितिरित्येव परामिश्रैः।

चिं॰ प्र॰ नचेदमुत्तरं। न लौकिकप्रत्यक्षसामग्री। वह्न्यसंनिकर्षादिति। ननु भवेदेवं। यदि विशेषणासंनिकर्षोपि हेतुः स्यात्। नचैवं मानाभावात्। किंतु
ज्ञानं। आवश्यकत्वात्। तच्चात्राप्यस्त्येवेति न लौकिकप्रत्यक्षसामग्रीविरह इति चेन्न। तदितरस्य कल्प्ये। तद्धेतुसत्त्वेपर्वतेन वह्न्यनुमितिसाम
५० ग्येन हि विशिष्टप्रत्यक्षत्वावच्छिन्नस्यैवात्र प्रमाणत्वात्। लौकिकप्रत्यक्षसामग्र्याः सत्त्वेऽनुमितिसामग्र्या बलवत्त्वस्यापि वक्तुमशक्यत्वात्। नन्वात्र
प्रत्यक्षमेवोत्पद्यतामिति वाच्यं। वह्निमनुमिनोमीत्यनुव्यवसायस्याबाधितत्वात्। यत्तु विशेषणस्य विषयविशेषणतया तत्संनिकर्षनापे
50 क्षणा विषयसंनिकर्षस्य हेतुत्वे लाघवाद्विशेषणासंनिकर्षोपि हेतुरिति। तन्न। एवं हि पर्वते वह्निप्रत्यक्षं स्यादेव। पर्वतरूपविषयसं
निकर्षसत्त्वात्। कारणतावच्छेदकावच्छिन्नयत्किंचित्सत्त्व एव कार्योत्पत्तेः। विशेषणासंनिकर्षे विशेष्यासंनिकर्षेपि तद्विशिष्टप्रत्यक्षो
त्पत्तेश्च। न च ब्रूयाद्विषयसंनिकर्षत्वेन कारणत्वेन हेतुत्वमिति वाच्यं। एतदपेक्षया विशेष्यसंनिकर्षत्वस्यैव लघुत्वात्। संसर्गस्पष्टवैज्ञा
नस्य वैभानोऽभ्युपगमेनाव्यवस्थितत्वे तत्संनिकर्षाभावेन व्यभिचाराच्च। किंच। विशेषणविशेष्यसंनिकर्षयोर्नैकमवच्छेदकं। विशे
षणासंनिकर्षस्यालौकिकसाधारण्येन हेतुत्वं। भ्रमाद्यनुरोधात्। विशेष्यसंनिकर्षस्य च लौकिकस्यैव विशिष्टप्रत्यक्षत्वं विशे ५०
षचक्षुरादिसहकारित्वं। अन्यथा स्मृत्युपनीते व्यवहिते पुरुषे दण्डस्मृतिमतो दण्डीति चाक्षुषप्रत्ययापत्तिः। अन्यत्र संसर्गांशे हृदया
यामपि दैवाद्दण्डस्मृतिमतः संनिकर्षेपि व्यवहिते तद्दण्डेपु सिद्धं दण्डीति बुद्धिर्नोत्पद्यत इति सर्वानुभवसिद्धं। तथा चान्वयव्यतिरेकाभ्यामेव तत्सहके

नुत्वमित्याकूतः। पक्षधर्म इति। पर्वतवृत्तिधूमो वह्निव्याप्य इत्याद्याकारं ज्ञानमित्यर्थः। विशिष्टेति। वह्निव्याप्यधूमवान् पर्वत इत्याद्याकारज्ञानमित्यर्थः।
अत एवेति। यो यो धूमवानित्यनेन धूमवति वह्नेरत्यन्ताभावो व्यवच्छिद्यते। तेन तादृशात्यन्ताभावाप्रतियोगित्वं साध्यस्य प्रतिपाद्यते। वह्निमानेव धू
मवानित्यनेन वह्न्यभाववान्न धूमवानिति वह्निविरहवद्वृत्तित्वं धूमनिष्ठं प्रतिपाद्यते। तदेव च व्याप्यत्वमिति तद्बोधस्यानुमितिहेतुत्वेऽन्य
योगव्यवच्छेदेनैवोदाहरणस्यादित्यर्थः॥ ॥ अत्रेदमनभिमतिबीजमाकूतः। जनकज्ञानस्य यावद्विषयतया जनकत्वं यावन्मध्ये यत्र प्राधान्येन
भासते तेन तद्वत्त्वज्ञानेऽपि तावन्मध्ये प्राधान्येन स्फुरतीति नियमः। पुरुषस्य दण्ड इति ज्ञानस्य दण्डी पुरुष इति ज्ञाने दण्डमात्रविषयतयैव
जनकत्वमतो न व्यभिचार इति। तन्न। भूतले घटो नास्तीति ज्ञानजन्ये घटाभाववद्भूतलमिति ज्ञाने तथापि व्यभिचारात्। ज्ञानस्य भूतल
विषयतयापि जनकत्वात्। घटे नाभावप्रत्यक्षत्वावच्छिन्नं एवाधिकरणज्ञानस्य हेतुत्वादिति। यदपि केचिदुक्तं। अयोगव्यवच्छेदेन सा
ध्यव्यापकतावच्छेदकरूपदर्शने इत्यप्युक्तं। केवलान्वयिनि साध्यायोगाप्रसिद्धेरिति। तदपि न। एवमपि घटे न व्यापकताज्ञानकारण
त्वे दोषानभिधानात्। पक्षसामानाधिकरण्यगर्भतया व्याप्तिग्रहे व्यापकत्वं तदग्रहे शोल्लद्धितियदित्तदा साध्याप्रतियोगिभूतसमानाधि
करणात्यन्ताभावकत्वमेव व्याप्यत्वमस्तु। व्यापकत्वघटकानामेव पदार्थानामत्रापि प्रवेशेन तदपेक्षया गौरवाभावादिति तत्रास्वरसबी
जं। तन्न। एतावतापि व्याप्तिज्ञानकारणतायां विनिगमकाभावः। किं चउक्तरूपव्याप्यपेक्षया व्यापकत्वमेव(व) लघु। तादृशात्यन्ताभावकत्वस्य याव

विं॰ प्र॰
५२

गर्भत्वेन गुरुत्वात्॥ अथ यथा व्यभिचारिसाधारणपात्॥ स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वसामान्याभावरूपव्यापकत्वेयावत्त्वात्तथैव येला
घवादिति। अन्ये तु पर्वते तद्वृत्तिधूमव्यापकत्वं वह्नौ ग्राह्यं। तत्र स्मृतमुपनेयं तथा च वह्न्या विना न्यत्रापि न घटादिरहितं तदा तत्साध्यानुमितिसाम
ग्री। एवं तत्राप्युपनयहत्स्य मत्र तत्र हीनमितितत्राप्यनुमितिसामग्रीत्तिसमूहालंबनरूपैवानुमितिः स्यान्नत्वेकानुमितिः। उपनेयाप्रती
तावुपनयासिद्धेरित्येकमस्वरसवीजं। अपरं च। वस्तुतो लाघवमेव न तथा हि। तत्समानाधिकरणात्यन्ताभावे प्रतियोग्यसमानाधि
करणत्वं विशेषणमावश्यकं। अव्याप्तिभयात्। तदर्थं च प्रतियोगिसमानाधिकरणभिन्नत्वं। प्रतियोगिसामानाधिकरण्याभाव
त्वं वा। उभययापि प्रतियोग्यधिकरणाधिकरणत्वगर्भे। तथा चाकाशादेरपि व्यापकतापत्तिः। मेयत्वादिसमानाधिकरणाये प्रति
योग्यधिकरणाधिकरणभिन्ना अभावा घटात्यन्ताभावादयस्तद्प्रतियोगित्वादाकाशस्य। ननु मेयत्वसमानाधिकरणस्याका
शात्यन्ताभावस्य प्रतियोग्यधिकरणाधिकरणभिन्नत्वात् तत्प्रतियोगितया आकाशस्य कथं तदप्रतियोगित्वं व्यापकत्वमिति चेन्न।
प्रतियोग्यधिकरणाप्रसिद्ध्या आकाशाभावस्य प्रतियोग्यधिकरणाधिकरणभिन्नत्वाभावेन विशिष्टताद्दशाभावाप्रतियोगित ५२
या आकाशस्य व्यापकत्वतादवस्थ्यात्। तस्मात्साधनसमानाधिकरणत्वं विशेषणमावश्यकमित्यस्मन्नानतिरिक्तपदार्थगर्भतयो
भयोः समानतया कथं व्यापकत्वे लाघवमित्यस्वरसवीजमित्याहुः॥ तत्र नाद्यं। विशेष्ये विशेषणं तत्र च विशेषणांतरमिति न्यायेन धूमप

र्वतवह्निमत्त्वं धूमव्यापकत्वं च वह्नेर्भासत इत्येव पर्वतवृत्तिधूमव्यापकत्वभानोपपत्तौ नान्यत्र तद्ग्रहापेक्षा। धूमव्यापकत्वं च वह्नौ वैर्वे पुरा गृहीतमि
ति स्मृत्योपनीयत इति न काप्यनुपपत्तिः। न द्वितीयं। प्रतियोग्यधिकरणाधिकरणाः संयोगाभावादयः प्रसिद्धास्तद्भिन्नत्वस्याकाशात्यंता
भावेपि सत्त्वात्। प्रतियोगित्वस्य भेदप्रतियोगिविशेषणत्वात्। एवमेव स्वोपादानगोचरज्ञानचिकीर्षाकृतिमत्त्वादावप्रसिद्धिरित्यस्येवद्रष्ट
ति। तथा चाकाशेऽव्यापकत्वप्रसंगनिरासान्न साधनसमानाधिकरणात्यन्ताभावाप्रतियोगित्वविशेषणं। येन व्यापकत्वेनाघवनस्याद्धिति। किंच
अन्योन्याभावगर्भव्याप्तेरेवानुमितिहेतुत्वस्य ग्रंथकृदभिमतत्वात्तद्गर्भव्यापकत्वे प्रतियोग्यसमानाधिकरणत्वाप्रवेशात्। अपि च
एवमपि साधिकरणत्वमात्रमेवोक्तनिरासायास्तु तथापि व्यापकत्वे लाघवान्मेव। तस्मादिदमत्राकरसर्वस्वं। शब्दादिना व्यापक
त्वे निश्चिते साधनसाध्यसामानाधिकरण्ये संशये व्यतिरेकनिश्चये वानुमित्यनुत्पादात्तन्निश्चयस्य हेतुः। यद्व्यतिरेकज्ञाने यदुत्पत्तिप्रति
बंधकं तन्निश्चयस्य तद्धेतुत्वात्। न च व्यापकत्वस्य सामानाधिकरण्येन नियततया तज्ज्ञाने तत्संशयाद्यनवकाश इति वाच्यं। न हि वस्तुतस्तद्व्या
प्यत्वमात्रं तद्विरोधि। किंतु व्याप्यत्वेन ज्ञानं। तथा च तदप्रतिसंधानदशायां तत्संशयादिकं स्यादेव। यदि चैतद्दोषभिया साध्यसामाना
धिकरण्येन नियतत्वेनैव व्यापकत्वज्ञानमनुमितिहेतुरिति मन्यसे तदा विपरीतमेव गौरवमिति॥ ॥दंडत्वादौ व्यभिचारादाह बा
धकं विनेति। तत्रान्यथासिद्धिरेव बाधिकेति भावः। अन्यथासिद्धमिति। तथा चात्रापि बाधकमेवास्तीति भावः। धूमवाद्वह्निमानिति।

चिं॰ अ॰ वर्तमानधूमविशिष्टे वर्तमानवह्निवैशिष्ट्यानुमितिरितियावत् तेन नाशक्तो बाधादिरिति ध्येयं। ज्ञायमानेति ज्ञायमानविशेषणतावच्छेदक
त्वेनेत्यर्थः। तेन ज्ञायमानवह्निजन्यतया नाव्याप्तिरिति भावः। विशेषणेति। वर्तमानविशेषणतावच्छेदकविशिष्टवर्तमानविशेषणान्तरवैशिष्ट्य
५२ वगाहिशाब्दविशिष्टज्ञानत्वादिरित्यर्थः। विशिष्टज्ञानपदं च जन्यानुभवपरं। तेनेश्वरज्ञाने स्मरणे च न व्यभिचारः। निर्विकल्पकस्य पूर्वं प्र
तीकेनैव वारणात्। उपमितेश्च यदि सपक्षत्वं नाभ्युपेयते तदा तदन्यत्वविशेषणमपि देयं। विशेष्यभानेति। विशेषणान्तरभानेत्यर्थः। अन्यथे
ति। तथा च ज्ञायमानविशेषणजन्यत्वमेवानन्यगत्या तत्र नियामकं कल्प्यमिति भावः। नन्वेवमुभयोर्जनकत्वे। अपि लिंगस्य करणत्वे
किं विनिगमकमत आह लिंगेति। न चातीतविषयकानुमितौ लिंगस्यातीतत्वात्करणत्वं न स्यादिति वाच्यं। फलायोगव्यवच्छिन्न
व्यापारवज्ज्ञानीयस्य करणत्वमित्याशयात्। अतीतेति। नन्वेवमपि विद्यमानलिंगकानुमितित्वावच्छेदेन लिंगस्य हेतुत्वमस्त्विति
चेन्न। अतीतादिस्थले क्लृप्तसामग्र्यैवानुमितिसंभवे विशेषसामग्र्यन्तरकल्पने गौरवात्। अयोग्यलिंगकानुमितौ व्यभिचाराच्च। तत्र प
रामर्शस्य तद्व्यापारत्वासंभवे लिंगस्याकरणत्वात्। शाब्दादिपरामर्शो यत्रानुमितिस्तत्र। विद्यमानस्य योग्यस्यापि लिंगस्याकर ५२
णत्वाच्च। परामर्शस्य तद्व्यापारत्वाभावात्। यदि च निर्व्यापारस्यैव तत्र तस्य करणत्वं तदा तादृशपरामर्शस्यैव तथात्वमस्तु आव
श्यकत्वादिति भावः। परामर्शेति। परामर्शद्वारैवान्वयापि लिंगकरणत्वाभ्युपगमादिति भावः। भाविनीति। यद्यपि भाविनि पिपक्षेऽव्यवधानादे

र्लिंगस्य विद्यमानत्वं भवत्येव तथापि स्वरूपेणानतस्य लिंगत्वं। किंतु पक्षवृत्तितया। तदानीं पक्षाभावान्न तथात्वं तस्य संभवतीत्यभिप्रायेणोक्तं।
ननु व्यक्तौ क्रमेवेत्यसंभवि। तत्र समनियतस्य ज्ञाने विशेषविशेष्यत्वादेर्लिंगांतरस्यासंभवात्। न च अयमेतद्व्यतिरिक्तयावदेतद्धर्मवानित्यत्र त
त्वेन निर्दिष्टव्यक्तिविशेषस्यैव तत्र लिंगत्वात्तद्गतधर्मांतरस्य साध्यांतर्गतत्वेनालिंगत्वादिति वाच्यं। प्रकारभेदेनोभयरूपत्वाविरोधात्। अ
त एव तोयत्वेन पिपासोपशमनसमर्थं नावच्छेदकरूपानुमानमित्यनुशयनाह। यदि चेति। वर्तमानतयासंदिग्धादिति। अवर्तमानादेवेति
शेषः। तथा च धूमस्य निश्चितत्वेपि न सत्त्वं। ध्वंसादेस्तु सत्त्वेपि न निश्चितत्वमित्येकस्यापि न हेतुत्वमित्यर्थः। यत्त्वतीतदिनवृत्तितया निश्चितं
स्य धूमस्य वर्तमानदिनेतीतदिनवृत्तित्वरूपविशेषणाध्वंसेन विशिष्टध्वंसस्य निश्चेतुं शक्यतया तस्यैव हेतुत्वं स्यादिति। तन्न। विशिष्टध्वं
सस्य घटादिज्ञाने कल्पापत्त्याशंक्यायं ग्रंथकृतैव निरस्तत्वात्। न च तत्र घटादेर्विशेष्यस्याविद्यमानतया विशेषणमात्रध्वंस एव। सवि
शेषणोऽहीतिमायात्। अत्र धूमस्य विशेषणस्याप्यसत्त्वाद्विशिष्टध्वंसः स्यादिति वाच्यं। एवमपि विशेष्यध्वंसस्य संदेहे विशिष्टध्वंसस्य संदिग्धत्वा
देव हेतुत्वं न स्यात्। न हि विशेष्यसत्त्वेपि विशेषणध्वंसप्रयुक्तो विशिष्टध्वंस इति भावः। ननु तर्हि प्रागभावादेः संदेहेपि पर्वते न संदेहः।
प्रतियोगिसत्त्वनिश्चयेनैव तत्र तस्य निश्चयादिति तस्य वर्तमानत्वं निश्चययत्यासीति न व्यभिचार इत्यत आह। किं चेति। पर्वते धूम इति
ज्ञानादिति। वस्तुतोतीतादिधूमविषयापीति शेषः। ननु धूमप्रागभावादौ न व्यर्थत्वं। प्रागभावनिष्ठयापेर्धूमविशेषणं विनाप्यहात्। यन्निष्ठा

चि॰ अ॰ अभिप्रेतार्थेन विशेषणेन विनाग्रहीतुं न शक्यते तस्यैव सार्थकत्वात्। एवं चाधिकसंख्याहकविशेषणस्य गुरुणोऽपि न वैयर्थ्यं। किंतु संकोचकविशेष
५३ णस्यैव। यथा नीलधूमादौ। एवं च धूमात्वं तन्नाभावाभावेऽपि न वैयर्थ्यमिति पूर्वोक्तरसादाह। आवश्यकेति। प्रथमोपस्थितत्वधूमत्वानादेवानुमि
त्युत्पादे सिद्धसाधनेनेत्यनुमित्सातराभावात्प्रागभावादेरहेतुत्वादित्यर्थः। नन्वेवमप्यनुमित्सायाप्रागभावादेरप्यनुमितिजनकत्वं स्यादेवे
त्यत आह किं चेति। कालिकव्याप्तिस्फुरणदशायामपि प्रकारान्तरमाह। अथ वेति। यथा चैतत्तथावाधं यथा वक्ष्यामः। तथैवेति। ननु व्या
53 पारवत्त्वेनैव करणत्वं। किंतु क्रियायोगव्यवच्छेदेनेति चेत्। न। करणस्य कारकविशेषत्वात्। कारकत्वस्य च व्यापारगर्भत्वात्। किं चास्मा पार
र्वेदाक्रियायोगव्यवच्छेदस्य कुठारादावपि नाशि। कदाचित्कर्मदाव्यपस्तीतिनस्यापि तत्त्वं स्यादिति। किंतु व्याप्तिज्ञानमिति॥ ॥अत्र वदंति।
यत्र विशकलितानां व्याप्तिशरीरप्रविष्टानां सहचारादिपदार्थानां स्मरणं सति विशेष्ये विशेषणं तत्र च विशेषणानन्तरमितिन्यायेन
विशिष्टवैशिष्ट्यावगाहिपरामर्शोत्पादादनुमितिस्तत्र परामर्शद्वारा व्याप्तिज्ञानस्य करणत्वं न संभवति। तत्फलं वैतस्यासत्त्वात्। किं च
यत्र स्मृतिरूपपरामर्शादनुमितिस्तत्रापि तदसंभवः। न च तत्र पूर्वानुभवरूपमेव व्याप्तिज्ञानं करणमिति वाच्यं। तस्यानुमितिजन ५३
कीभूतसंस्कारेणैव व्यवधानात्। व्यापारमात्रस्यैव करणाव्यवधायकत्वोपगमात्। अन्यथा यागादेः स्वर्गादिहेतुत्वार्थं तज्जन्या
र्वस्यैतत्कृत्यापारत्वसिद्धये स्वर्गजनकत्वकल्पनानापत्तेः। अत एवाह। स्वांगमव्यवधायकमिति। न च तत्रानुमितौ संस्कारो जनकः। स्म

तिव्याप्तेः। अनुमित्यंतरेप्यपि चाव्याप्तेः। वस्तुतस्तु स्मृतिरूपपरामर्शे तज्जनकपूर्वानुभवस्य च तद्रूपपरामर्शे च व्याप्तिज्ञानस्योपक्षीणत्वात् अन्यथा
सिद्धत्वमेव। अन्यथा स्मृतिजन्ये प्रत्यभिज्ञादौ पूर्वानुभवस्य विशिष्टज्ञानजन्ये विशिष्टवैशिष्ट्यप्रत्यक्षादौ विशिष्टज्ञानजनकविशेषणज्ञानस्य
पि करणतापत्त्या वक्तृव्याकुलीस्यात्। अनुमितौ व्याप्तिज्ञानवत्परामर्शजनकपक्षतावच्छेदकधर्मादिरूपविशेषणज्ञानमपि करणं स्यात्। न चा
नुमितौ करणानुपपत्त्या सर्वत्रानुमितिपूर्वं व्याप्तिज्ञानं तत्करणं कल्पनीयमिति वाच्यं परामर्शरूपासाधारणव्यापारवत्त्वात् मनस एवासाधा
रणीभूय तत्करणत्वसंभवात्। तदुक्तं प्रमेयभाष्यादौ। स्मृत्यनुमित्यादिकरणत्वेन मनः साधितमिति॥ ॥ तदपरे न त्वमनेनान्यथा हि। अनु
मितौ मनसः करणत्वे तस्या आत्मेन्द्रियकज्ञानकत्वान्मानसप्रत्यक्षरूपतापत्तिः। करणतया सहकृतमनोजन्यत्वस्यैव मानसत्वनियामकत्वा
त्। न च परामर्श एव करणं तत्र अव्यापारकत्वात्। तस्मात्परामर्शजनकज्ञानत्वेन व्याप्तिज्ञानादीनां सर्वेषां करणता। तेन न काप्यव्या
प्तिः। मनसो व्यापारकश्रवणत्वादिना श्रवणादिप्रतिपत्तीनां मुक्तिकारणत्वं। न च विशेषणविशेषणज्ञानस्य विशिष्टवैशिष्ट्यावगा
हिज्ञानं प्रत्यकारणकारणतया व्याप्तिज्ञानादीनामन्यथासिद्धिरिति वाच्यं। येन केन रूपेणान्यथासिद्धस्तदन्येन रूपेण हेतुताविरो
धात्। कुलालत्वपितृत्वेनान्यथासिद्धस्यापि कर्तुः कुलालत्वेन घटजनकत्वात्। तथेह हेतुहेतुत्वेनान्यथासिद्धत्वेपि उक्तरूपेण
जनकत्वमविरुद्धं। न च तत्र हेतुताग्राहकावन्वयव्यतिरेकौ न स्त इहेति वाच्यं। तदसत्वेपि क्रियायाः करणजन्यतानुमानस्यैव परिशेषानि

चिं॰ अ॰ शेषपर्यवसितस्य तद्ग्राहकस्याविद्यमानत्वात्। एतेन पक्षतावच्छेदकज्ञानं कारणं स्यादित्यनिष्टापादनं परास्तं। उक्तरूपेणोपस्थापकेन च स्मृतिरूपपरा
मर्शजनकं न ज्ञानमिति व्यभिचारः। तज्जनकानुभवस्य सत्वात्। न च संस्कारव्यवहितः स कथमनुमितौ हेतुरिति वाच्यं। अनुमितिप्रति स्मृतिरू
५४ पपरामर्शे न स्मृतिरूपपरामर्शं प्रति संस्कारेण व्यवहितं पूर्ववर्तित्वसत्वात्। न हि यावद्व्यापारजनकस्यावान्फलस्येति नियमः। न च व्यापारज
54 नकस्य फलाजनकतया तेन व्यवधानं। चक्षुः कर्मणश्चक्षुर्विषयसंयोगजनकस्य साक्षात्काराजनकत्वेन व्यभिचारात्। अस्तु वा परामर्शज
नकत्वेनैव जनकता। तज्ज्ञानत्वं प्रविष्टं। तथा चास्तु संस्कार एव तत्कारणं न चानुमितेः स्मृतित्वापत्तिः। संस्कारत्वेनैव तज्जनकत्वेन त
यात्वात्। अन्यथा लिंगकरणतापक्षे संस्कारलिंगकानुमितौ का गतिः। संस्कारध्वंसे वा का गतिः। वस्तुतः समानविषयकसंस्कारजन्यत्वे स्म
तित्वं। अत एव संस्कारव्यापारत्वे तत्कालोत्पत्तिकत्वं बाधकं वदन्ति। प्रकारान्तरेण स्मृतित्वापत्त्योऽसंभवादिति॥ ॥अत्र ब्रूमः। विशेषण
विशेषणज्ञानवत्स्वपरामर्शोपस्थितानामपि पूर्वानुभवव्याप्तिस्मरणादीनां परामर्शहेतुत्वेनानुमितिजनकत्वं अन्वयव्यतिरेकाभ्यां ५४
कल्पनीयं। अनुमितौ करणं त्वनुपपन्नं वा नायं। तदभावात्। परामर्शे सति तद्व्यतिरेकेणानुमितिव्यतिरेकासिद्धेः। नान्यः। तथा
पि परामर्शपूर्ववृत्तित्वेनैव हेतुत्वमस्तु। लाघवात्। ननु परामर्शजनकत्वेन। नियमानन्यथासिद्धघटितत्वे न तस्य गुरुत्वात्। तथा
चाकाशादीनामपि तद्धेतुतापत्तिः। अवच्छेदकलाघवे व्यक्तिगौरवस्यादोषत्वात्। दोषत्वे वा परामर्शप्रागभावत्वेनैव हेतुत्वमस्तु। परामर्श

र्ववृत्तित्वापेक्षयायायस्य लघुत्वात्। तत्पूर्ववृत्तित्वं हि तत्प्रागभावावच्छिन्नसमयवृत्तित्वं। तथा च तत्प्रागभावत्वमेव लब्धमिति। परामर्शेनैवान्य
थासिद्धत्वान्न प्रागभावस्यानुमितिहेतुत्वमिति यदि तदेतदन्यत्रापि तुल्यं। करणान्तरानुपपत्त्या तत्कल्पनमुभयत्रापि तुल्यं परामर्शजनकत्वेन हे
तुत्वपक्षे स्मृतिरूपपरामर्शजनकसंस्कारवत्परामर्शप्रागभावस्यापि हेतुत्वाभ्युपगमाच्च। तथा च करणानुपपत्त्यापि तत्प्रागभावत्वेनै
व हेतुत्वं कल्प्यं न तु तज्जनकत्वेन। गौरवात्। एवं च संस्कारस्यापि हि तस्य पूर्वानुभवस्य तज्जन्यसंस्कारस्य वा हेतुत्वमावश्यकापत्त्या वृत्तिर्न सं
भवतीत्यपरमप्यनुकूलं भवति। वस्तुतस्तु। तत्प्रागभावस्यापि नानुमितिकारणत्वं। परामर्शेनान्यथासिद्धतया तस्य हेतुत्व एवमानाभाव
त्। करणान्यथानुपपत्तिर्मानमिति चेन्न। मनस एव तत्करणत्वसंभवात्। तथापि किं विनिगमकमिति चेत्। मनसोनुमितिहेतुत्वस्य क्लृ
प्तत्वात्। परामर्शप्रागभावस्य च तद्धेतुत्वेनाक्लृप्तत्वात्। प्रागभावत्वापेक्षया मनस्त्वस्य जातित्वेन लघुत्वाच्च। नन्वेवमनुमितेर्मानसत्वा
पत्तिः। करणान्तरासहकृतमनोजन्यत्वस्यैव तत्र नियामकत्वमिति चेन्न। करणान्तरं हि प्रमितेरकरणमेवाच्यं। अन्यथा यथाश्रु
तेऽसंभवात्। एवं च प्रमित्यन्तरासाधारणकारणासहकृतमनोजन्यत्वस्यैव मानसत्वनियामकत्वेन नानुमितेर्मानसत्वं। अनुमित्यन्तरासा
धारणकारणीभूतेन परामर्शसहकृतमनोजन्यत्वात्। तदुक्तं शशधरेण। न हि मनोजन्यतामात्रेण मानसत्वं किंत्वसाधारणकारणानि
रपेक्षमनोजन्यत्वेन। न चानुमित्यादौ तथा। तथाभूतस्य परामर्शादेरसाधारणस्यापेक्षणादिति। औत्सेक्विकस्य तु तथाभावान्मानसत्वमि

वि.श्रु. वाननुभूत्वेत्रा[illegible]नसमिमितरजनकत्वं परामर्शस्यतथात्वमित्यत्रैव किं विनिगमकं। निर्व्यापारत्वेनैवोभयोरविशेषादिति चेन्न। सव्यापारत्वा
विशेषप्रसंगे द्वयोरपि विजातीयप्रमाजनकत्वेय देव। तत्र स्वभाव एव शरणं फलबलेन तथेति चेत्। अत्रापि स एव। तत एव च तथात्वि
५५ तेन किंचिदेतत्। यद्वा। प्रमितित्व तत्प्रागभावासहकृतमनोजन्यत्वं मानसत्वप्रयोजकं। लाघवात्। इंद्रियत्वेन मनोजन्यत्वं वा तथा।
55 यथा तवैव संस्कारत्वेन तज्जन्यत्वं स्मृतित्वप्रयोजकमिति नोक्तदोषः। यत्तु व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन परामर्शस्य हेतुत्व
मिति व्याप्तेः प्रकारत्वे न परामर्शपूर्वेति उपस्थिते रावश्यकत्वात्त्र व्यभिचारः। स्मरणात्मकज्ञाने परामर्शे स्फुटत्वेऽप्यनुभवस्यैव करण
त्वमिति यथाश्रुत एव ग्रंथः साधुरिति तन्न। एवं व्यभिचारोद्धारेऽप्यन्यथासिद्ध्युद्धारात्। किंच। व्यभिचाराभावसहचारस्मरणानं
तरं विशेष्ये विशेषणं तत्र च विशेषणांतरमिति न्यायेन व्याप्तिवैशिष्ट्यविषयकपक्षधर्मताज्ञानादप्यनुमितेरनुभूयमानत्वात् व्या
प्तिप्रकारकत्वेन तस्य हेतुत्वमिति। विषयपरिशोधकस्येति। नन्वेतस्यानुमितौ कथमुपयोगः न च विरोधिशंकानिवृत्तिद्वारा तथेति
वाच्यं। परामर्शस्यैव विशेषदर्शनत्वेन तन्निवर्तकत्वादिति चेत्। अत्राहुः। विशेषदर्शने स्वरसवाहिनी शंका नोदेति। अनाहिता ५५
शंका उदेत्येव। कथमन्यथा प्रामाण्यशंकादिना अर्थनिश्चये सत्यपि यदसायार्थशंकोदयः। न हि परामर्शानंतरं स्वरसवाहिनी शंका
निवर्तकं बाधकप्रमाणादिशंकानिबंधनात्तु साध्याभावशंका कथं नोदेतु। तदुक्तं गुणकिरणावल्यामाचार्यचरणैः विरोधिप्रमाणासत्त्वे
ये

शंकपास्तु हृत्नोमनुमितौ विलंबं तेनुमाता रइति। तथा च यथा धूमाद्वह्निमतानेन भवितव्यं तया कुतश्चिद्वह्न्यभावसाधकाद्वह्निशून्येनैव न कुत इति शं
का। तत्किं वह्निविरहसाधकमिति जिज्ञासा च परामर्शे सत्यपि जायते। सा च यदि निर्वह्निः स्यात्तर्हि निर्धूमः स्यात्तथा च न वह्निविरहसाधकं किमप्यत्रात
स्त्यैव वह्निसाधकधूमानुपपत्तेरिति तर्केणापनीयत इति विषये परिशुद्धे प्रतिबंधकशंकाविरहात्तु मितिरविलंबाभवतीति। यत्र स्वतः सिद्धं शं
का विरहस्तत्र न तर्कावतार इति ध्येयं॥ ॥तद्योनुमानमिति। अनुमानविषयीभूतं लिंगमित्यर्थः। केवलान्वयीति। वक्ष्यमाण केवलान्वयि
धर्मे साध्यके त्यर्थः। असद्विपक्षमित्यस्यास्यपत्रैव तात्पर्यं। यथाश्रुते सिद्ध्यसिद्धिव्याघातात्। अभिधेयत्वस्य। पदशक्तिविषयत्वस्य। आका
शत्वादरूपाकाशपदाशक्यस्य वस्तु पदादिशक्यत्वादिति भावः। अभिधानइतीयेनैव पदेन तस्याभिधानं तत्पदशक्तिविषयत्वादेवव
न विपक्षत्वं। अनभिधाने च वस्तुपदादेरप्यनभिधेयतयाऽवस्तुत्वादेव न विपक्षत्वमित्यर्थः। पदाशक्यत्वेपि पदजन्यज्ञानविषयत्वाद्विप
तो त्वं वस्तुत्वं च स्यादित्याशंकते। अथेति। एवं चेति। उक्तक्रमेण व्याघाते निरस्त इत्यर्थः। अन्यथा व्याघातादेवानुमानं बाधितं स्यादिति
भावः। यद्धर्मसाध्यके लिंगं केवलान्वयितं धर्मं निरूपयति। तत्र न तावदिति। यत्नुक्तक्रमेण त्वं तताभावाप्रतियोगित्वमेव केवलान्वयिधर्म
न्नलक्षणेन तवाभिमतं। तथा चाव्याप्तिरित्याशंकते। तत्रेति। यदीदं लक्षणं स्यात्तदा नायमत्यंताभावः केवलान्वयी स्यादित्यर्थः। ननु कः सं
ग्राह्य इत्याशंकायामस्याबलात् लक्षणानाक्षेपे तत्र सिद्धांतग्रापनस्य विरुद्धत्वापातादिति। तन्न। व्याप्याश्रयेत्यादिग्रंथस्यासंगतत्वापाता

चिं॰ अ॰ तानत्यव्याप्यवृत्त्यत्यंताभावद् वाह्यायनाशजन्यगुणा[illegible]दिनाशात्यंताभावोपि केवलान्वयित्वेन संग्राह्यो येन तत्राव्याप्तिराशंक्येतानचोक्तलक्षणेऽ
व्याप्तिरेव दुष्टत्वमानातिव्याप्तिरित्यभिप्रायेणात दुर्थावतारयति वाच्यं लक्षणात्दूषयितुस्तज्जातिव्याप्तिमाशंक्य तन्निरासस्यासंभवदुक्तिक
५६ त्वात्ता अव्याप्तिवदतिव्याप्तिसत्वेपि तद्दिष्टस्यैव सिद्धेः। उक्तेनैवोपपत्तेश्चा न चैवमग्रेलक्षणप्रणायनं विरुद्धं स्यादितिवाच्यं। वृत्तिमदित्या
दिकेवलान्वयिलक्षणे न त्वत्यंताभावप्रतियोगित्वमात्रं तथा चाव्याप्यवृत्त्यत्यंताभावस्याकाशात्यंताभावो वा केवलान्वय्येवेतिनोक्तदोष
56 इत्याशयेन तत्प्रणयनं। यथा च सिद्धांतलक्षणेनाव्याप्यवृत्त्यत्यंताभावसंग्रहस्तथाग्रे वक्ष्यते। प्रतियोग्येवेति। नच प्रतियोगिप्रागभावा
दिरपि तथेति कथमवधारणं तस्यापि प्रतियोगित्वात्। घटात्यंताभावस्यैव तत्प्रागभावात्यंताभावत्वादिति भावः। प्रतियोगीति। प्रतियोगी
तावच्छेदकरूपइत्यर्थः। वृत्तिमदिति। वृत्तिमान्योत्यंताभावस्तत्प्रतियोगित्वमित्यर्थः। नन्विदानीमाकाशइति प्रतीत्या दाकाशस्यापि
वृत्तिमत्वात्तदत्यंताभावे तथात्वव्याप्तिः। न च वृत्तिः संयोगः समवायो वा विवक्षित इति वाच्यं। घटादेरेव केवलान्वयितापत्तेः। अव्याप्यवृ
त्त्यत्यंताभावाव्याप्तेश्चेति चेत्। न। स्ववृत्तिविरोधित्वं वृत्तिपदेन विवक्षितत्वात्। स्ववृत्तिविरोधित्वं च स्वसामानाधिकरण्यधीविरोधि
त्वं। संयोगादिवृत्तिश्च न तदत्यंताभाववृत्तिविरोधिनीति न तत्राव्याप्तिः। नन्वेवं संयोगस्यापि केवलान्वयितापत्तिः। तदत्यंताभाववृ ५६
त्तेरपि न वृत्तिविरोधित्वाभावात्। वृत्त्यादावुभयोः समानाधिकरणत्वादितिचेन्न। कर्मादावधिकरणे तदत्यंताभाववृत्तेरपि तद्वृत्ति

विरोधित्वात्। नायद्यपि संयोगवृत्तिरपि स्वावच्छेदेन स्वात्यंताभाववद्वृत्तिविरोधिनी भवत्येव। तथा च तत्राव्याप्तिरपि तथापि स्वसामानाधिकरण्यप्रयु
विरोधित्वं नास्ति। संयोगावच्छेदेन तदत्यंताभावासत्वेपि तत्सामानाधिकरण्यबुद्धेरप्रत्यूहत्वात्। न चैवं मेयत्वादिवृत्तिविरोधिवृत्तेरप्रसिद्धेस्त
त्राव्याप्तिरिति वाच्यं। स्ववृत्तिविरोधिवृत्तिमदत्यंताभावप्रतियोगिनो घटादेः प्रसिद्धास्तदन्यत्वस्य तत्रापि सत्वात्। ननु तथाप्याकाशात्यंता
भावः कथं केवलान्वयी। कालादौ तस्य सत्वे न तदत्यंताभावासत्वात्। न च संयोगित्वेन तदत्यंताभावस्तथा। भूतलादौ संयोगित्वेनापि घटा
दिवत्तस्य सत्वेन तदत्यंताभावासत्वात्। न चाकाशसंयोगस्य भूतलादिवृत्तित्वेप्याकाशं तत्र न वर्तत इति वाच्यं। एवं हि घटादेरपि भूतलादिवृत्ति
त्वं न स्यात्। नापि समवेतत्वेन तदत्यंताभावस्तथा। अधिकरणधर्मावच्छिन्नप्रतियोगिकाभावाभ्युपगमापत्तेरिति चेन्न। इदानीं भूतले घट इति
वदिदानीं भूतले आकाशमित्याद्याधाराधेयभावप्रतीतेरसिद्धेर्न तत्र संयोगित्वेन तस्य सत्वं। तथा च तदवच्छिन्नाभाव एव तस्य केवलान्वयी
त्याहुः। अन्ये तु अस्तु संयोगेनाकाशस्य भूतलादौ सत्वं। तथापि समवायावच्छिन्नाकाशात्यंताभाव एव केवलान्वयी। न चैवं अधिकरण
धर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमापत्तिः। आकाशत्वावच्छिन्नप्रतियोगिकस्यैव तस्यारोप्यासमवायसंबंधेनाभावाभ्युपगमा
त्। आरोप्यसंबंधभेदेनैवाभावभेदात्। न चाकाशसमवायाप्रसिद्ध्या तदारोपोपि कथमिति वाच्यं। सर्वत्रैव शिष्टस्याप्रसि
द्धस्यैवारोप्यत्वात्। न हि घटो नास्तीत्यत्र भूतले घटसंयोगोपि प्रसिद्धः। तथा चारोप्यारोपविषयप्रसिद्ध्या तदुभयसंसर्गोऽप्रसिद्ध ए

सिं॰व्यु॰ वारोप्यते। यथा वान्योन्याभावेन तदुभयप्रसिद्धिभावेण तदुभयतादात्म्यं तथात्रापीति न काप्यनुपपत्तिः। यद्विसंबंधभेदेना भाववभेदो नाभ्युप
५७ गम्यते तदा आत्मादितरेभ्यो भिद्यते ज्ञानवत्त्वादिति व्यतिरेक्यनुमानं सर्वं सिद्धं न स्यात्। विषयदि विषयिभावेन ज्ञानं स्यैव नस्य वस्तुमात्रवृत्तित
याज्ञानवत्त्वाभावाप्रसिद्धेः। तस्मात् आघटादौ विषयिभावेन ज्ञानसत्वेपि समवायेन तदभावस्तथात्र संयोगादिना काशसत्वेपि समवायेन
तदभावः स्यात्। येन संबंधेन तदभावस्तत्संबंधेनैव तत्सत्वस्य तदत्यन्ताभाववृत्तिविरोधित्वात्। तस्माद्यधिकरणधर्मो नारोप्यतावच्छेद
57 कीभूते याभावभेदकः आरोप्यसंबंधाभूत्वाभेदक एवेति विभागः। एवं येन संबंधेन यस्य न वृत्तित्वं तत्संबंधावच्छिन्नस्तदभावः केवला
न्वयीति परमाणावाद्यसंतानाभावापितत्वेनेष्ट एव। नन्वेवमेयत्वाद्यभावस्य केवलान्वयित्वेनाभ्युपगमेन तत्प्रसिद्धिनिबंधनो व्यभिचरितत्व
लक्षणे केवलान्वयिन्यव्याप्तिः पूर्वोक्ता विरुद्ध्येतेति चेत्। न। व्याप्तिशरीरप्रविष्टसंबंधावच्छिन्नसाध्याभावव द्वृत्तित्वमव्यभिचरितत्वम
त्राभिमतं। अन्यथा समवायावच्छिन्न वह्न्यभाववद्वृत्तित्वा द्धूमेपि वह्न्यव्यभिचारानुपपत्तेः। तथा च मेयत्वस्य समवायावच्छिन्नाभावप्र
सिद्धावपि यत्र वाच्यत्वं तत्र प्रमेयत्वमिति व्याप्तिशरीरप्रविष्टस्वरूपसंबंधावच्छिन्नसाध्याभावाप्रसिद्ध्या तत्र व्याप्तिसंभवात्। एवं च वृ ५७
त्तिमत्वदस्याप्रसिद्धिवारकतया न व्यर्थत्वं राकापीति। अव्याप्तिवारकत्वे हि सा स्यात्। वस्तुतस्तत्रापि न वार्थत्वमिति सूक्ष्ममिंद्रियलक्षणाड्
त्याद्भुः। वयं तु ब्रूमः। अन्योन्याभावप्रतियोगितानवच्छेदकधर्मत्वं तत्त्वं। अन्योन्याभावोपिव्याप्यवृत्तिरिति नाव्याप्यवृत्तस्य सत्ताभावे व्याप्ति

रिति। एतच्च केवलान्वयिधर्मलक्षणं। तद्धर्मसाध्यकत्वं च केवलान्वयिलिंगलक्षणं बोध्यं। तेनायं घटः प्रमेयो घटत्वादित्यत्र नाव्याप्तिः। स
वे साधारणान्वयिनोत्र लक्ष्यत्वाद्दृशा विशेषान्वयि धूमादाव व्याप्तिर्न दोष इति। सद्धेत्वनुमान विभागोयमित्यर्थ घटः प्रमेयत्वादित्यनुमा
नाभासस्य निरुक्तत्रयवहिर्भावे पि न क्षतिरिति ध्येयं। तथेति। आदिपराहिगतत्वं ताभावपरिग्रहः। ननु प्रमात्वपरंपरासंबंधेन प्रमेतिधीः स्या
न्न तु प्रमेयमिति विशेषणांशस्यैव प्रकारत्वान्न संबंधस्य त्यरुच्चेराह। प्रमाज्ञानीयेति। यद्यप्यस्मन्मते ईश्वरप्रमा एकैवेति तद्विषयत्वमनुगतमे
व तथाप्युभयमतसाधारण्यापादे तदुक्तं। भिन्नेति। भिन्नविशेष्यक इत्यर्थः। स च न प्रयोजको तिप्रसंगादिति भावः। असिद्धेति। घटासिद्धत्वमर्थः।
तस्यैव संशयकोटित्वादिति भावः। साध्यसिद्धीति। साध्यसिद्धिर्विरोधिनी यस्य। साध्यसिद्धिप्रतिबध्य इति भावः। समानविषयत्वमिति।
समानविशेष्यकत्वमित्यर्थः। घनगर्जितादावप्यनुमितेस्संशयस्य नानुमित्यंगत्वमित्यभिप्रायेणाह यद्वेति। पक्षेति। न चैतद्द्वानदृशायां प
क्षे साध्याभावत्वग्रहदशायां मुक्तयोगपत्तासत्वेनुमित्यापत्तिः। पक्षनिष्ठात्यंताभावप्रतियोगित्वज्ञानविरोधिज्ञानाभावस्यैव योगपत्तान्नमित्याशयात्।
अन्यञ्च पत्रास्वरसवीजं एवं प्रमेयत्वे [illegible] भाव प्रतियोगित्वप्रसिद्धावपि प्रमेयो न वेति संशयकोटिभूताखण्डाभावस्याप्रसिद्धिरेवेति यदि
तादृशो भ्रमस्तत्र एव न केवलान्वयित्वं अन्यथा [illegible] देहाभाव एवेत्यादि तद्बीजमित्याहुः। एकरूपविकलमिति। विपक्षव्यावृत्तत्वविकलमित्य
र्थः। अन्वयव्यतिरेकिणि तन्नि [illegible] नागमकत्वे [illegible] नादिति भावः। रूपांतरेति। पक्षवृत्तित्वादिविकलमित्यर्थः। अन्वयेति। तत्रैकव्या

सि॰ आ॰ प्तिनिश्चयादनुमितिदर्शनात् अन्वयान्वयव्याप्तिनिश्चये सति व्यतिरेकव्याप्तिनिश्चये प्रयोजकस्य विपक्षव्यावृत्तत्वस्य नापेक्षेति भावः। नन्वन्वयव्यति
५८ रेकिणि अन्वयव्याप्तिप्रतीतौ विपक्षव्यावृत्तस्यापि प्रयोजकत्वात्तेन रूपेण विनान्वयव्याप्तिनिश्चय एवाजनस्यादित्यत आह। व्यतिरेक
58 इति। अन्वयव्याप्तिप्रतीताविति। व्यतिरेकव्याप्ताविति सति सप्तमी। तथा च व्यतिरेकव्याप्तौ सत्यां विपक्षसंभवे तद्वृत्तित्वशंकानि
रासद्वारा विपक्षव्यावृत्तत्वमन्वयव्याप्तिप्रतीतावुपयुज्यते न तु साक्षादिति। तथा च स्वतःसिद्धताहशाशंकाविरहे सति तन्निरहत्तिप्रयो
जकस्य व्यतिरेकस्य न कोप्युपयोग इति भावः॥ ७॥ ॥ असत्सपक्ष इति सिद्धसिद्धिपराहतमिति तदर्थमाह। यत्रेति। व्यतिरेकेति।
व्यतिरेकसहचारमात्रेणेत्यर्थः। दशाविशेषे स्मादेः केवलव्यतिरेकित्वमिष्टमेवेति भावः। एकेति। प्रत्यक्षाद्यन्यान्यत्वेन चतुर्णा
मपि एकजातीयप्रमाजनकत्वसंभवादित्यर्थः। व्यतिरेकिसाध्यकं इति। अनुमितित्वप्रयोजकसामान्यसामग्र्यभावादिति भावः।
अयेति। द्विविधत्वेन विशिष्याणान्ताहन्तो व्यभिचारः। एवं सति भेदकमाह। एवमिति॥ ॥ निरुपाधीति। साध्यसाधनव्यतिरेकसहचारे
णासाध्यानुमित्यप्रयोजकत्वात् अन्वयव्याप्तिरेव गृह्यत इत्यर्थः। नन्वत्रापि व्यतिरेकव्याप्त्युपन्यासे व्यर्थानुमितिचेत्त्रा। नियतव्यतिरेकस
हचाररूपायास्तस्या अन्वयव्याप्तिज्ञानार्थमेवोपन्यासादिति भावः। अन्वयव्याप्तिज्ञानं तु परस्य मानस्यमेव। न च न यव्याप्त्युपना ५८
सेविषयात् तज्ज्ञानमनुमितिजनकं। वादिवाक्यस्य नियायीजनकत्वात्। तथा च पत्रान्वयसंभवस्तत्रान्वयव्याप्तिज्ञापनाय नियतं

न्वयरूपासैवोपदर्शिता। यत्र तदसंभवस्तत्र तदर्थं नियतव्यतिरेकसहचाररूपा व्यतिरेकव्याप्तिरेवानवैवं नियमांशोपन्यासापवीक्षावैयर्थ्यमि
तिवाच्यं। तस्य व्यभिचाराभावप्रदर्शनपर्यवसन्नतया एतस्य व्यभिचारज्ञानविरहत्वावुपयोगात्। तस्यापि व्याप्तिग्रहोपयोगित्वात्। नवैवमप्य
प्रकालत्वं व्यलिंगभावेनैव व्यतिरेकसहचारस्यान्वयव्याप्तियाहकत्वात्। लिंगतयैव ज्ञापकस्य ज्ञाप्यमनुपपस्योपन्यासेनाकांक्षिताभि
धानेनाप्रसक्तालत्वात्। अत एवोपाधित्वान्वेदोचितावर्जितं तं प्रानसमपि व्यभिचारज्ञानं संभवतीतिज्ञाप्यव्यभिचारमनुपन्यस्योपाधिरूपन्यस्त
तइति सिद्धांतइति भावइत्याहुः। ननु यदि व्यतिरेकसहचारेणान्वयव्याप्तिज्ञानमात्रं जन्यतइतिमतं तदा न्वयमात्रसहचारजन्यान्वयव्या
प्तिज्ञाननस्तद्वैलक्षण्यमावश्यकं। न हि तत्कारणहेतुजन्यत्वात्। विषयकृतं च तत्त्व नास्तीति जातिरूपमेव तथावाच्यं। तन्न संभवति। चाक्षुष
त्वादिना परापरभावानुपपत्तेः। यदि चान्वयव्यतिरेकोभयव्याप्तिज्ञानं तेन जन्यतइतिमतं तदान्वयव्यतिरेकोभयसहचारजन्यतदुभ
यव्याप्तिज्ञानस्य तत्त्वविषयतया जातिरूपमेव वैलक्षण्यमपेयं। तदपि नयुज्यते। चाक्षुषत्वादिनैव संकरापत्तेः। न च व्यभिचारज्ञा
नविरोधिसहचारज्ञानस्य हेतु[illegible]त्वे लक्षणाभावान्नतत्त्वे जात्यमिति वाच्यं। सहचारस्य तज्ज्ञानस्य वा व्यभिचारज्ञानविरोधि
त्वाभावात्। तत्त्वेपि व[illegible]धूमादिव्यभिचारोपलंभादिति वैलक्षण्याधिकरणनिष्ठव्यभिचारोपलंभादिति वैलक्षण्याधिकरणनिष्ठ
व्यभिचारज्ञानविरोधि[illegible]चारज्ञानत्वेनोभयस्य हेतुत्वात्। यत्राधिकरणे साध्यसाधनयोस्तदभावयोर्वा सहचारग्रहस्तत्र हेतुसा
सह १

चिं॰ व्या॰ ध्याभावसामानाधिकरण्यात्मकव्यभिचारग्रहस्य सर्वथैवासंभवात्। ननु व्यतिरेकसहचारेणान्वयव्याप्तिज्ञानं व्याप्तिविशेषणकं लिंगविशेष्य
५८ कं वा जन्यते। व्यभिचाराभावविशेषणकं सहचारविशेष्यकं वा। नाद्य। तत्पूर्वमन्वयव्याप्तिज्ञानाभावात्। लिंगेंद्रियसंनिकर्षाभावाच्च। नांत्यः। विशेष
णज्ञानं विशेष्येंद्रियसंनिकर्षं च विना तद्व्याप्त्यभानात्। व्यतिरेकसहचारज्ञानसमानकाले तयोरभावादिति चेन्न। अत्र पक्षद्वयेप्युक्तत्वात्। इतरसाम
59 ग्रीसत्त्व एव तस्य व्याप्तिग्राहकत्वाभ्युपगमात्। विशेषणज्ञानादिसत्त्वेन्वयसहचारज्ञानेपि ततो व्याप्तिग्रह इत्येवाभिमते ननु तद्व्यतिरेकेपीति
तस्यान्वयसहचारस्य ज्ञानाभिषिक्तत्वात्। अन्यथा इतरकारणविरहे ततो न व्याप्तिनिश्चय इत्यन्वयसहचारस्यापि तद्हेतुत्वं न स्यात्। अन्वयेति
उभयसहचाराद्न्वयव्याप्तिरेव गृह्यत इति मते नेदमुक्तं। एवं। अन्वयव्याप्तिग्रहे। पक्षतावच्छेदकांतरप्रतीत्यनियमात्प्रकारांतरमाह। व्यति
केमिति। येषां केवलव्यतिरेकिणः भावरूपं साध्यमप्रसिद्धमपि सिद्ध्यति। अन्वयव्याप्तिज्ञानं तेन केविशेषणज्ञानादिविरहे व्यतिरेक
व्याप्तिज्ञानाद्वानुमित्युत्पादाभ्युपगमस्तेषां मतेन प्रकारांतरमाह। यद्वेति। तथा च पूर्वोक्तरूपेण व्यतिरेकसहचारस्य विशेषणसंनि
कर्षादिसत्त्वेन्वयव्याप्तिज्ञानहेतुत्वं। तदसत्त्वे च व्यतिरेकव्याप्तिज्ञानहेतुत्वमेव तस्येत्यनियम एव न तु पूर्वोक्तरसेनेवायं कल्प इति
भेयं। व्यतिरेकव्याप्तेरितिपंचम्यंतं॥ ॥साध्याभावेति। अत्र प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नः सन्योऽभावः प्रतियोगिवैयधिकरण्या ५८
वच्छेदकावच्छिन्नस्य साध्याभावस्य व्यापकत्वं व्यतिरेकिणि गमकताप्रयोजकमित्यभिमतं। अन्यथा रूपादिविरुद्धसंयोगादे

रूपादिगमकतापत्तेः। संयोगो साध्ये इव त्वादेरन्वयव्यतिरेकित्वाभावापत्तेश्च। केवलान्वयिभिन्नसाध्यकहेतोश्च तत्त्वेनावश्यं संग्राह्यत्वमेवाऽत्र न्यथा
न स्यात्त्रितयवह्निर्भावापत्तेः। नन्वेवमपि विभागव्यक्तिविशेषाभावस्य संयोगव्यक्तिविशेषाभावात्मकत्वं न स्यात्। तत्र संयोगरूपसाध्याभावस्य प्रतियो
गिसामानाधिकरण्ये यत्र न निरूढकस्य गमकता संयोजकस्य तत्रासंभवादिति चेन्न। तस्य केवलान्वयितया व्यतिरेकितया संग्राह्यत्वादित्या
कूतः। एवं हि यत्र संयोगव्यक्तिविशेषस्तत्र विभागव्यक्तिविशेष इति व्यतिरेकव्याप्तिप्रमायां न संयोगाभावविभागाभावयोर्गम्यगमकभावः कथं
स्यात्। उक्तरीत्या तस्य व्यतिरेकित्वाभावात्। अन्वयव्याप्यस्य रूपादेः शायां केवलान्वयित्वेनागमकत्वाच्च। न चैतदा तस्यागमकत्वमेवेति वाच्यं
एवं हि यत्र वह्निविरहस्तत्र धूमविरह इति व्यतिरेकव्याप्तियद्धूमस्यापि वह्निगमकतानापत्तेरविशेषादिति प्रश्नेनाहश्च व्यतिरेकव्याप्तिग्रह
स्य रूपादिविरुद्धसंयोगवि। शेषादिसाधारण्यात्। तयानन्यथात्वेऽगुरोरपि निरूढकस्यैव गमकत्वेन तस्य चात्रासंभवान्नदागमकत्वं तस्येष्टमेव
अतएव धूमस्यापि निरूढकज्ञानादेव गमकत्वं नान्यथेत्युत्तरं प्रतिभातीति दिक्॥ ॥अनुमितिमात्र इति॥ ॥यद्यपि व्यतिरेकिणि व्यापक
ताज्ञानं हेतुर्न तु व्याप्तिधीरपि तथापि तस्य व्यतिरेकव्याप्तिविषयतयैव हेतुत्वं। अन्वयव्याप्तिज्ञानेन तुल्ययोगक्षेमत्वात्। अन्यथाऽन्वयि
न्यपि व्यापकताज्ञानमेव हेतुः स्यात्। यथा चात्र नेशप्रतिक्षिप्तयोक्तं। ननु तथापि व्याप्तिज्ञानत्वमतिप्रसक्तमिति स्वव्याप्तिज्ञानत्वेन हेतुत्वं
वाच्यं। तच्च न व्यतिरेकव्याप्तिसाधारणमिति चेन्न। स्वव्यभिचारधीविरोधिधीविषयव्याप्तिज्ञानत्वेनैव हेतुत्वात्। एवं च परामर्शद्वयस्यापि

ग.प्र० नुगमयितुं शक्यत्वात्तस्यानुमितिमात्र[illegible]हेतुत्वसंभवाद्विशेषद्वयाभिधाने विरुद्धं तथापि व्यतिरेकानुमितौ व्याप्यतावच्छेदकावच्छिन्नाभावविषय
त्वमन्वयानुमितौ व्याप्यतावच्छेदकावच्छिन्नविषयत्वमनुभूयत इति फलभेद आवश्यके सामग्रीभेदोप्यावश्यक इत्यभिप्रायेण तदभिधानं। अत एव
६० टीकाकारैर्नेदं निरात्मकं जीवच्छरीरं सात्मकमित्यनुमित्यापादक[illegible]प्रदर्शनमिति भावः। अतिप्रसंग इति। पक्षधर्मताज्ञानं विनापि व्याप्तिग्रहमात्रादनुमित्या
पत्तिरित्यर्थः। अन्वयीति। अतिप्रसंगस्फुल इति शेषः॥ ॥पक्षानुमितिसंदेहघटितपक्षत्वमित्यर्थः। ननु नवग्राममात्रेण नासाधारण्यं किंतु तद्व्याप्
60 यत्वग्रहेणेत्यपरितोषादाह। किं चेति। वैधर्म्यमित्यस्यैव विवरणं जलादीति। वैधर्म्येति। पृथिवीत्वस्य हेतो वैधर्म्यरूपत्वादित्यर्थः। तथापीति। मि
लितस्याप्रसिद्धिरिति भावः। आचार्यमतमाशंकते। अथेति। एकेति। एकविशेषणविशिष्टतयोपस्थितइत्यर्थः। यद्वेति। अत्र त्रयोदशानां मतं त्रि
समूहालंबनीभूते कसंदेहे तावद्भेदानां प्रत्येकं कोटित्वसंभवादिति ध्येयं। यदि च त्रयोदशसंशयास्तदा शब्दवैरस्यसंशयोपस्थितभेदविशिष्ट
विनोपस्थितिधर्मिण्येतिमसंशयेन तावद्भेदसमुदायो विषयीक्रियत इति ध्येयं। एकाधिकरणेन तावद्भेदोपस्थितये उक्तसंशयानुसरणं। अ
न्यथा कोटिप्रसिद्धिं विना संशयस्याप्रसिद्धेर्निश्चयरूपापि तावद्भेदरूपसाध्यप्रसिद्धिर्भवत्येव। एकाधिकरणविशिष्टतावद्भेदसाधने ६०
चासाधारण्यनिरासार्थं जलादेर्विपक्षत्वप्रसिद्ध्या व्यतिरेकव्याप्तिग्रहणार्थं च। अन्यथा तेजो वा य्वादिद्वादशभेदस्य जलादावसत्वे त्रयो
दशभेदाभावस्य तत्राप्यसत्वात्तद्संभव एव स्यात्। व्यासज्यवृत्तिप्रतियोगिकाभावानभ्युपगमात्। प्रत्येकभेदसाधने चासाधारण्यात्। तथा चैकाधिकर

एपावच्छिन्नत्वस्य विशेषणाभावाद्विशिष्टाभावसत्वेन तस्यापि पक्षत्वसंभवान्न तदसंभव इति भावः। संवलिते ति। एकाधिकरणावच्छिन्नेत्यर्थः। साध्याभि
त्थ्य इति। अत्र वदंति। पृथिव्यां त्रयोदशभेदसंशये सति जलत्वेन तत्संशयः। तत्र जलभेदाभावस्यैव ग्रहात्। एकदेशाविरह निश्चयस्यापि समुदायसंश
यविरोधित्वात्। ननु माभून्नदा तत्संशयः। तद्व्यतिरेक निश्चयोपि नस्यात्। प्रतियोगि निश्चयस्याभाव निश्चय हेतुत्वात्। तथा च कथं तत्र व्यतिरेक
व्याप्तिग्रहः स्यादिति चेन्न। लाघवेन प्रतियोगिज्ञानत्वेन तस्य हेतुत्वात्। पृथिव्यां जलादि त्रयोदशभेदसंशयसत्वेपि जलत्वेन जलादित्रयोदश
भेदवदिति निश्चयस्यानुभवसिद्धत्वादिति। न च तद्ग्राहकमानाभावः। संशयरूपायामेव त्रयोदशाभावसिद्धौ सत्यां जलत्वेन जलादित्रयोदशभेद
समुदायाभाववत्त्वानेकदेशीभूत जलभेदाभाववत्त्वात्। यद्यत्समुदायैकदेशाभाववत्तत्तत्समुदायाभाववदिति सामान्यतो व्याप्ति
मूलकानुमानस्यैव संभवात्। न हि सामान्यव्याप्तिमूलकेप्यनुमाने प्रकृतसाध्यहेत्वोः सहचारनिश्चयापेक्षा। यथा तद्गृहं मैत्राभाववदि
त्यत्र। वस्तुतस्तत्रोक्तसंशयानंतरं त्रयोदशभिन्नत्वस्य तदभावस्य च निश्चयविषयत्वमपि न दुर्लभं। तदनुव्यवसायरूपेणैव निश्चय
न तत्प्रकारकत्वेनोभयोरपि विषयीकरणादिति। अत्राहुः। यत्र हि सामान्यतो व्याप्तिरनुगतव्याप्यतावच्छेदकाभावान्नानुमानांगमि
ति यत्र कृतेनोक्तत्वादुक्तानुमानं न व्यतिरेके निश्चायकं। प्राङ्गाशितानुमानमपि तद्वत् यास्मार्यमाणात्व हेतोरन्यथा प्रतीतौ व्यतिरेकाव्य
नुभयानवतारे प्राङ्गाशिता बुद्धेरसिद्धेः। यत्तु अनुव्यवसायेन निश्चयरूपाप्रसिद्धिरिति। तन्न। यादृशो हि निश्चयो व्याप्तिग्राहकोऽनुव्यवसाये

चिं॰ग्र॰ सतयात्वाभावात्राविषयविशेषणीभूतधर्मग्रहस्याप्तिधीहेतुत्वात्तत्वावसायेनतज्ज्ञानविशेषणात्तेननतदवगाहनादिति। वस्तुतस्तु। भेदसमु
दायाभावरूपस्यापि साध्यस्य। प्रसिद्धिरेवेति नोक्तमनुमानं संभवति। नचसंशयरूपैवतत्प्रसिद्धिरितिवाच्यं भेदसमुदायस्यतदभाव
६१ स्यचाप्रसिद्धत्वेनसंशयकोटित्वासंभवात्। प्रसिद्धत्वेततएवव्यतिरेकव्याप्तिनिश्चयसंभवादुक्तानुमानेवैयर्थ्यापत्तेः। तस्मात्तद्व्यप
61 तिरेकेवासंशयरूपासाध्यप्रसिद्धिर्नोगा। कोटिप्रसिद्धोनिश्चयरूपायाएवतस्याःसंभवात्। तदप्रसिद्धौसंशयस्याप्यभावात्। नचैका
धिकरणेपिनतावद्द्वेदोपस्थितयेसंशयानुसरणमितिवाच्यं। संसर्गविषयैकाधिकरणोपस्थितावपिव्यापकतावच्छेदकप्रकारेणासं
शयादप्यनुपस्थितेरितिभावः। योग्यानुपलब्धेरिति। ऐंद्रियकस्यप्रतियोगिनोनुपस्थितेरित्यर्थः। नयनेति। तत्प्रतीतौनयनोन्मी
लीनानंतर्यस्येत्यर्थः। योहीति। एवंचमनोमोन्याभाववन्मनस्त्वात्येनाभावोपिघटेप्रत्यक्षएव। तत्रापिप्रतियोगिसत्वविरोध्यनुपलंभस
भवात्तत्तद्विषयत्वेनैवाभावस्ययोग्यत्वादितिकेचित्। अन्येतुनाहिनाहृशानुपलंभोवश्यमभावग्राहयत्नेवेतिनियमः। अप्रतियोगि
ज्ञानविरहेऽभावग्रहानुदयात्। किंत्वभावग्रहणकारणप्रतियोगिज्ञानादिसद्भावेसतियोग्यमेवाभावंग्राहयतीति। मनस्त्वान्यता
भावस्तुनयोग्यः। योग्यप्रतियोगिकस्यैवसंसर्गाभावस्ययोग्यत्वात्। अतोघटेसनगृह्यते। रूपवदन्योन्याभावस्तुयोग्यापिवाधाव ६१
धिकरणेयोग्यताविरहान्नगृह्यते। अमोन्याभावग्रहेतस्याःप्रयोजकत्वात्। अतएवसंसर्गोन्योन्याभावयोर्ग्रहेप्रतियोग्यधिकरण।

योग्यतानंचमितिसिद्धांतउत्पादुक्तः। अनयोश्च कल्पयोर्विनिगमकोऽनुभव एवेति ध्येयं। अनुपलब्धिश्च यादृशी अभावोपलंभंगता तादृशी।
प्रकाशिता यत्प्रत्यक्षप्रकाशे। नन्विति। नन्वैंद्रियकानुपलब्धिमात्रमित्यर्थः। नन्वधिकरणेप्रतियोगिसत्त्वस्याप्रसिद्ध्यातन्निरूपितविरोधिना
संभवाद्ग्राह्यानुपलब्धिरसिद्धेत्यत आह। अधिकरणइति। तथा च तर्कितमेतद्विरोधित्वनिरूपकं न तु वास्तवमिति भावः। तमेव तर्कमाह
यदीति संभोयदि पिशाचात्मा स्यात् पिशाचात्मकतया प्रमाविषयः स्यात्। यो यदात्मा सन्तदात्मकतया प्रमाविषयइति। अत्र दृष्टांतः। स्तंभ
वदिति। विशेषव्याप्तौ तु व्यतिरेकदृष्टांतो यो। अन्वये तु पिशाच एवेति द्रष्टव्यं। एतेनोपलंभमवद्ये यदि पिशाचत्वदेशपरं तदा व्याप्यासिद्धिः। यदि स्था
नपरं तदेष्टापादनमिति परास्तं। स्तंभेयदि पिशाचतादात्म्यं स्यात्तदा स्तंभतादात्म्यवदुपलभ्येत। स्तंभेयतादात्म्यं तदुपलभ्यतइति
व्याप्तिरित्यर्थइत्यन्ये। नन्वाकाशादितादात्म्यस्य शब्दाश्रयत्वादिरूपेन पाजातित्वाभावाद्घटादिष्वविद्यमाने ग्रहणे तदुपलंभप्रसंगापादयितुं श
क्यतइतितदन्योन्याभावस्तत्र कथं प्रत्यक्ष इति चेन्न। आकाशादिघटयोरभेदे आकाशत्वादेरपि जातित्वापत्तेरात्रवणकत्वात्तदापा
दनसंभवात्। नह्येकव्यक्तिकत्वमपहाय आकाशत्वादीनामन्यज्जातित्वे बाधकमस्तीति भावः। यद्यपि सामान्यविशेषसमवाया
न्योन्याभावेयमपि कल्पो न संभवति तथापि घटादिवृत्तितादात्म्यत्वेनैवतद्वदुपलंभापादनं शक्यमिति ध्येयं। पक्षतावच्छेदकना
नात्वइति। अत्र वदंति। पक्षतावच्छेदकस्य नानात्व एकत्वे वा पदार्थसर्वपक्षव्यक्तिषु केवसमूहालंबनरूपासाध्यसिद्धिरुद्देश्या भवति

सिं॰ अ॰
६२
62

तदा पक्षव्यापिकविशिष्टांशे साध्यसिद्धौ जातायां नांशतः सिद्धसाधनं। तदंशेऽपुद्देश्यप्रतीतायाः समूहालंबनरूपसाध्यप्रसिद्धेर् जातत्वा
त्। यदा तु समूहालंबनाघटासीनायाकाचित्साध्यसिद्धिरुद्देश्या भवति तथा सत्यपक्षव्यापितद्वर्जनीयमेव। पक्षतावच्छेदकैक्यपि
तदंशे साध्यसिद्धेर्नातत्वेन तदुद्देश्यप्रतीतिविच्छेदात्। तस्माद् एतद्विंत्यमिति। अत्र ब्रूमः॥ पक्षतावच्छेदके सेष्यंशतः सिद्धसाधनेन भवस्य
वा पक्षतावच्छेदकधर्मसामानाधिकरण्येन क्वचिदपि पक्षे साध्यसिद्धौ सिद्धसाधनं भवत्येव। नांशतः सिद्धसाधनं नानाशसिद्धेरे
वानुमानसाध्यत्वात्। तदसिद्धौ तत्र केवनास्ति। नहि पक्षे साध्यसिद्धिमात्रेण तत्। धूमवत्त्वेन पर्वते वह्निनिश्चये सिद्धसाधनप्रसंगात्।
तस्मात्प्रकृते घटत्वेन साध्यसिद्धावपि पक्षतावच्छेदकधर्मसामानाधिकरण्येन तदसिद्धेर्नोक्तदोषः॥ नन्वेवं पृथिवीत्वस्य पक्षता
वच्छेदकत्वात्सामानाधिकरण्येन वह्न्यट साध्यसिद्धेः सिद्धसाधनमेवास्त्विति चेन्न। सर्वपृथिवीत्वस्य पक्षतावच्छेदकत्वात्। तदिदमु
क्तं स वा पृथिवीइतरभिन्नेत्युद्देश्यप्रतीतेरभावादिति। अत एवाग्रे सर्वत्वेन रूपेणानपहाने ति वक्ष्यति। यत्तु समूहालंबनात्मसिद्ध
उद्देश्यनायां पक्षतावच्छेदकनानात्वेपि नांशतः सिद्धसाधनमिति तत्तथैव। सिसाधयिषाविरहस्थल एव तन्नांशतः सिद्धसाधनस्योक्त ६२
त्वादिति। अन्यथेति। यद्यनुमितिविषयैकदेशसिद्ध्यापि सिद्धसाधनमित्यर्थः॥ ननु धूमवाननित्यो दिना सामान्यतो निश्चिते विशेषरू
पेणासंशयस्योपपादितत्वेपि विशेषरूपेणानिश्चिते सामान्यतः संशयो नोपपादितः। तथा सतीदं पर्वतत्वेन वह्निनिश्चये पर्वतत्वेन तत्सं

शयप्रसंगात्। किंचायदवच्छेदेन यत्र यत्कोटिविनिश्चयः तदवच्छिन्नत्वज्ञानं तत्र तत्कोटिकसंशयविरोधि न तु तत्प्रकारकतत्कोटिकसंशयविरो-
धि। गौरवात्। अत एव धूमत्वेन व्याप्तिनिश्चये सति धूमत्वेनोपस्थितायां व्यक्तौ विशेषतोऽपि न संशयः। तदुक्तं। यत्र हि पक्षावच्छेदकधर्मदर्शनेना-
नत संशयः। तत्र सामान्यविशेषे चेतीत्यपरितोषादाह॥ यद्वेति। पृथिवीत्वेनेति। घटादिभिन्नपृथिवीत्वेनेत्यर्थः॥ अन्यथा पूर्वोक्तगत्या सि-
द्धसाधनात्। अत एवेश्वरानुमानेऽपि प्रतिपत्तिविषयमात्रसंग्राहकपक्षतावच्छेदकनिर्वचने निर्बन्धः। अन्यथा कार्यत्वेन तावतामपि पक्ष-
त्वे दोषप्रसंगात्। न चाशंकनीयः सिद्धसाधनभियैव तादृशपक्षतावच्छेदकनिर्वचनं तत्र। तथा च पक्षतावच्छेदकैक्येन तदभ्युपगतमेवेति
वाच्यं। एतन्मते सिद्धसाधनभियैव तन्निर्वचनात्। अन्यथा कार्यं सकर्तृकमित्यत्र घटादावंशतः सिद्धसाधनेऽपि रणोद्भावितकार्यत्वेन क्षित्यादि-
कमेव पक्षइत्युद्भावनेनैव विजयेत वादीति भावः। एवं मतेऽप्यन्वयित्वमुपपादयति। घटसाधारणेति। अन्वयेति। उक्तरीत्या हेतुसाध्ययोः सा-
वरूपभावेऽप्यव्याप्तिचारानुपस्थितिरेशायामन्वयव्याप्तिप्रतिसंधानसंभवादिति भावः। उक्तप्रकारस्याकाशादावसंभवात् तदर्थं प्रश्नसामानाधिक रण्य
कारांतरमाह। अथवेति। एतच्च व्यासज्यवृत्तिप्रतियोगिकाभाववादिमतेनाऽन्यथा जलादौ तेजोवाय्वादिभेदसत्त्वेन त्रयोदशभेदाभाव-
संभवेन विपक्षतानुपपत्तेर्व्यतिरेकव्याप्तिग्रहानुपपत्तेः। न समाप्त्या व्यासज्यवृत्तिधर्मस्य साध्यतावच्छेदकत्वे तदवच्छिन्नाभाव एकसत्त्वे-
ऽपस्तीति भावः। अत एव नानासाधारण्यमपि। निश्चितसाध्यतावच्छेदकावच्छिन्नवत्त्वस्याहित्त्ववति। प्रकृते च न तथा। एतस्य काभाव

वं.अ० स्वव्यासत्यवृत्तिधर्मावच्छिन्नत्वाभावात्। अन्यथैकत्रापि द्वावितिवद्व्याप्तिः। अतएवायेवह्न्यातीतावदभावयोगीयत्रसपक्षोभवतिनन्तुतदेक
देनाकतिपयाभाववान्। साध्यतायास्तावत्पर्याप्तेरितिचेन्नैवंसाध्यतावच्छेदकेनरूपेणसाध्यप्रसिद्धिःकथमितिवाच्यं। भिन्नभिन्नाधिक
६२ रणस्थानामप्यभावानांघटपटोदयत्वादिनाज्ञानसंभवात्। भिन्नाधिकरणकघटयोर्द्वावितिधीवत्। यत्तुप्रत्येकव्याप्तिभिः प्रत्येकाभावा
नामेवसाध्यत्वेनासाधारण्यानुमितिविषयसाध्यवद्व्यावृत्तानहितद्भवति। सत्प्रतिपक्षोत्थापकतापक्षोन्तथैवतस्यदोषत्वनिर्वाहात्।
63 अनुमितिविषयमिलितान्योन्याभावात्मकंचसाध्यमन्यत्रनप्रसिद्धं। येनासाधारण्यंस्यादितितन्नित्यंतथापिप्रत्येकाभाववद्व्यावृत्त
त्वज्ञानेनप्रत्येकाभावाभावसाधनस्यनिष्फलत्वेनमिलिताभावसिद्धेःमेलकस्यातिरिक्तस्याभावात्। भाववामेलकानामसि
द्धोसर्वथातत्सिद्धेरिति। केचित्तुसाधारण्यंदशाविशेषेदोषइतियदातदेवतारोनास्तितदाकविदयमपिकल्पःसंभवतीत्याहुः।
सर्वसाधारण्यप्रकारांतरमाह। यद्वाजलमिति। यद्यप्युक्तानुमानाज्जलभेदस्यासिद्धेःसिसाधयिषितत्रयोदशभेदस्यासिद्धिरेव
यापितेजःप्रभृतिद्वादशभिन्ननिष्ठभेदप्रतियोगित्वंसाध्यमतोनोक्तदोषः। अन्येतुतेजःप्रभृतिद्वादशभिन्नेतज्जलभेदवत्जल
निष्ठभेदप्रतियोगित्वादित्यनुमानांतरात्तत्सिद्धिरित्यभिप्रेत्यैतदुक्तमित्याहुः। यत्तुजलेद्वादशभिन्नप्रतियोगिकभेदभानेजल ६२
भेदस्यभाने। सामानसंवित्संवेद्यत्वादिति। तन्तुच्छं। विशेषणविशेष्यादिभेदेनसमानसंवित्संवेद्यत्वासिद्धेः। नत्प्रतियोगिकभेदभासमानेन

ह्यस्याउत्नेपि

न्निष्ठभेदप्रतियोगित्वं भासतइत्युचितं। अतएव गवयेगोसादृश्ये भासमाने समानसंवित्संवेद्यतया गवि गवयनिष्ठसादृश्यप्रतियोगित्वेज्ञानं नतु गवयप्र
तियोगिकगोसादृश्यज्ञानमपि। अन्यथा [illegible]पमानस्यप्रत्यक्षएवांतर्भावादनुमानांतर्भावश्चासाजुपपन्नेरिति। इतरभावान्योन्याभावस्यसाध्यत्वादि
ति। इतरभावप्रतियोगिकतावदन्योन्याभावत्वेनैवरूपेण। यदिसाध्यतातदाऽभावबहिर्भावादनुमानांतरापेक्षा। यदिचाभावप्रतियोगिकस्वरूपभेदेन
त्वेमप्रतिपन्नत्वादिप्रतियोगिकत्वयोरन्योन्याभाववत्त्वेसाध्ये यदिवाइतरत्वावच्छिन्नसामान्यान्योन्याभाव एकएवसाध्यस्तदाऽभावभेदोपिप्रथ
मानुमानेनैवेतिमंतव्यं। नन्वभावप्रतियोगिकाभावानभ्युपगमेनसामान्यान्योन्याभावोपिभावप्रतियोगिकःसिध्येन्नाभावप्रतियोगिकइतिचेन्ना
भावीवसाधारणप्रतियोगितावच्छेदकभेदेनाभावप्रतियोगिकस्याप्यतिरिक्ताभावस्यस्वीकारावश्यकत्वात्। अन्यथा कार्यवत्त्वेसाध्येतद्धेत्वनि
चारिणोपिप्रमेयत्वादेस्तद्धेतुतापत्तिः। कार्यत्वस्यध्वंसवृत्तित्वात्प्रमेयत्वादिसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकत्वात्। तस्मात्का
र्येनापिभावाभावसाधारणकार्यत्वावच्छिन्नप्रतियोगिकोभावोभ्युपेयस्तथेहापि। ननुपृथिवीतरत्वस्यपृथिव्यन्योन्याभावस्याभावेऽभावेनभावाभा
वसाधारणसामान्यान्योन्याभावप्रतियोगितावच्छेदकमेवात्रदुर्निरूपमितिचेन्न। जलादिभावाभावविशेष्यकसमूहालंबनसंभवेनतज्ज्ञानविषे
ष्यत्वस्यतादृशस्यसत्त्वात्। नचाभावबहिर्भावपक्षेऽभावस्यैवसपक्षत्वान्नतोऽसाधारण्येनचयित्वं व्याहत्तावसाधारण्यमितिवाच्यं। तस्यसपक्षत्वाप्र
तिसंधानदशायामस्यासिमतत्वात्। अभावस्याभावांतरानात्मत्वादेवनसपक्षत्वमितिप्याहुः। तेनसममितिाय्यद्यप्यभावस्वरूपभेदस्यपृथिवी

जलादिस[illegible]नान्या[illegible]घस्तु एवं तथाप्यभावे भिन्नत्वबुद्धिजनयोग्यत्वमनुगतमस्तीतिभावः। न चात्मावयविनियम्भिचारः। पृथिव्यादिरूपस्याभावस्य
चिं॰अ॰ रूपभेदस्य तत्तदभावादितिवाच्यं। घटादिरभावभिन्न इत्यबाधितप्रतीत्या भेदत्वेन [illegible]स्यापि तस्मिन्ननन्यगत्याहत्वास्तु पमानात्। प्रतीतिवैचित्र्यस्यान्यथा
नुपपत्तेरितिदिक्॥ पृथिवीत्वभिन्नेति। पृथिवीत्वासमानाधिकरणधर्मत्वावच्छिन्नात्यंताभावइत्यर्थः। आकाशादेरप्यस्यापसिद्धिरित्यस्वरसादाह।
६४ जलत्वादीति॥ तत्रादिति। योग इति पञ्चधर्मतावलक्षणसाध्यसंदेधाभिधानं। अत्यंताभावस्यैव तथात्वं॥ अन्यथाप्रमेयत्वविरोधात्॥ अत्र ज
64 लत्वादिनियतत्वेहाघभावोपिसाध्यइतिन पूर्वात्रेदः। योगोमेलक इत्यन्ये। ननु प्रत्येकसाध्यतावोसमूहालंबनानुमित्या तदभावसिद्धा
वस्याधारणं मिलितसाध्यतापाम प्रसिद्धिरित्यनुशयो नोव्यासज्यप्रतियोगिकाभाववादिमतमालंबते। मिलितानामिति। किंचिदिति।
त्रयोदशानां संख्यासमानशीलस्यताद्दशापेक्षाबुद्धिविषयत्वस्य सत्वादितिभावः। एतेनताद्दशबुद्धिविषयत्वावच्छिन्नानामेवाभावानां तेजः
प्रभृतिषु सत्वेन तेषां विपक्षत्वार्थमेकाधिकरणावच्छेद एव मेलकपदार्थो वाच्यः सचाप्रसिद्ध एवेति निरस्तं। व्यासज्यवृत्तिधर्मस्य साध्यता
वच्छेदकत्वाभ्युपगमेन तदवच्छिन्नाभावस्य तदेकदेशकृतिपयाभावसत्वेपि तेजः प्रभृतिषु सत्वेन तेषां विपक्षत्वसंभवात्। न चाभावेषु व्या
सज्यवृत्तिधर्म एव नास्तीति वाच्यं॥ अभावे संख्यानास्तीति विशेषदर्शनवतस्त्रयोदशत्वव्यवहारानापत्तेः। न च व्यासज्यवृत्तिजातिरस्त्येवा ६४
दिविषयत्वेनैवेक इति वाच्यं। अव्यासज्यवृत्तिधर्मस्य प्रत्येकाधिकरणविश्रान्तत्वेनैकस्मिन्नप्यभावे त्रयोदशत्वादिव्यवहारापत्तेः। एकत्वा

पि घटे घट इति प्रतीतिवत्। अत एव जलादौ न त्रयोदशाभावा इति सर्वेषां प्रतीतिः। तस्मादेकामेनापि व्यासज्यवृत्तिधर्मोऽभ्युपेय इति। तावतीति। व्यास
ज्यवृत्तिसाध्यतावच्छेदकस्यापि तावत्त्वपर्याप्तेरिति भावः। एकाधिकरणावच्छेदस्यापि मेलकपदार्थत्वेन साध्याप्रसिद्धिरित्याह। यद्वेति। अ
न्योन्याभावत्वादिति। इतरनिरूपणाधीननिरूपणाकाविशेषितप्रतियोगिकान्योन्याभावत्वादित्यर्थः। तेन तेजोऽन्यप्रमेयत्वावच्छिन्नाभावादौ न व्यभि
चारः। यत्र भावाविशेषितप्रतियोगिकान्योन्याभावत्वादित्यर्थ इति। तन्न। तेजोऽन्यप्रमेयमिति ज्ञानविशेष्यत्वात्तन्नाभावे तथापि व्यभिचारात्। तेजोभा
वो हत्वन्योन्याभावत्वादित्यर्थे तन्न इत्यन्ये। किं चेति। अत्र निरधिकरणानामेव जलादिभेदानां प्रसिद्धौ सपक्षाभिः ख्याया प्रत्येकव्याप्तिभिरपि
प्रत्येकभेदसाधनेनासाधारणमिति हृदयं। ननु गुरुत्वे न जलमात्राभेदः तेजःप्रभृत्यभेदाश्च लिंगान्तरैः साधनीयाः। किंच। इतरभेदनिषेधो नेतराभे
दः अन्यतरभेदाभावेनापि समुदायभेदाभावात्। एकसत्वेऽपि द्वयमिह नास्तीति प्रतीतेः। अन्यथा चतुर्दशभेदरूपसाध्यस्याभावाप्रसिद्ध्या मति
रेकव्याप्तिग्रहप्रसंगादित्यत आह॥ चतुर्दशेति। प्रत्यक्षादिना प्रत्येकभेदस्य पक्षे निश्चयेनान्यतराभावेनापि चतुर्दशाभेदस्य बाधान्नसत्प्रतिप
क्ष इति भावः। अभावपदार्थमादाय चतुर्दशत्वबोध्यं। विरोधेनेति। प्रमाणसिद्धप्रत्येकचतुर्दशभेदविरोधेनेत्यर्थः। लिंगत्वे वेति। तत्रापि तत्सा
ध्याधिकरणजलाद्यन्यतरत्वस्य लिंगत्वसंभवादिति भावः। यद्यपि पृथ्वीतरभेदस्य बाधेन जले न सिद्धिप्रसंगः। जलेतरभेदसिद्धौ विष्टापत्ति
स्तथापि [illegible] एकत्र [illegible] व्यभिचारादित्युपलक्षणमसाधारण्यादिति द्रष्टव्यं॥ ॥छ॥ इच्छादीति। इच्छाद्यवच्छेदकत्वादित्यर्थः। तस्येति॥

चिं॰ अ॰ योग्यानुपलब्धेरभावादितिभावः।कार्यत्वादिति।भावकार्यत्वादित्यर्थः।ज्ञानेनेति।घटादेरपि सपक्षत्वापत्तौ ततो हेतुव्यावृत्त्यावसाधारण्यमित्यत आह।
ज्ञानसमानाधिकरणेति।आत्मघटादिसंयोगस्य घटादौ सत्वाद्दोषतादवस्थ्यमित्यत आह।ज्ञानकारणीभूतेति।तादृशसत्वादेर्घटादौ सत्वा
६५ द्दुक्तदोषतादवस्थ्यमित्यत आह।संयोगेति।आत्ममनसोः सपक्षत्वनिरासायाह।कार्येति।नच प्राणेति प्रसंगः।आत्मप्राणसंयोगस्यान्यथासि
द्धतयाज्ञानाहेतुत्वादिति वक्ष्यमाणत्वादिति भावः।शरीरावयवस्य सपक्षत्वानिश्चयदशायामेवास्यावतारइतिनान्वयित्वमाशंकनीयम्।श
रीरएवेति।यद्यप्युक्तं सात्मकत्वं शरीरावयवेप्यस्ति तथापि तत्र सिद्धान्वयित्वमसाधारण्यं वेति भावः।दोषांतरमाह।असाधारणेति।इच्छा
समवायिकारणेति।सिद्धौ संयोगासमवायिकारणकत्वशंकापि नास्तीत्यत आह।इच्छेति।भावकार्यत्वादिति शेषः।इच्छाव्यक्तिपक्षके शब्दज
शब्दे व्यभिचारः स्यादितिकिन्तुजातिपक्षकमुक्तं।नित्येति।स्नेहत्वे हि व्यभिचारादाह।नित्येति।।नत्वनित्यमात्रेंद्रियग्राह्यत्वं।अतो मनोग्राह्य
त्वेनन दोषतादवस्थ्यमिति ध्येयं।एतच्च गुणविशेषाणां जातिविशेषणं।अन्यथात्मैकत्वेनित्यमात्रेंद्रियग्राह्यजात्यभावेन व्यभिचाराभावा
त्तद्वारणाय विशेषणादानानुपपत्तेः।आत्मैकत्वपक्षेत्वन्त्यपक्षे संख्यात्वजातौ व्यभिचारादाह।विशेषेति।शब्दजशब्दमात्रवृत्तिजातौ
व्यभिचारादाह।साक्षादिति।साक्षाद्व्याप्यत्वं जातेरेवेति स्वरूपनिर्वचनपरं जातिपदं।यदि च तद्व्याप्यजात्यव्याप्यत्वगर्भं तदा शब्दज ६५
शब्दसंख्यान्यतरत्वे व्यभिचारवारकमेवतदिति ध्येयं।इंद्रियत्वेन नित्येंद्रियग्राह्यत्वं विवक्षितं नतु तन्मात्रग्राह्यत्वं एवं चजातिविशेषणत्वे

पिनद्दोषइतिवाच्यं॥सवेति।सकिंचिदवच्छेदेनसंयोगोसमवायिकारणमित्युद्देश्यविधेयभावव्यत्यासेनयोज्यं।अं।अतएवतदनुकूलतर्कमाह।आत्मसंयोग
मात्रस्येति।नचैवंसंयोगत्वादितिहेतुत्वसंभवइतिवाच्यं।असमवायिसंयोगत्वादितिविवक्षितत्वादि[illegible]त्याकूतः।यद्वेति।अ।उभयत्राप्यवच्छि
न्नत्वज्ञानेनसमानसंवित्संवेद्यतयावच्छेदकत्वस्यापिविषयीकरणात्साध्यप्रसिद्धिरिष्टव्या।सिद्धसाधनभयादाह।सामान्यतइति।अतएवेति।सामा
न्यतःप्रसिद्धोसिद्धसाधनाद्यनवकाशादेवेत्यर्थः।व्यतिरेकव्याप्तिंदर्शयति।स्वशरीरइति।ननुशरीरेसात्मकत्वेबाधकाभावादितिशरीरविशे
षकवुद्धिरपितदनंतरंसुकरैवेत्यरुचेराह।उपायस्येति।संस्कारजन्येति।गुरुत्वाद्यजन्येत्यपिविशेषणात्तेनपतनादौनव्यभिचारः।प्रयत्नेति।याकि
येत्यादिव्याप्तेरितिभावः।एवंचेति।सत्त्वमात्रस्यात्मन्यपिसत्त्वात्तेनहेतुव्याहत्यावसाधारण्यमित्यतउक्तंशरीरत्वमिति।चेष्टावत्त्वादिति॥चेष्टावच्छ
रीरत्वादित्यर्थः।तेनशरीरावयवेनव्यभिचारः॥आत्मभिन्नत्वइति।आत्मनोपिसाध्यवत्त्वेऽसाधारण्यवारणायसत्यंतं॥मृतशरीरस्यापिभो
गाधिकरणतयातत्राप्युक्तसंयोगसत्त्वेनसपक्षात्तत्पाततश्चेष्टावत्त्वहेतुव्याहत्यावसाधारण्यवारणाय।आत्मविशेषगुणकारणेति।नचका
दाचित्कभोगाधारत्ववच्चेष्टावत्त्वमपितत्रास्तीतिवाच्यं॥मृतशरीरस्याप्यद्यत्वेवर्तमानचेष्टावत्त्वस्यसात्मकत्वलिंगत्वात्।मृतशरीराव
संयोगजनकतदवयवात्मसंयोगमादायमृतशरीरावयवेपिसाध्यसत्त्वेनासाधारण्यंस्यादतउक्तंविशेषेति।भेरीदंडसंयोगावच्छेदकनक
परशरीरादिसंयोगमादायमृतशरीरेसाध्यसत्त्वेनोक्तदोषतादवस्थ्यमित्यतउक्तमात्मेति।यद्यपितस्यापिस्वगोचरसाक्षात्कारजनकत्वे

चिं॰अ॰ न्दोषतादवस्थ्यं न यातः ज्ञानातिरिक्तात्मविशेषगुणाकारणत्वं जन्यात्मविशेषगुणत्वावच्छिन्नकारणत्वं वा विवक्षितमिति नोक्तदोषः। मनसः पक्षत्व
६६ निरासायायाह॥ भोगानधिकरणत्वादीति। ननु यस्याप्येतदेव फलं। न चात्ममनसोरपि हेतुसत्वे व्यभिचार इत्यत आह। आत्मेति। अवृत्तीति। अतिप्रसं
गभिया शरीरावच्छिन्नात्ममनोभ्यां प्राणस्य संयोगो हेतुर्वाच्य इत्यात्मन्यपकत्वाच्छरीरप्राणसंयोगेनैवान्यथासिद्धिरित्यर्थः। ननु च नात्मतया श
66 रीरस्यापि भोगानधिकरणत्वेन तद्वृत्तिसंयोगवत्वं तत्र वाधितमित्यनात्मनोपि भोगाधिकरणत्वं साधयति। भोगाधारत्वमिति॥ सकलेति। न च
भोगाधिकरणपदस्य स्वरूपासिद्धिवारकत्वेन वैयर्थ्यमिति वाच्यं। आप्यतावच्छेदकविकासकविशेषणतथात्वाभावादित्याहुः। यत्तु सक
लात्मवर्तित्वात्मत्वे सकलवृत्तित्वे व्यभिचारीति। तन्न। घटुसकलपदस्य यावत्पदार्थ एवकृत्वेपीति। ननु भोगानधिकरणवृत्तित्वमत्रोपाधिः
अन्यथा रूपाधारत्वादीनामपि रूपादिसमवायिभिन्नवृत्तित्वानुमानापत्तिरित्यत आह। तार्किकरीतिरिति। तथा च शरीरे सुखमित्या
दितदाधारत्वानुभवो नस्यादित्यनिष्टप्रसंगात्मकतर्केण हेतोः साध्यव्याप्यत्वेनोपाधेः साध्याव्यापकत्वं। अत एव न रूपाद्याधारत्वप्रति
वेदिरपि। तन्वेतादृशतर्काभावादिति भावः। केचित्तु ससाध्यीमत्वे संदिग्धानैकान्तिकः। साध्याभाववत्तया निश्चिते तथा हेतुसंदेहात्। द्विपत
आह। तार्किकरीतिरिति। तथा चोक्ततर्कवशादत्र व्याप्तिग्रह इति भाव इत्याहुः॥ ॥आश्रितत्वेति॥ आश्रयत्वेत्यर्थः। साध्यानिश्चयेवि ६६
नेति। तदवच्छ्राप्येतरत्तन्निश्चायकसाकल्यगर्भतया तस्य क्वचिन्निश्चयेसत्येवात्मलाभसंभवात्। अन्यथा तन्निश्चायकाप्रसिद्धौ तदसंभवादिति

भावरूपत्वात्॥ वस्तुतः साध्यतावच्छेदकप्रकारेण साध्यप्रसिद्धिरनुमानाङ्गं। सा च न संशयरूपा। तादृशकोटेरप्रसिद्धेः। प्रसिद्धौ वा तन्निश्चयरूपैव से
ति तत्त्वं। साध्यप्रसिद्धिरिति। एतच्चेच्छाद्वयत्वाश्रयाश्रितेति यदि सामान्यतो दृष्टावतारस्तदा इष्टं वा। यदि चेच्छाद्वयाश्रिते। ति सामान्यतो दृष्टं तदाद्व
यत्वस्य प्रकारतया तदाश्रितत्वस्य वैशिष्ट्यमर्यादया भानेनाश्रितत्वरूपसाध्यतावच्छेदकावच्छिन्नस्य द्वयत्वस्य प्रसिद्धत्वात् तत्प्रसिद्ध्यपेक्षा। न वि
रोधात्। एवं चान्वयित्वापादनमप्येवं विरुद्धम्। तस्माद्यदि द्वयाश्रितेत्येव सामान्यतो दृष्टं तदा इच्छायामेव साध्यप्रसिद्धिरिष्टैव। अत एवेच्छा विशेष्य
कप्रतीत्यर्थं व्यतिरेक्यवतार इति ग्रन्थकृतैवोक्तं। अन्यथा निष्प्रयोजनमेव तदवतार इत्येव ब्रूयात्। सामान्यतो दृष्टेति। वस्तुतो मानान्तरादुपस्थिता
नामपि न भानं। अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमादिति भावः। इत्यपीत्यस्यारस्योद्भावनं। तद्बीजं तु यदीच्छाश्रयसाष्टद्वयाभिन्नत्वे
न ज्ञानं तदा साध्याप्रसिद्ध्या व्यतिरेकिणोऽप्यनवकाश इति तत्समर्थनमप्यर्थकं स्यादिति ध्येयं॥ ॥ छ॥ व्यतिरेकिणीति। वस्तुतस्तु साध्याभावव्याप
काभावप्रतियोगित्वमेव गमकं न तु साध्याभावत्वेन तस्योपस्थितिरपि तन्त्रं गौरवादिति येन मतं तेन तन्मतमुपन्यस्यति। अन्ये त्विति। अत्रास्वरस
बीजमभाव एवेत्यवधारणं॥ वह्न्यभावादेर्धूमाद्यभावव्याप्यत्वे यह हेतुह्रदादेर्भावस्यापि सिद्ध्यविरोधात्। भावरूपसात्मकत्वादेरपि
सिद्ध्यविरोधाच्च॥ इत्याने व विशेषः। यदत्र साध्यप्रसिद्धिरप्यङ्गमिति। यस्य भावस्येति। यदात्मकतया गृह्यमाणस्य व्यापको हेत्वभावस्त
दभाव एव व्यतिरेकिणि सिध्यतीत्यर्थः। तेन दुःखस्य दुःखाभावात्मकतया गृह्यमाणस्य व्यापकतया यत्र हेत्वभावो गृहीतस्तत्र दुःखविशि

वि॰ अ॰ ष्टानुमितिरनुभवसिद्धा समर्थिता भवति। अन्यथा सुखविरहस्यैव सिद्धिप्रसंगादित्याहुः। इतरस्य जलादेरिति। ननु इतरपदार्थान्तर्गतो नात्मादिव्यापक
६७ त्वं घटादौ त्वाभावस्यासंभवि। संभवे वा तदत्यन्ताभावसिद्धेरुचितत्वेन तदन्योन्याभावसिद्ध्युपवर्णनविरोधः। हेत्वभावव्याप्यतया गृहीतस्यात्यन्ताभाव
एव व्यतिरेकिणा सिध्यतीत्यभ्युपगमादिति चेत्। अत्राहुः। जलादिपदं जलादितादात्म्यपरं। न चैवं तदत्यन्ताभाव एव सिद्ध्येदिति वाच्यं। यथा
हि हेत्वभावव्याप्यतया गृहीतस्यात्यन्ताभावः सिध्यतीति नियमस्तथा तद्वद्भिन्नान्योन्याभावः सिध्यतीत्यपि नियम एव। एवं च तस्यात्यन्ताभावद्
67 रुपलक्षणात् तद्वद्भिन्नान्योन्याभाववत्त्वमपि द्रष्टव्यं॥ व्याप्याभाववत्त्वानावश्यंभावादित्यपि द्रष्टव्यं। केचित्तु जलादितादात्म्यात्यन्ताभावस्यैव जलाद्यन्यो
न्याभावरूपतया तत्सिद्धावविरोधः। जलाद्यन्योन्याभावात्यन्ताभावस्य च जलत्वादिरूपतया पुनर्जलाद्यत्यन्ताभावस्यापि जलाद्यन्योन्याभावरूपत्वा
त्। यत्पदार्थात्यन्ताभावरूपत्वं यस्य तस्य तत्पदार्थात्यन्ताभावकत्वात्। अत एवात्यन्ताभावतत्प्रतियोगिनोः परस्परविरहरूपतानियमः। न च
जलाद्यन्योन्याभावात्यन्ताभावस्यैव जलत्वादिरूपत्वमिति वाच्यं। अपसिद्धान्तात्। अत एवोक्तं ग्रंथकृता। अन्योन्याभावात्यन्ताभावस्तु प्रति
योगिवृत्तिरसाधारणो धर्म इति। एकेनैवाभावेन तदन्योन्याभावतत्तादात्म्यात्यन्ताभावव्यवहारोपपत्तौ तदन्यतमकल्पने मानाभावाच्च। नन्वे
वं जलत्वत्वादिरूपानैव विनाशो भावो न निरूप्येत। प्रतियोगितावच्छेदकावच्छिन्नज्ञानस्य तद्धेतुत्वात्। न च तदितरा इति विगर्भे। न हि तदि
तत्वमपि तदन्योन्याभावरूपतया तादात्म्याभावरूपं नादात्म्यत्वज्ञानसापेक्षमेवेत्यात्माश्रयानवच्छेदकमिति चेत्। नाभावस्य यावत्प्रतियो ६७

गिनिरूप्यत्वनियमानभ्युपगमात्। अत एव घटप्रागभावतद्ध्वंसयोः परस्परप्रतियोगित्वेपि न परस्परनिरूप्यत्वनियमः। केवलेनापि घटेन तन्निरूप
णात्। न च तयोः परस्परप्रतियोगिकत्वमेव नेति वाच्यं। अन्यतरस्थितिकाले मतरेऽन्यस्त्वनापत्तेः। तथा च तस्याभावस्योभयप्रतियोगिकत्वेपि ज्ञला
दिनैव प्रतियोगिना तन्निरूपणमिति नानवस्थादिकमित्याहुः। अत्रेदं चिंत्यं। तदन्योन्याभाववत्त्वाद्यात्यन्ताभावयोः प्रतीतिवैविध्याद्भेदा
नुपपत्तिः। प्रतियोगिभेदादभावभेदस्याभ्युपगमाच्च। अपि च। अन्योन्याभावात्यंताभावयोः परस्परविरुद्धधर्माध्यस्तत्वेनावश्यं भेदः। ननु यथा
भावव्यवहारहेतुर्घटो घटाभावाभावव्यवहारहेतुश्च न च तावता विरुद्धधर्माध्यासः। स्तु वनाभावस्यैव तस्याभावव्यवहारहेतुत्वात् तात
थावस्तुतोन्योन्याभावात्मनोत्यंताभावात्मनो वा तस्योभयव्यवहारहेतुत्वमस्तु न चैतावता विरुद्धधर्माध्यास इति चेन्न। न। तदन्योन्याभा
वे नत्त्वाद्यात्यन्ताभावव्यवहारः। तादात्म्यात्यं। ताभावे न वा अन्योन्याभावव्यवहार इत्यस्य विनियंतुमशक्यत्वात्। घटादेस्तु भावाभावव्य
वहारहेतुत्वेपि भावत्वमेव प्रमाणबलात्स्वीक्रियते। अत एव संयोगात्यंताभावतद्दन्योन्याभावयोरव्याप्यव्याप्यवृत्तित्वेपि शाचत्वात्यंताभाव
त्वदन्योन्याभावयोरव्याप्यवृत्तित्वे इति सिद्धांतद्भूतिसंक्षेपः। अन्ये तु अत्र मतेसंबंधिनोः सामानाधिकरण्यं न व्याप्तित्वेनाभिमतं किंतु त
दुभयसंबंधिनोः सामानाधिकरण्यं तदुभयसंबंधिमात्रवृत्तित्वं वा। अस्ति च यत्र धूमसंबंधस्तत्र वह्निसंबंध इति तदुभयसामानाधिकरण्यं।
दृग्निनाव्याप्तिः। परेणापत्तिप्रसंगवारणाय तत्तत्संबंधावच्छिन्नतत्तत्सामानाधिकरण्यं वाच्यं। तथा च तादात्म्यसंबंधसामानाधिक

चिं॰ अ॰ रण्यमेव तत्संबंधिव्याप्तिरस्तु। तद्धि हि यत्र जलादितादात्म्यं तत्र पृथिवीत्वाभावसंबंध इति जलादिपृथिवीत्वाभावरूपसंबंधिद्वयप्रतियोगिकयोस्ता
६८ दात्म्यस्वरूपयोः संबंधयोः सामानाधिकरण्यं व्याप्तिरिति जलादेरेव व्याप्यता। न च तादात्म्यसंबंध एव नेति वाच्यं। अविशिष्टधीत्वावच्छिन्नविशिष्टधी
नियामकत्वात्। अत एव तादात्म्यारोपो विशिष्टज्ञानं। तथा चेतरस्य जलादेरिति यथाश्रुतमेव। ननु भवतु तादात्म्यसंबंधो भवतु च तादात्म्य
68 सामानाधिकरण्यं तद्व्याप्तिः तथापि जलादेरेव व्याप्यतया तदन्यतमत्वाभाव एव सिध्येन्न तु तदन्योन्याभाव इति चेत्। मैवं। जलाद्यन्योन्याभावो
हि तादात्म्यावच्छिन्नजलादिविरहः। तथा च यत्संबंधावच्छिन्नसामानाधिकरण्यं व्याप्तिर्व्यापकाभावे न तत्संबंधावच्छिन्नविरहवत्त्वसं ह
बंधसामानाधिकरण्यं व्याप्तिस्तत्संबंधावच्छिन्नव्याप्याभावस्य व्यापकाभावात्सिद्धिरिति तादात्म्यसामानाधिकरण्यग्रहात्तादात्म्यावच्छिन्नविरहः सिध्य
तीत्यन्यतमत्वाभावसिद्धिसामग्र्यैवान्योन्याभावः सिध्यतीत्यदुष्टः। तदपि चिंत्यं। यत्र यत्र धूमसंबंधस्तत्र वह्निसंबंध इत्यादौ संबंधे धूमादिवृत्तिसंबंधविशेषणानु
पलंभादिना वा नाद्यः। आकाशादेरव्याप्यतापत्तेः। न हि यत्राकाशादिविशिष्टः संबंधस्तत्र पृथिवीत्वाभावसंबंध इति व्याप्तिः संभवति। आकाशादेरवृत्ति
तया तद्विशिष्टसंबंधस्य कुत्राप्यवृत्तेः। एवं च लाघवासंभवात्। नापि द्वितीयः। धूमाद्युपलक्षितसंबंधस्य धूमाद्यवपि सत्त्वेन तत्र वह्निसंबंधाभावेन
व्यभिचारापत्तेः। वह्निसंबंधस्य संयोगात्मकस्य महानसादौ वृत्तेः। एवं च दंडोपलक्षितसंबंधस्य दंडेपि सत्त्वेन तत्र कुंडलसंबंधाभावात्समानाधिक ६८
रणयोरपि दंडकुंडलयोर्व्याप्तिर्न स्यात्। तस्मादनन्यगत्या तत्संबंधावच्छिन्नसंबंधिसामानाधिकरण्यमेव व्याप्तिस्तच्चेतरपदार्थांतर्गताकाशादावसं

भवीतिजलत्वादीनामेवव्याप्यत्वमिति। व्यापकाभावेन व्याप्याभावच्छिन्नान्योन्याभावसिद्धिमुक्त्वा तेन व्याप्याभावसिद्धिं दर्शयति। एवमिति। यस्येति। यदा
त्मकतया गृह्यमाणस्येत्यर्थः। अयं चेति। एतेन व्यतिरेकिणि अभाव एव साध्य इत्यत्रानुशयान्तरमपि सूचितं। परार्थानुमानेऽभावसाधकस्य प्रकारान्त
रस्यैवानुसरणीयत्वादिति॥ ॥९॥ ॥ यच्चयिनिर्व्यतिरेकिणि च निरूपिते न्वयव्यतिरेकी निरूपितप्राय एवेति तन्निरूपणस्य व्यतिरेकिसिद्धेरर्थापत्तिमा
नोत्तरत्वनिरासफलकत्वमाह। व्यतिरेकीति। ज्योतिःशास्त्रादिति। यद्यपि ज्योतिःशास्त्रं व्याप्तिमात्रग्राहकं नतु देवदत्तजीवस्य तवर्षजीवित्वनिश्चाय
कं तथापि ज्योतिःशास्त्रं यस्य सत्यतेति पुरुष एव विवक्षित इति केचित्। एतद्स्वरसादेव तत्कथितलिंगाद् इत्युक्तमित्यन्ये। निश्चितो गृहाभावः। गृहे अ
भावस्य निश्चय इत्यर्थः। नियमग्रहेति। शतवर्षजीवित्वको नियमो गृह एवेत्सपरः। तत्कथितलिंगे व्याप्तिरूपएको नियमो गृह एवेत्सपर इत्यन्ये।
आशयमविद्वान् शंकते। नन्विति। आशयमुद्घाटयति। नेति। ननु गृहाभावो न करणं नियमग्राहकविरोधेन तस्य संदिग्धत्वादित्यत आह॥
गृहाभावश्चेति। देवदत्तेति। जीवनवाधे तद्बाधश्चावश्यक इति भावः। तर्कोत्तरमाह। तथेति। तथापीति। मरणाघेत्यया(?) जीवने लंघितेति तत्कल्पना
र्थमितरार्थापत्तिस्वीकार आवश्यकः। तत्र श्रुतत्कल्पितजीवित्वलिंगानुमित्या वहिःसत्वं साध्यमित्यावश्यकतया पूर्वमपि वहिःसत्वमर्थापत्त्या
कल्प्यते न मरणमिति। तर्के शरीरमेव सर्वदिशि रेड(?)ष्टव्यं। ते नैतावता तर्कसहितः संशयो वहिःसत्वं कल्पयतीति नोपसंहारविरोधो न वा नाना विव
क्षार्थापत्तिकल्पनालोपवृत्तेनेपसिद्धांत इति। प्रकृतेपीति। अत्र देवदत्तो गृहे नास्तीति नियमग्राहकं प्रमाणं नियमग्राहकपदेनोक्तं ननु जीवीग

चिं॰ अ॰ इएवेतिनियमग्राहकं। नन्वायाहिंसतिवह्निः सत्त्वप्रमा क्वचापिनस्यात्। गृह एवेतिनियमग्राहकप्रमाणस्यतत्राप्याभासत्वादितिभावः। यद्वेतिति। एवंदो
षाभावोन हेतुः किंत्वनिरोहितप्रमाशंक्ति कस्य प्रमाहेतुत्वं तद्विरहाद्वेदाहृतस्थले प्रमाविरह इतिमतं अत्रच दोषाभावोपि प्रमाहेतुस्तद्वि
६८ रहात्तद्विरहइत्युक्त इति न पूर्वाभेदः। प्रमाणत्वाभिमतयोरिति। अत्र शतवर्षजीवी गृह एवेतिनियमे शतवर्षजीवित्वरूपविशेषणावाधादावघड
तिध्येयं। तदनुसंधानमिति। विरुद्धार्थग्राहकत्वरूपलिंगप्रतिसंधानमित्यर्थः। अवाधप्रसंगादिति। अविलंबप्रसंगादित्यर्थः। इष्यते चतदनु
69 संधानंविनातत्रविलंबइतिन्नयापितदवश्यंस्वीकरणीयमितिभावः। वस्तुतस्तर्कावतारकालेएवोत्पन्नसंशयोपिदुर्लभः। तावत्पर्यंतमनवस्था
नात्। तथाचपुनःसंशयासंजननमपि। एवंचतस्यकल्प्यप्रमाणाभावतया क्लृप्तप्रमाणाभावस्यसामान्यतोदृष्टस्यैवपुनरवतारोलाघवात्कल्प्यत
इतिभावः। लिंगानिश्चयार्थसामान्यतोदृष्टांतरमाह। अपिवेति। नचप्राणित्वरूपलिंगप्रतिसंधानेनदाऽसिद्धमेवेतिवाच्यं॥ अन्यतरप्राप्तिं विनावि
निगमकत्वाद्यवादितर्कानवतारात्पूर्वोक्तयुक्तेश्चेतिभावः। विशेषविषयत्वादिति। जीवनविषयत्वादित्यर्थः। तथाचविरोधिविषयतयामरणा
नुमानेनसत्प्रतिपक्षःसिध्यति। अन्यथाऽन्यतरत्वग्राहसामान्यतोदृष्टेनविरोधाभावात्सत्प्रतिपक्षएवनस्यादितिभावः। जीवनग्राहकस्य॥ ॥ ६८
ज्योतिःशास्त्रकथितरेखादिलिंगस्य। सर्वत्रेति। पर्वतोनपर्वतीयवह्निमान् धूमवत्वादित्यादिनाप्रतिबंधःस्यादितिभावः। जीवनग्राहकस्येति॥
अत्रेदंचिंत्यं। विपक्षबाधकतर्कानवतारेसामान्यतोदृष्टस्यापिनजीवित्वनिश्चायकत्वं सत्प्रतिपक्षग्रस्तत्वात्। तदवतारेचज्योतिःशास्त्रकथितलिंगा

देशादशपकत्वाज्ज्ञीवित्वनिश्चयासंभवे किमनेन सामान्यतोदृष्टेनेति। तस्मादिति। अतुल्यबलेनासत्प्रतिपक्षत्वमिति भावः। सवेति। प्रमाणत्वाभिमतयोर्द्वयो
रपि बाधः स्यादिति परीत्या प्रागुक्तं मरणापेक्षया जीवनं लघ्विति लाघवं स्योतिः शास्त्रं यथार्थत्वं च विनिगमकं द्रष्टव्यं। अन्ये मीमांसका इत्यर्थः। अप्रमा
णस्यापीति। तथा च यत्नज्ञी। वीगृहे वेति वस्तुतः प्रमाणमपि प्रमाणत्वेन न ज्ञायते तेनापि तद्विरोधि बहिःसत्त्वमेव कल्प्यते न मरणमित्यर्थः। किं चेति। मृते
मरणाग्रहस्थिते गृहसत्त्वं बहिःस्थिते वा बहिःसत्त्वमिति यथायोग्यं ज्ञेयं। अत्रेष्टापत्तिमाशंक्याह। अर्थापत्तीति। अन्ये तु किं चेत्यर्थापत्त्याभासत्वे
वंनस्यादित्येकोग्रंथः। अप्रमाणत्वादित्यस्यानंतरमिति। पूरणीयः। तेन हेतुत्वे लभ्यतद्रूपाकुः। विशेषव्याप्तिमूलकमनुमानमुक्त्वा सामान्य
व्याप्तिमूलकं तदाह। विद्यमानत्वे सतीति। द्वितीयानुमानं दूषयति। सामान्यतइति। यत्र तत्र योऽन्यनुगमान्वयव्याप्तिग्रहइत्यर्थः। स्वोक्तं दूषणा।
स्वउनसंभतिमाह। तदुक्तं यतो न्यत्वमिति। यतः कल्पनीयादन्यत्वं तस्यान्यत्वप्रतियोगिनोऽप्रथमतः सिद्धत्वस्यार्थापत्तेरसिद्धेः प्रमाण
त्वासिद्धेः। तत्कल्पत्वेनाभिमतस्यान्यत्वप्रतियोगिज्ञानस्य प्रमाणान्तरादेवज्ञातत्वात्। अज्ञातत्वेवानुपपत्तेरेवाज्ञानादित्यर्थः। यद्वा। यतः क
ल्पनीयादन्यत्वं तस्य सिद्धेरप्येवं तदसिद्धरूपकानुपपत्तिज्ञानासिद्धेरित्यर्थः। देवदत्तस्याभाव इति। अत्र देवदत्तस्येति प्रतियोगित्वं षष्ठ्यर्थः प्र
कारो ननु नेह देवदत्त इति वत्संसर्गमर्यादया प्रतियोगिभानं तेन प्रतियोगित्वमरूपव्याप्यतावच्छेदकावच्छिन्नप्रतियोगित्वरूपलिंगभाना
दनुमानावतारः। अन्यथा वैशिष्ट्यविधया प्रतियोगित्वमात्रोपस्थितावपि व्याप्यतावच्छेदकावच्छिन्नलिंगानुपस्थितेनानुमानं स्यात् तम

चिं.अ. वैवंयत्रसंसर्गोमर्यादयैवतज्ज्ञानंतत्रानुमानानवतारेऽर्थापत्तिःसावकाशेतिवाच्यंअर्थापत्तावपिवहिःसत्त्वंविनागेहनिष्ठाभावप्रतियोगित्वस्यैवानुप
पत्तत्वबुद्धिर्गमिकेतिप्रतियोगित्वनावच्छिन्नोपस्थितिंविनातेनाप्यर्थापत्त्यनवतारात्प्रसुयगमादितिभावः।अधिकस्य।पक्षविशेष्यकत्वस्य।ननुगेह
७० निष्ठाभावप्रतियोगित्वस्यापिदेवदत्तधर्मतयानतन्निष्ठत्वात्तद्विशेष्यकोपिचाक्षुषःपरामर्शोसंभवतीत्यनुशयेनाह।अथवेति।पूर्वोक्तदोषंनिरस्य
70 ति।यथाचेति।ननुसाधिकरणतानिमित्तावच्छेदकप्रकारेणयस्मेनाधिकरणत्वेनवपर्वतेभानेस्यात्तत्तुपर्वतत्वेनेतिनतयापर्वतत्वप्रकारकज्ञान
जनकार्थापत्त्यन्यथासिद्धिः।एवंचमयूरोन्नृत्यतीतिवाक्येऽधिकरणबोधकपदाभावात्मामान्येनापिरूपेणनपर्वतभाने।कुतःपर्वतत्वेनेतिनश
ब्देनापितदन्यथासिद्धिरित्युभयत्राप्यपरितुष्यन्नाह।यद्वामयूरनर्त्तमितिश्रुतार्थापत्तिवादीमाहुः।प्रत्यवतिष्ठते।अथेति।रात्रिभोजनोप
पादके।रात्रिभोजनोपस्थापकमित्यर्थः।तेनरात्रिभोजनेन।योगपत्तावच्छेदकरूपेणोपस्थितिंविनानशाब्दान्वयधीरितिचप्राभाकरसम
तिमाह।यथेति।उपस्थितस्ययोग्यस्ययोगपत्ताच्छानाच्छावद्धीर्नतुयोगपत्तावच्छेदकरूपेणानस्योपस्थितिस्तत्रगौरवादित्यभिप्रेत्यासिद्धौ
नमावाधकेति॥ ॥छ॥ ॥न्यायसाध्यमित्युपलक्षणंतदवयवसाध्यमित्यपिद्रष्टव्यं।तेनतदवयवाख्येतिनासंगतमितिभावः।उदाहरणोपन ७०
यरूपमवयवद्वयमितिबौद्धाः।उदाहरणोपनयमवयवत्रयमितिमीमांसकाइतितन्निरासंहृदिनिधायाह।प्रतिज्ञेति।पंचानामपियथोपयो
गस्तथातत्रतत्रवक्ष्यतोसमस्तरूपेति।रूपंपक्षसत्त्वादि।किंत्विति।अन्तिममितिचरमकारणत्वमनुमितिजननेस्वोत्तरभाविज्ञानानपेक्षत्वं॥

प्रयोजकत्वं च जनकतानजनकत्वं। शाब्दज्ञानपदं चरमकारणपरामर्शोपनीतविषयज्ञानपरं। अत्र वह्निव्याप्यधूमवानयमित्यादिवाक्ये तिव्याप्तिवारणाय
प्रयोजकेत्यंतं। परामर्शजनकेति कृते ऽसंभवः। न हि तज्जनकं विशिष्टवैशिष्ट्यावगाहिज्ञानजनकं वाक्यं संभवति। तस्य ज्ञानस्य मानसत्वादित्यत उक्तं जन
कजनकेति। संस्कारद्वारा परामर्शजनके पूर्वोक्तासत्तिवाक्ये तिव्याप्तिवारणाय ज्ञानेति। तज्ज्ञानज्ञानस्यापि यत्किंचिज्जनकज्ञानजनकत्वसंभवादुक्त
दोषतादवस्थ्यमित्यत आह। अनुमितिचरमकारणेति। लिंगपरामर्शपदं च स्वरूपकथनपरं। वह्निव्याप्यधूमवानितिवाक्यावयवान्तरवयवे तिव्याप्तिवार
णाय शाब्दपदं। तदर्थस्तु क एव। आत्मा द्रावति माभेराहवाक्यपदं। अपेतु शाब्दज्ञानपदं करकोद्वारस्य पेत्यायमिन्नेवाक्ये ति व्याप्ति वारणाय। तच्छ
नुमितिचरमकारणपरामर्शजनकव्याप्तिज्ञानादिजनकयोग्यताज्ञानजनकता या तादृशपरामर्शजनकजनकज्ञानजनकं। नायमाभा
सहत्यनेन व्याप्त्यादिवैशिष्ट्यधीजनकयोग्यताज्ञानजननात्। न च शाब्दपदद्वानेप्येष दोषः। शाब्दज्ञानत्वेन तादृशपरामर्शप्रयोजकत्वस्य विव
क्षितत्वात्। न च योग्यताज्ञानेन तथा जनकं। योग्यताज्ञानत्वेन जनकत्वात्। न्यायजन्यज्ञाने तु शाब्दज्ञानत्वेनैव जनकत्वं वाच्युक्तप्रयोगजन्यज्ञानए वो
क्तपरामर्शसामग्रीसत्त्वात् तस्य। प्रोक्तवाक्याद् वह्निव्याप्यवानयमिति परामर्शस्यैवाहत्योपनीतरितसाकरएवानुपदं स्फुटत्वात्। एवं च सत्या
नोक्तवह्निव्याप्यवानयमितिवाक्यावयवावयवे तिव्याप्तिवारणाय वाक्यपदं मुहावाक्यपरमित्यपरे। न च पर्वतोग्निधूमस्य वह्निमन्यान्यवृत्ति
रस्तिवत्तादृशे धूमे पर्वतवृत्तित्वं तस्मादग्निः पर्वतवृत्तिरित्यादौ मायसमानार्थे न्यायान्तःनिवाक्ये ऽतिव्याप्तिरिति वाच्यं। तादृशवाक्यस्य सर्व

सिं·व्य· तोक्तिकसंप्रदायविरुद्धतयानभ्यस्तत्वेन व्याकुलीभावात्कथमिदं प्रयोगः। सर्वसंप्रदायमवमत्यकृतोनेनेतितद्दूषिजगवेषणाप्रयतया तत्र द्वाक्यार्थ
ज्ञानेन विशिष्टवैशिष्ट्यज्ञानानुत्थापनेन तस्यानुमितिचरमकारणपरामर्शप्रयोजकज्ञानाजनकत्वादित्याहुः। तेन चेति। नचाव्यमानाभावः। या
७२ वज्ज्ञानसहकृतमेव मनः परामर्शजनकमिति वाच्यं तस्यानायासेनैवत्वे नाप्रामाण्यशंकाकांतनया परामर्शाजनकत्वात्। अन्यथा आप्तवाक्या
दिवन्न्यायजन्यज्ञानादेवानुमित्यापत्तेः। तस्मान्न्यायजन्यज्ञाने प्रामाण्यशंकयाऽनास्कंदितत्वेन उपस्थितस्य तु सारेण स्वयमेव साध्यसविशिष्टवह्नि
71 वैशिष्ट्यमित्याकारज्ञानजननेनेतत्परामर्शोत्पादकतिस्वाकार्यं तद्वाक्यस्य परार्थमानोपस्थापकत्वे न प्रयोजकत्वादिति वदंति। अन्येतु मानांतरम
नोलब्धप्रामाण्याप्यते स्वात्मरूपसहकारिसंपत्तौक्रियतइत्यर्थ इत्याहुः। अतमितीति। अत्र प्रथमपक्षावलंबनातेन्यायजन्यज्ञानपरं। तथाच न्यायज
न्यज्ञानजनकयावज्ज्ञानजनकवाक्यत्वमित्यर्थः। अत्र च न्यायवहिर्भूतवाक्यानां व्याप्तिवारणाय न्यायजन्यज्ञानजनकेति। नचावयवावयवे
तिव्याप्तिः। तस्य न्यायजन्यज्ञानजनकजनकजनकत्वेन तदजनकत्वात्। अतएवकंरकोद्धाररूपेपि वाक्ये नातिव्याप्तिः। तस्यापि न्यायजन्यज्ञा
नजनकव्याप्तिज्ञानादिजनकयोग्यताज्ञानजनकत्वे न तज्जनकजनकत्वात्। शाब्दपदं संपातायातं। आत्मादावतिव्याप्तिवारणाय वाक्यपदं।
एतच्च लक्षणायत्न मतेनैवांतरवाक्यार्थज्ञानस्यैव महावाक्यार्थज्ञानजनकत्वाभ्युपगमस्य मतेन द्रष्टव्यं। यदिचतावत्संस्कारमेलकान्नावत्पदस्मृ ७१
तौतावत्पदार्थस्मृतिरथ महावाक्यार्थज्ञानमित्यभ्युपगमस्तदास्यासंगतत्वापातादिति। परामर्शप्रयोजकवाक्यत्वेनेति। प्रयोजकत्वस्य जनक

५ ४ पर्वतो वह्निमान् धूमवत्त्वादित्यस्योदाहरणे यो यो धूमवान् सो ऽग्निमानित्यनुमितिसंभवान्नातिरिक्तविषयकत्वाद्यज्ञानजनके पर्वतो वह्निमानित्यनुमितौ प्रतिज्ञायामतिव्याप्तिवारणायाग्रिमोद्देश्यपदं ४ ५
(interlinear: तया)

जनकेऽजनके चाविरोधादिति भावः। न्यायत्वापत्तिरिति। वाक्यत्वस्यापि योग्यत्वान्यासत्त्वादिति भावः। यदि च घटादेः स्वरूपसत एव हेतुत्वान्न तत्राकां
क्षेति न तस्य न्यायत्वं तदा विशिष्टवैशिष्ट्यविषयकप्रमाकांक्षाज्ञानासत्त्वान्नेति तस्यापि न तत्त्वमित्याह। आकांक्षेति। उक्तरूपमिति। असंभवीत्यर्थः। तत्स्वीकारे।
अनतिप्रसक्तानुगतरूपस्वीकारे। अन्यथा जातिसंकरप्रसंगादिति। जातिनियामकानुगतकारणतावच्छेदकधर्मं विनापि जातिस्वीकारे परस्पर
विरुद्धसमानाधिकरणजातिद्वयसमावेशः स्यादित्यर्थः। किंतूद्देश्येति। अवयवान्तराप्रविष्टेत्यादि। प्रतिज्ञासमानाकारवाक्येऽतिव्याप्तिवारणाय सत्यन्तं। वा
मार्थपदं संपातायातं। न्यायान्तरप्रतिज्ञाया न्यायान्तरस्थप्रतिज्ञासमानार्थाया न्यायान्तरप्रतिज्ञात्वं माप्रसांक्षीदिति प्रथमोद्देश्यपदं। अनुमितौ
लिंगाभानपक्षे चैतदर्थमेवाग्रेप्युद्देश्यपदं। तत्र तज्ज्ञानपक्षे त्वसंभववारणार्थमपि तदिति ध्येयं। तथा चास्मिन्न्यायेऽविषयत्वेनानुमितिरुद्देश्या तस्ये
वोद्देश्यानुमितिविषयत्वेन विवक्षितत्वमिति नोक्तदोषः। प्रतिज्ञैकदेशेऽतिव्याप्तेराह। अन्यूनेति। न च पक्षतावच्छेदकस्यावयवान्तराशक्तिपाद्यत्वादन्यू
नपदेनैव तद्व्यवच्छेदेनातिरिक्तपदवैयर्थ्यमिति वाच्यं। यत्र पृथिवीतरभिन्नत्वाभावस्तत्र पृथिवीत्वाभाव इति साध्याभावांशे उदाहरणैक
देशेऽतिव्याप्तिवारकत्वादित्याशयः। तद्भिन्नेति। तत्र पृथिवीत्वस्येतरभेदसामानाधिकरण्यभानेनातिप्रसक्त्यसंभवात्। तस्माद्यदित्यस्माद्वह्निमा
नयमित्याकारकं निगमनं तदा अयमिति परस्परवर्तिनामत्वेन बुद्धिस्थवाचकतया पर्वतत्वप्रकारकत्वानजनकत्वान्निगमनेऽतिव्याप्तिवारकत्वं
तस्येति ध्येयं। एवं चैतन्मते निगमनावयवत्वे सतीत्यपि विशेषणीयं। अतो वह्निमानयमिति निगमनैकदेशे नातिव्याप्तिरिति ध्येयं। न च

२ × वदंति नन्विदं … तत्प्रतिज्ञात्वेन संग्राह्यत्वात् तद्विषयकस्योदाहरणस्यान्यूनानतिरिक्तविषयत्वाभावेनातिव्याप्त्यसंभवात् तस्मात्संपातायातं शाब्दपदं × २

किं अ· शाब्दपदं यथार्थो घटशब्दो गुणो द्रव्यकर्मान्यत्वे सति सत्त्वादित्यत्रोदाहरणे यदि प्रतिज्ञारूपएव शब्दो दृष्टान्तत्वेनोपादीयते तदा तत्रातिव्याप्तिवारकतया

७२ तानहि तस्य परामर्शप्रयोजकशाब्दज्ञानजनकत्वे शाब्दज्ञानजनकत्वेन। अपि तु स्वज्ञानेनेति। विद्ववद्धितं तु तत्र गौणतया जनकत्वमितिर्भावः। पद्मसा

ध्यवाचकपदे पुच्छलक्षणासत्त्वादतिव्याप्तिरित्यत आह। वाक्यमिति। तथा च तादृशज्ञानजनकपदसमुदायत्वमित्यर्थः। वाक्यपदस्य पदसमुदाय

72 वाचित्वादिति। न च प्रतिज्ञायां ज्ञानलक्षणया उद्देश्यानुमित्यतिरिक्तविषयकज्ञानजनकत्वात्संभवइति वाच्यं। वह्निमानित्यस्य हेत्वन्वया

नुपपत्त्या ज्ञानत्वमत्र लक्षणायां हेत्वन्वयप्राक्कालिकमुख्यान्वयबोधसामग्रीदायलक्षणासंभवात्। केचित्तु ज्ञानलक्षणा तत्र नैवेत्याहुः। न तु स

र्वं प्रमेयमित्यादिप्रतिज्ञायामव्याप्तिः अनुमितिविषयातिरिक्ताप्रसिद्ध्या तदनतिरिक्ताप्रसिद्धेः। न च तत्र विवादाभावेन संशयाभावात्प्र

तिज्ञाद्यसंभवान्नोक्तदोषइति वाच्यं। अनुमित्सया तादृशप्रयोगसंभवात्। मित्रप्रकारकसंशयादेरन्यथा केवलान्वयिहेतुलक्षणाम

ये विरुद्धैतो सत्वं सर्वपदार्थवृत्तिधर्मत्वाद् घटत्ववदित्यादिप्रतिज्ञायां तयाप्यप्रतीकाराच्च। न च केवलान्वयिसाध्यके न विवाद

दिर्न स्यात्। सर्वपदार्थस्यानुमितिविषयतया तिरिक्ताप्रसिद्धिस्तत्रापीति वाच्यं। अनुमित्यन्यूनानतिरिक्तपदेनानुमितिविषयतासमव्याप्त

विषयताकत्वं विवक्षितमिति नोक्तदोषः। यद्वेतरस्वरसादाह। लिंगेति। प्रतिज्ञायां वह्निमानित्यादौ मनुवर्थसंबंधस्यापि भानादनुमितौ त ७२

ज्ञानेमानाभावादनतिरिक्तविषयत्वमसिद्धमित्यस्वरसः। एवं च बोध्यं। अत्र सत्यं तन्न्यायप्रविष्टवाक्यपरसमुदासीनवाक्येतिव्याप्तिवारणाय।

अत्रक्रमः ३

अवयवांतरवारणाय लिंगविषयकेति। शाब्दपदं स्पष्टार्थं। प्रतिज्ञैकदेशादावतिव्याप्तिवारणाय वाक्यपदमवयवान्यवाक्यपरं। लिंगविष
यकज्ञानजनकत्वं च व्याप्यासिद्धेन लिंगविषयकज्ञानजनकत्वनियतावयवान्यत्वं। तेन हेत्वादिचतुष्टयान्यत्वं पर्यवसितं। अन्यथा यत्र प्रतिज्ञा
यां हेतोः पक्षतावच्छेदकत्वेनान्यथा वा प्रवेशस्तत्राव्याप्तिः स्यात्। न च लिंगतावच्छेदकप्रकारेण लिंगविषयकत्वविवक्षयैव नोक्तदोष इति वा
च्यं। धूमकालादेः पक्षतावच्छेदकत्वे तथाप्यप्रतीकारात्। धूमत्वेनैव तत्र धूमभानात्। न च विवक्षितोऽपि तादृशज्ञानजनकत्वनियमो यद्धर्मावच्छेदेन विव
क्षितस्तदा तादृशप्रतिज्ञायां तथैवाव्याप्तिः। अथ यथागतहेत्ववयववाक्यघटकेन तत्र प्रतिज्ञात्वमवच्छेदकमाराय यथाश्रुतेनैव समर्थनं प्रशस्तमिति वा
च्यं। प्रतिज्ञात्वस्यैव लक्षणत्वेन तदपरिचये तद्घटितलक्षणस्यापरिचायकत्वात्। हेत्ववयवत्वादेस्तु लक्षणांतरप्रमितत्वेन तदवच्छेदेन लिंगविषयक
ज्ञानजनकत्वनियमग्रहणात् उक्तलक्षणार्थः सुग्रह इति भावः। निगमनेऽप्यतिव्याप्तिरित्याह। निगमनं चेति। चकारोऽप्यर्थे भिन्नक्रमः।
निगमनं परामर्शहेतुरपि नेत्यर्थः। तथा च सतेनापि तद्वारणमिति भावः। नैव तद्देवासिद्धमिति वाच्यं। परामर्शपदेनोपनयजन्यपरामर्श
स्य विवक्षितत्वात्। तत्र निगमनस्योपयोगितेनाप्रयोजकत्वात्। प्रतिज्ञायाश्चाकांक्षोत्थापनद्वारा तत्र प्रयोजकत्वमस्तीति नासंभव इति ध्ये
यं। अवयवलक्षणे परामर्शपदं नोपनयजन्यपरामर्शपरं। तेन तल्लक्षणस्य निगमनेनाव्याप्तिरिति बोध्यं। अत एव परामर्शेत्यत्र चरमे
ति विशेषणं नेमिह तु नेति सर्वं सुस्थं। हेत्विति। हेत्ववयवेऽन्यार्थः। यद्वा वाक्यपदमवयवपरमिति नातिप्रसंग इति भावः। लिंगेति। अत्रापि नज्य

न

विं.अ. न्यासेन पूर्ववल्लिंगविषयकज्ञानजनकत्वनियतावयवान्यन्यायावयवत्वमित्यर्थः। यदि च न्यायावयवपदं नास्ति किंतु वाक्यपदं तदा तदेवावयवपरं दृश
यं। लिंगिपदं कात्स्निकमफलं। अन्ये तु तत्र पूर्वं द्वितीयज्ञाने निर्वीजमुक्तमिति वीजपूर्वकं परमतमाह यथवृहारादिति भास्करमतं दूषयंति। एतेने
७३. ति। यद्यप्यत्रापि विज्ञानीयज्ञानजनकत्वमेव पर्यवस्यति तथाप्युपाधिभेदाद्भेद इति मंतव्यं। आद्यन्तौ त्विति। इदं चापाततः। वस्तुतो हेतुत्वान्वया
नुपपत्त्या अतिह्नायां ज्ञानलक्षणावश्यं वाच्या। विप्रतिपत्तौ च नतद्येतिनतयातरमथासिद्धिः। न च प्रमाणापेक्षायां हेत्वभिधाना धूमादिना
73 दौ ज्ञापकत्व एव पंचमीति नान्वयानुपपत्तिरिति वाच्यं। ज्ञानलक्षणाया उपपत्तौ हेतुत्वशंकायाः पंचम्या नानार्थत्वकल्पनायो माभावा
दिति वक्ष्यते। तदभिधानो। अवयवांतराभिधानं। अन्यद् त्पस्वरसो आवनो। तद्धि ज्ञानं तु शरणानिमित्तत्वे प्रमाणं वदेत मस्य साध्योपलक्षितसाध
नाभिधाननियोगपरतयाप्युपपत्तौ साध्यस्य विशेषणत्वमुक्तयुक्त्यवष्टंभेनयाह्य॥ तथा च सैवास्तु किमनेनेति। अत एवोपसंहा
रे तामेवोपदर्शयति। तस्मादिति। हेतुत्वं चेति। हेतुस इदेशन्यायाप्रविष्टवाक्ये अतिव्याप्तिवारणाय कारणी संतं ज्ञानविशेषणांतस्मा
दिति निगमनोश्चेतद्वारणाय साध्याविषयकेति। अत्र साध्यतावच्छेदकप्रकारेण साध्याविषयत्वं विवक्षितं। तेन प्रमेयवत्वादौ साध्या ७३
विषयकज्ञानस्याप्रसिद्धिरिति द्रष्टव्यं। न चैवमपि वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादावव्याप्तिरिति वाच्यं। साध्यविषयकशाब्द
ज्ञानजनकत्वनियतावयवभिन्नत्वस्य विवक्षितत्वात्। यो यो धूमवानित्यत्रोदाहरणांशे अतिव्याप्तिवारणाय हेत्वविभक्तिमदिति। सामान्यव

त्वेसत्यस्मदादिवहिःकरणाचादिप्रत्यग्रिमभागोतिव्याप्तिवारणायशब्दपदं।तथाचशाब्दाधिकाद्दर्थाधिक्य।मितिन्यायेनयद्दवच्छेदेनहेतुविभक्तिसमभि
व्याहृतत्वंतावद्दवच्छिन्नशब्दत्वंविवक्षितेपक्षतेचसतिसप्तमीवलाद्विशिष्टएवहेतुत्वान्वयाद्विशिष्टएवहेतुविभक्तिसमभिव्याहारइतिभावः।हेतु
त्वेति।न्यायावयवतावच्छेदेनहेतुत्वप्रतिपादकविभक्तिमत्वंविवक्षितमितितस्मादित्यंशमादायहेतुविभक्तिसत्वान्निगमनेनातिव्याप्तिः अहरगो
ति।व्याप्त्यभिधानेत्यर्थः।उदाहरणावयवपरत्वेचाग्रिमावयवपरत्वर्थतापन्नेरितिभावः।साध्याविषयकेति।अत्रजनकेत्यंतंशब्दविशेषणंतस्मादि
तिनिगमनाशेअतिव्याप्तिवारणायतत्पर्यंतमपूर्ववत्।उदाहरणांशेअतिव्याप्तिवारणायहेतुपंचम्यंतेति।उदासीनवाक्येअतिव्याप्तिवारणा
यअनुमितिपरेति।न्यायप्रविष्टवाक्यत्वमित्यर्थः।यद्वाअनुमितिपरशब्दत्वेनन्यायावयवत्वंविवक्षितं।तथाचसाध्याविषयकज्ञानजनक
न्यायावयवत्वंहेतुपंचम्यंतन्यायावयवत्वेचेतिलक्षणद्वयंबोध्यं।पूर्वंहेतुत्वप्रतिपादकविभक्तिमत्वमुक्तमिदानींतुहेतुपंचम्यंतत्वमुच्यत
इतिनपूर्वापरविरोधइति।उदासीनस्यप्रतिज्ञात्वेनप्रतिज्ञात्वाद्यव्यावर्तकत्वमवयवस्यैवेतिपंचम्यंतउदासीनवाक्येनि
गमनैकदेशेचनातिप्रसंगः।सामान्यवत्वेसतीत्यादौहेत्ववयवावयवेपरंपरयोक्तज्ञानजनकेतिव्याप्तिवारणायहेतुविभक्तिमत्वंवि
शेषणं।हेतुत्वान्वितैकार्थावच्छिन्नवाक्यत्वमित्यर्थः।हेत्ववयवेनतुगोत्वस्यखंडवाक्यस्यतथात्वाभावात्।सामान्येवत्वेसतीत्यादि
हेनावपिसप्तमीवलाद्विशिष्टएवहेतुत्वान्वयेनविशेषणमात्रेतरनन्वयादितिभावः।यत्तु इमवान्यतद्व्यादावतिव्याप्तिवारणायहे

विं॰अ॰ तु विभक्तिमद्दिति। न हि तत्र पंचम्यंतमात्रेणात् तदाकांक्षादिनिवृत्तिरपि तु प्रथमांतपंचम्यंतपदाभ्यां हेत्ववयवे हेतुपंचम्यंतेनैवेति। तत्र। तस्यानवयव
त्वेन तत्र प्रतिज्ञाविरहेणोदाहरणीनवाक्यवत्सूर्वप्रतीकेनैव वारणात्। अवयवत्वे च तदुदाहरणस्यानर्हत्वादिति। पंचम्यंतेति। न्यायाप्रविष्टहेतुसदृश
पंचम्यंतेनातिव्याप्तिवारणाय ध्वजत्विमितिपरेति। न्यायप्रविष्टत्वार्थः। निगमनेति व्याप्तिवारणाय लक्षणेति। सर्वनाम्नश्च बुद्धिस्थवाचकतया।
७५ तस्यार्थस्य बुद्धिविषयत्वे शक्यैव तद्विषयत्वे लक्षणायाश्चाप्यसंभवेन तत्र सर्वथा लक्षणायामनुमत्रत्वात्। प्रतिज्ञायामपि साध्यप
75 देलक्षणेति तत्रातिव्याप्तिवारणाय कार्यपंचम्यंतेति। न च तत्र लक्षणायामानाभावः। साध्यस्य हेतुवाक्यार्थेन हेतुनान्वयासंभवात्। तस्य
तदकार्यत्वात्। आचक्षु:। न हि हेतुवाक्येन कारको हेतुरभिधीयते। किंतु ज्ञापकः। साध्यनिर्देशानंतरं कुत इति प्रमाणाकांक्षायां तत्सू
योगात्। पंचम्या अपि तज्ज्ञापकत्वरूपहेतुत्वपरत्वात्। तथा च हेतुवाक्यार्थज्ञापकेनान्यस्य साध्यस्य विषयत्वेनैवान्वय इति न साध्यपद
लक्षणा। अत एव भास्करादौ तथैव कंठतः प्रतिपादितमस्ति। उद्देश्यानुमितस्मृतेत्यादिगर्भं प्रतिज्ञालक्षणं कृतं तन्नो गंगेशस्यापि तद्देवा
भिमतं। अत्र यथा प्रतिज्ञायाः साध्यज्ञानविषयत्वेऽनुमितेश्च तद्विषयत्वे एतल्लक्षणासंभवादिति। अत्र वेदं ति। पंचम्या ज्ञापकत्वापरत्वं
लक्षणाया शक्या वा। नाद्यः। सुविभक्तौ लक्षणाया अन्याय्यत्वात्। नांत्यः। एकार्थत्वे संभवति नानार्थत्वायोगात्। प्रतिज्ञालक्षणं च यथाश्रु ७४
तं न योक्तं। यत्तु यदि प्रतिज्ञायां न ज्ञानलक्षणा तदा पंचम्यंतपदमेव लक्षणोऽयं स्यात्। न च पर्युदासनञादिलाक्षणिकसदवयवांतरेऽतिव्या

त्रिवारणाय तद्दिति वाच्यं लाक्षणिकपदवत्त्वेन तादृशपदनियतानुमितिपरवाक्यत्वस्यावश्यप्रविष्टवक्तव्यत्वेन तत एव तादृशावयवान्तरवारणात् तच्च न यथा
यत्रोदाहरणाविशेषे धूमवत्त्वादित्यादिहेत्ववयवदृष्टान्तत्वेनोपादीयते तदा तदंशातिव्याप्तेर्वज्रलेपत्वात् । न च प्रकृतसाध्यप्रतियोगिकहेतुपञ्चम्यन्तगर्भ
तयोक्तातिव्याप्त्यसम्भवः । तत्र निरयोगिकहेतोरपि तत्प्रयोगोदाहरणदृष्टान्तत्वाविरोधादिति । तन्न । उदाहरणांशविषयीभूतस्य हेत्ववयवत्वेन संग्रा
ह्यत्वात् । तत्प्रतिपादकवाक्यस्योदाहरणांशस्य धूमवत्त्वादित्यादिशब्दवदित्यादौ महानसवदित्यादिवत्पञ्चम्यन्तत्वाभावेन नियमविवक्षाया
अप्रयुक्तत्वात् । लाक्षणिकपदवत्त्वमुपपादयति । हेत्विति । अहेतुत्वेनेति । अतीतादौ व्यभिचारादिति भावः । न चैवं स्वापत्तः शब्दप्रयोग इति न्याय
धूमज्ञानादिति प्रयोगापत्तिः । घटं करोतीतिवन्निरूढलक्षणयाज्ञानज्ञानलाभापत्तेः । ननु यदि हेतुपदे ज्ञाने लक्षणा तदा वह्निद्वयविरोधेन
ज्ञानमात्रमुपतिष्ठेत न तु विषयो धूमादिः । तथा चानुपस्थिते तत्र गमकत्वाकांक्षा न स्यात् । प्रत्युत लिङ्गज्ञाने गमकत्वाद्याकांक्षा स्यादिति तस्य
वगमकताप्रयोजकत्वाभावादिति विषयस्वरूपमुदाहरणाद्यभिधेयं प्रसज्येत । किञ्च । अवयवेनानुमित्यङ्गज्ञानमुत्पादयितुमर्हम् । लिङ्गज्ञाने
च तथा । ननु लिङ्गज्ञानज्ञानेन तस्माल्लिङ्गस्यानुमित्यजनकता पक्षेऽपि धूमादिपदशक्यमेव । पञ्चमीवत्र हेतुतायां । किन्त्वनुमितिजनकज्ञाने
विषयत्वलक्षणायां तु मितिप्रयोजकत्वमात्र इति चेत् । अत्राहुः । यद्येवं वह्निद्वयविरोधस्तदा पाकादेरुक्तिमित्मनन्वितं स्यात् । अभेदोपचारेऽपि
वह्निद्वयविरोधे नरकस्येवानुपस्थितस्याहेतोस्तत्राकांक्षाविरहात् । यदि च तरस्फुतयापि तत्राकांक्षा यदि वा घडियेन विना न भासत इति

वि॰ अ॰ प॰ न्याया त्व लक्षणां विनाप्यन्यलक्षणायैव तदुपस्थितेस्तत्राकांक्षा तदापकृतेऽपि तुल्यमितिताद्विषयकज्ञानस्यापि तन्निरूपणाधीननिरूपणत्वेन ज्ञानलक्ष
णायैव तदुपस्थितिसंभवात्। अत एव समासे न्यपदार्थलक्षणादौ लं वकर्णादिविशिष्टव्यक्तिभानं। न न्वेवमुपस्थितस्यापि विषयस्य विशेषणत्वाद्वि
७५ शेष्य एव ज्ञाने गमकत्वाकांक्षास्यादिति चेत्। इष्टापत्तेः। गमकत्वं हि ज्ञानजनकत्वं। तच्च लिंगज्ञानस्य न तु लिंगस्य। तथा च कथमस्य गमकत्व
75 मित्याकांक्षापि तज्जैवा साध्यविषयतया गमकत्वमितितद्विषयीभूते लिंगे व्याप्तिप्रदर्शनायोदाहरणमपि तादृशसंगच्छते। अस्तु वा लिंग एव
वाकांक्षा तथापि नानुपपत्तिः। लाघवेनोपस्थितिमात्रस्यैव तत्र तंत्रत्वेन विशेषणात् तथापि तदुपस्थितेस्तत्प्रयोजकत्वात्। यत्रोक्तं पंचमी च न हेतु
तायामित्यादि। तत्र हेतुनाशकतायाः पंचम्या विवक्षितार्थत्व लक्षणापत्तेः। सुब्विभक्तौ च न दृष्टाभावात्। नानार्थत्वकल्पने मानाभावात्। उक्तेन
नैवापपत्तेश्च। न च तत्त्वज्ञानान्निःश्रेयसाधिगम इत्यत्र कथं प्रयोजकत्वे पंचमीति वाच्यं। अनन्यथासिद्धत्वांशमपहाय विशिष्टशक्त्याया
अपि पंचम्या विशेष्यभागो नियतपूर्ववर्तित्वे तात्पर्यात् ज्ञानं च पदार्थैकदेशतया तत्रापि लक्षणेति वाच्यं। विशेषणांशे पदार्थैकदेशा
न्वितत्वेनोपस्थितेर्निराकांक्षत्वे तयाकांक्षोत्थापनाय स्वतंत्रोपस्थितये तत्र लक्षणास्वीकारात्। ननु साकांक्षे विशेष्यभागेऽपीति। अ
स्तु वा तदनुरोधान्नियतपूर्ववृत्तित्वे शक्तिः पंचम्याः। तथापि न प्रकृते संगतिः। उक्तप्रयोजकत्वस्य पंचम्यर्थत्वे प्रमाणाभावादिति। यत्तु ७५
धूमविशिष्ट एव ज्ञाने कक्षणेति धूमोपस्थितिः। विशिष्टलक्षणया चांगाविशिष्टतारोपस्थितिरिष्टैवेति तत्र लक्षणावसरे वक्ष्यामः। अन्नेन

रोक्तेपरेषांमतेपरैर्यायुक्तिरुक्तातामेवदर्शयति। जातिविनेति। अत्रतादृशज्ञानकतावच्छेदकसत्वेतदेवलक्षणं। असत्वेतदपिदुर्ग्रहं इत्यस्वरस
वाज्ञेपूर्वोक्तमत्राप्युक्तप्रायमितितिनेहदर्शितं। अन्वयेति। अत्रजनकांतंकेवलव्यतिरेकिणिहेतावतिव्याप्तिवारणाय। प्रतिज्ञायामपिपरंपरा
यातत्वयोजनकत्वात्तद्वारणायहेतुविभक्तिमदिति। अत्रोदासीनवाक्यातिव्याप्तिवारकत्वेनोपात्तयोः प्रथमचरमावयवपदयोरन्यतरत्त
र्लक्षणद्वयंबोध्यं। अन्यथान्यतरावयवपदवैयर्थ्यापत्तेः। नन्विदमन्वयव्यतिरेकिहेतावव्याप्तिलाघ्रं। नचान्वयव्याप्तिमात्राभिधायक
त्वविवक्षितमितिवाच्यं। केवलान्वयिहेतौमात्रपदव्यवच्छेद्यव्यतिरेकव्याप्तेरप्रसिद्धेरितिचेन्न। अन्वयव्याप्त्यभिधायकावयवमात्राभि
धानप्रयोजकेनिविवक्षणात्। नचैवंमात्रपदव्यवच्छेद्यालाभः। व्यतिरेकव्याप्तेरभावेपिविशेषादर्शनदशायांतदभिधायकावयवका
यवप्रसिद्धेः। तत्प्रतीतिजनकस्यैवतदभिधायकत्वात्। दृष्टाविशेषेन्वयव्यतिरेकीहेतुःसंग्राह्यएवेत्याहुः। नचकेवलान्वयिनिसंशया
भावेनव्याप्यानवतायादृशीयोहेतुःसंग्राह्योनास्त्येवेतिवाच्यं। अत्रानुमित्सयापिप्रयोगसंभवादितिभावः॥ ॥पक्षेति॥ ॥पक्षेत्यादिस
तोर्थस्यप्रतीपादकोहेत्ववयवइत्यर्थः। अत्रसद्धेतुविषयकएवहेत्ववयवःसंग्राह्यइतिस्वरूपासिद्धिविषयकवारणायपक्षपदं। ए
तत्रोपलक्षणं। अबाधितत्वाद्यपिबोध्यं। असाधारणविषयकवारणायव्यतिरेकिहेत्वतिव्याप्तिवारणायचसपक्षपदं। अभि
रिविरुद्धविषयकवारणायकेवलान्वयिहेत्ववारणायचविपक्षासत्वइति। एवमग्रिमलक्षणेपिबोध्यं। एवंचेत्रमीख्यायतेतदा

चिं॰ अ॰ वारणीयहेत्ववयवदस्य पदान्तरगौरववारणात्त्वयमलक्षणेपक्षपदं द्वितीयलक्षणोपक्षसपक्षपदं चानर्थकमापद्येतेतिभावः। दशाविशेषान्वयिसा
धारणलक्षणमाह। अनुमिति। लि। अत्र कारणतमुदासीनवारणाय। तस्मादितिनिगमनांशेतिव्याप्तिवारणाय साध्याविषयकेति। शाब्द
७६ पदस्फुरणार्थं। केवलव्यतिरेकिणःपूर्वं व्याप्तिराह प्रतीतान्वयेति। प्रतीतान्वयमात्रेत्यर्थः। प्रतीतान्वये साध्ये यस्य साधनस्य तद्वाचकमित्यर्थः। यो
७५ यो धूमवान् नित्यत्रोदाहरणांशेतिव्याप्तेराह। हेतुविभक्तिमदिति। दशाविशेषव्यतिरेकिसाधारणलक्षणमाह। एतदेवेति। व्यर्थत्वादिति।
पक्षधर्मतायास्तदानीमनाकाङ्क्षितत्वेन मीमांसकैरनुद्भावनाया अपि मतुवादिने प्रयोज्यस्तथा चानाकाङ्क्षिताभिधाने र्थान्तरतापत्तेरितिभा
वः। केचित्तु व्यर्थत्वात् व्यर्थविशेष्यत्वादित्यर्थः। धूममात्रस्यैव व्याप्यत्वेन तत्र वं धस्य गुरुत्वादित्यर्थ इति व्याचक्षते। तन्न। धूमवद्धूमवत्त्वस्या
पि व्याप्यत्वव्यर्थत्वाभावात् समानाधिकरणावच्छेदकद्वयसमावेशेन्यतरस्य व्यर्थस्यैवत द्वीजत्वात्। न च धूमवत्त्वादित्यत्रैवोद्भाव्यार्थान्तरमप्य
शक्योद्भावनं यावत्ता पक्षधर्मताप्रदर्शनार्थं नमया मतुप्प्रयुक्तः किन्तु विशिष्ट एव हेतुरूपात्र इत्युक्तापरेणापरिहारककरणसंभवादि
तिवाच्यं उदाहरणोपनयाभ्यामेव हेतुपरिच्छेदात्। न हि धूमवत्त्वे हेतौ यत्र धूमवत्त्वमुदाहरणं वाक्यं धूमवांश्चायमित्युपनयो वायमुपने ७६
किं तु यत्र धूमवत्त्वमित्युदाहरणवाक्यं धूमवांश्चायमित्युपनयश्चेत्याहुः। एवं हि अत्र वह्निव्याप्यधूमवत्त्वेवोपनयः स्यान्मतुपोव्य
र्थत्वात्। यदि च कथकसम्प्रदायानुरोधात्तथा तदाज्ञापितत्वं। एवं प्रतिज्ञायामपीति चिन्त्यम्॥ समभीवत्लादिति॥ विरुद्धार्थिकाया एवं विभक्तेः

र्विभक्त्यर्थतरान्वयविरोधित्वात् अत एव प्रतिबंधधान्यस्य सार्जन्यमादिहेतुरविकल इति भावः। व्याप्तेरिति। विशेषणत्वेनास्याः प्रथमोपस्थित
याः पृथममाकांक्षाविषयत्वादित्यर्थः। पक्षधर्मतायाश्च वैशिष्ट्यरूपत्वेनानृतियाह्यादिति भावः। केचित्तु मस्तकत्वनावादिसिद्धत्वमेव व्याप्तेः प्राधान्ये। प
क्षधर्मतायामुपरि सविनिंत्यादौ कश्चिद्विप्रतिपद्यतेपीत्याहुः। तत्प्रदर्शनायेति। याव्याप्तिर्ययोदाहरणेन प्रदर्श्यते तथोक्तं प्राक्। प्रथमं द
र्शितमतव्याप्त्युपदर्शकत्वं च परं परयोदाहरणवाक्यस्येष्टव्यं। पदार्थविधया वाक्यार्थविधया वा तत्र तस्य तदलाभात्। किंतु तेन सह चारेवो
धिते मानसो व्याप्तिग्रहो भवति॥ ॥तत्रेति॥ अत्र जनकांतमुदासीनवारणाय अन्यायतत्व्यज्ञानजनकपरं। प्रतिज्ञादिवारणाय बोधनकेत्यंतं। ७५
निरुक्तसंबंधबोधजनकत्वं च तत्त्वेऽधतात्पर्यकत्वं उपनये च पक्षधर्मताबोधनेन पर्यामिति न तत्रातिव्याप्तिः। यद्वा। तत्संबंधविधायकत्वमि
त्यर्थः। उपनयस्य तु संबंधानुवादकत्वमिति। शब्दपदं च यावदवच्छेदनतत्संबंधबोधजनकत्वं तावत्पदसमुदायपरं। तेनोदाहरणैकदेशे नाति
व्याप्तिः। सामान्यलक्षणमिति॥ ॥व्याप्यत्वाभिमतेत्यादिः स्फुलइति शेषः। कस्यचिन्मतमपाकरोतीति। न्यायेति। न्यायावयवत्वे सति दृष्टांतप्रति
पादकमित्यर्थः। उपनये तूपलक्षणं निगमनातिव्याप्तिरपि द्रष्टव्या। अन्यदृष्टत्वस्य रसप्रदर्शनान्न द्वीजं तु तादृशेति ज्ञानाजनकत्वमनु
गतावच्छेदकासत्त्वे दुर्ग्रहं। तत्सत्त्वे च तदवलक्षणमिति द्रष्टव्यं॥ व्यभिचारेति। व्यभिचारित्वसाधारणसाधनसामान्याधिकरण्यमात्रप्रती
तीप्रसंगवारणाय वेत्यामाञ्जरि त्यर्थः। तेन वीप्सितशब्देन यावत्साधनाधिकरणोपस्थितौ तत्र साध्यवत्त्वविधानात् यावत्साधनाश्रयाश्रित

चिं॰ अ॰ साध्यसंबंधस्य व्याप्तिर्गृह्यत इति भावः ॥ ग्रंथकृदभिमतव्याप्तिपक्षे विशिष्टसामानाधिकरण्यरूपायास्तस्या वीप्सया ग्राह्यप्रदर्शनात् किंतु येति चिंत्यं ।
ननु तत्रापि व्यभिचारधीवारणाय सा । तथा च तयास्फलसाधनाधिकरणो साध्यवत्त्वबोधनाद्व्यभिचारशंकाशून्यसहचारज्ञानाद्भवति मानस-
७७ व्याप्तिग्रह इति चेन्न । नायदि ह्युदाहरणस्य व्यभिचारज्ञानविरोधिज्ञानोत्पादकत्वमनुमतं तेन तदा व्याप्त्युपदर्शकत्वस्यापि संभवेन व्याप्तिग्रहस्य मा-
नसत्वोपवर्णनविरोधात् । व्यभिचारज्ञानविरोधिज्ञानविषयस्यैव व्याप्तित्वौचित्यात् ॥ ॥यथेति ॥ ननु सामानाधिकरण्यमात्रस्य व्यभिचारि-
७७ साधारणतया केवलान्वयिन्यपि विशिष्टसामानाधिकरण्यमेवावश्यं व्याप्तित्वेनाभ्युपेयम् । तल्लाभश्च यद्वीप्सां विनैव स्यात् धूमादावपि स्या-
त्तायदि च धूमादौ तां विना न तल्लाभस्तदा केवलान्वयिन्यपि तथेति तत्राप्युपादेयैव सा । न च धूमादौ व्यभिचारसंशयः संभवति तत्र तु नेति वि-
शेषोस्तीति वाच्यं । हेतुसमानाधिकरणात्यंताभावप्रतियोगिसाध्यं नवेति संशयस्यात्रापि संभवात् । न च केवलान्वयित्वेन ज्ञाते तत्र तद-
संभव इति नैवं वतदनुपादानमिष्टं नान्यत्रेति वाच्यं । स्वककर्तव्यत्वेन तत्रापि तदुपादानस्य कर्तुमुचितत्वात् । अन्यथा केवलान्वयित्वेन ज्ञान-
स्य प्रमेयत्वादिलिंगस्य पक्षधर्मता नोपदिश्येत । तथात्वे च कथकसंप्रदायविरोधात् । असाधनताप्रयोगे च नियमतो भयवादिसंमति-
विषयतया कथकसंप्रदायविरुद्धतया च वाप्यनुपपत्या सः । किं च यदि केवलान्वयित्वे ज्ञाते व्यभिचारशंकाविरहात् वीप्सानुपादा- ७७
नं तदा सहचारशंकाया अपि तत्राभावात्सहचारबोधनप्रयोजनमपि नास्तीत्युदाहरणमपि न क्रियेत । यदि सहचारज्ञानं विना मैन

रा५

सापि न तद्ग्रह इति तद्बोधनाय तदुपादानं तदा तत्र व्यभिचाराभावज्ञानं विनापि न ततो व्याप्तिग्रह इति तद्विशिष्टसामानाधिकरण्यज्ञापनाय वीप्साय
पि मुदाहरणमावश्यकं। एवं वा भेदानुमानेपि वीप्सोपादेयैव। तथा चावच्छेदभेदेन नान्तपुरस्कारादेकस्य पक्षत्वं सपक्षत्वं च न विरुद्धमिति वीप्सापि ना
नुपपन्नेति। तस्मादत्र समाधानं चिन्त्यमिति। वीप्सायामपि व्यभिचारतादवस्थ्यमिति। अनेकधा हेतु पक्षस्थापनसमर्थाया वीप्सायाः साधनाधिकरणादि
त्रिव्यक्तिपक्षस्थापनेपि शरितार्थत्वसंभवादधिकरणान्तरे साध्यवत्त्वाग्रहान्न ततोपि न व्याप्तिग्रह इति भावः। ननु वीप्साया व्युत्पत्तिबलाद्व्याप्तिग्रहो
स्यात्तथा हि। वीप्सितशब्दश्रवणानन्तरं द्वितीयपदस्यानुवादकतया प्रयोजनजिज्ञासायां व्युत्पत्तिबलाद्व्याप्तितात्पर्यकत्वेऽवगृहीते व्याप्ति
बोधनस्यैव प्रयोजनतया प्रथमपदोपस्थाप्याभिन्नं सर्वसाधनाधिकरणान्तरस्यत्वेनानुगतेन रूपेणोपस्थापते। एवं च सर्वत्राधिकरणे सा
ध्यवत्त्वबोधनाद्भवति व्याप्तिग्रह इति चेन्न। इदं नैवं व्युत्पत्त्या नेवीप्साविनैव यथा योगाशा घम्पाभ्यां व्याप्तितात्पर्यनियम इति युक्त मन्तरा देवसर्वसि
द्धादत्र क्रमान्सहेतु ञ्चरितयत्पदादेवयावत्साधनाधिकरणोपस्थितौ वीप्सावद्व्याप्तिग्रहसंभवे किं गुरुणा वीप्सादरेण। यथा गङ्गायमुना
न्निपुरस्कारेणास्वल्पान्तरेणोदाहरणं भवतीति न वीप्साव्युत्पत्त्यादर इत्यत्र तात्पर्यं। ननु वीप्साव्युत्पत्त्यादरेपि व्यभिचारतादवस्थ्यमित्यत्र
तात्पर्ये। तदिदमुक्तं। यथा गङ्गायमुनाभ्यामेव व्याप्तो ल वाचा वीप्सावधारणे स्फुटार्थ इति। वीप्सया व्याप्तिलाभमभ्युपेत्याह। वीप्सा चेति। य
द्यपि तत्पदवीप्सायामपि नानन्वयस्तत्रापि यत्पदोपस्थापितयोः तत्पदे न प्रत्येकं परामर्शसंभवात्। यथा सा सा ह्रिया न मम मुखवीक्षते। तथा

चिं॰ ग्र॰ प्येकतत्पदोपादानात्पद्यमिमतसिद्धिसंभवे द्वितीयतत्पदोपादानेप्रयत्नगौरवमित्यभिप्रायेणानुक्तमिति द्रष्टव्यं। विरूपेति। यत्पदद्वयाभिन्नरूपे
णोपस्थितयोरपि केनचिदेकेन रूपेणोक्तत्पदेन परामर्शसंभवादित्यर्थः। अत्र वदंति। नित्यवीप्सयोरित्यनेन सूत्रेण वीप्सायां सुवंतस्यैकपद
७८ स्य स्थाने पदद्वयात्मकसमुदाय आदिश्यते। वीप्सा च तत्पदद्वयाभिधेययोर्व्याप्तुमिच्छा। व्याप्तिश्च तदभिधेयस्य साकल्येनापरपदार्थेन सह
78 संबंधः। तथा च पदद्वयसमुदाय एकपदतामापन्नो वयवशक्तिपुरस्कारेणावयुगपत्साकल्येनैकस्य प्रतिपाद्यमुपस्थापयतीति युगपन्निरवसी
यते। अतएवसमुदायस्य साकल्यार्थोपस्थापकत्वमेकपदत्वं च पुरस्कृत्य वक्तृवचनापत्तिर्न भिन्नेभिरित्यत्रेण तच्चाशंक्य परिहृतं वात्रा
सकारः। तस्माद्वीप्सायामपि व्याप्तिचारतादवस्थ्यमित्यसंगतमेव। तत्पदद्वयसमुदायेन हेतुमत्तयाबुद्धिस्थ। नासाकल्येनैवोपस्थाप
नात्। एवं च विरूपोपस्थितयोरित्याद्यसंगतं। न हि तत्र तत्पदद्वयं परस्परनिरपेक्षमिथो विलक्षणरूपद्वये न सकलं स्वाभिधेयमभिध
त्ते। किंत्वेकेनैवरूपेण तत्समुदाय एव। अन्यथा यद्येद्धूमवद्विमत्त्वयत्पदद्वयान्वयार्थे धूमवत्पदस्यापि तृप्तिप्रसंगादिति। अत्र क्रमः। वी
प्सायामपि व्याप्तिचारतादवस्थ्यमित्यस्यानुमितिहेतुव्याप्यत्वहतादवस्थ्यमित्यर्थः। अथ तन्मते ह्यन्योन्याभावगर्भव्याप्तिरनुमिति ७८
हेतुः। सा च वीप्सयोक्तरीत्या साकल्यसाधनाधिकरणासाध्यवत्त्वोपस्थापनेपि नोपस्थापयितुं शक्यते। अन्योन्याभाववाचकपदाभा
वात्। एवं वीप्सायाः सत्त्वे सत्त्वे वाय दिव्याप्तिग्रहानुकूलसहचारमात्रोपस्थापकत्वमुदाहरणस्य तदा किं वीप्सया। न च वीप्सायाः सर्वे

त्वसाधनाधिकरणे साध्यसहचारोपस्थापकत्वमिति वाच्यं सहचारज्ञानत्वेनैव तस्य व्याप्तिग्राहकत्वेन तस्य विशेषस्यानादरणीयत्वात्। एवं च याव
त्साधनाश्रयाश्रितसाध्यसंबन्धरूपायाऽपि व्याप्तेर्व्यभिचारिसाधारण्यात्तथा वीप्सावलेनोदाहरणे प्रतिपाद्यतया चानुमित्यनुकूलताऽभ्युपगन्त
व्यत्याह। वीप्सा चेति। योऽपीमां व्याप्तिमनुमित्यनुकूलत्वेनरूढ़ितस्यापि तत्पदे वीप्सा विफला। तां विनापि तल्लाभसंभवादित्यर्थः। न च तया
पि विरूपापन्नत्वयोरित्युपक्रमेव। समुदायस्यैकेनरूपेणोपस्थापकत्वादिति वाच्यं। गौरवेण समुदायस्याशक्ततया तेनोपस्थापकत्वे यत्
दद्वयस्यैव प्रत्येकं भिन्नभिन्नरूपेणोपस्थापकत्वात्। अत एवावयवश्क्षिपुरस्कारेणेति तद्वा पिस्थीकारः। न चैवमाद्यस्यापत्तिः। धूमवत्पदे
नानेककारकान्वितैकक्रियापदेनेवोभयबोधजनननाकाराय यथा वनाद्वह्निस्तन्मते तथायेयं थकृते च वसतो। अत्र च पायो धूमवानित्युदा
हरणे धूमे हेतौ नयुक्तो तेन हि मत्वर्थसामानाधिकरण्यं प्रतिपाद्यते न तु धूमसामानाधिकरण्यं। धूमस्याधेयतायाः पर्वतस्याधारतायां
श्चाप्रतीतेः। किंच धूमसंयोगस्याधेयतेति। तस्माद्यत्र धूमस्तत्र वह्निरित्येवोदाहरणं तत्रोचितमिति वदन्ति॥ अत्र धूमः। एवं पर्वतो वह्नि
मानिति प्रतिज्ञा वह्निव्याप्यधूमवांश्चायमित्युपनयः तस्माद्वह्निमानिति निगमनं च न स्यात्। वस्यादेराधेयतायाः पर्वतस्याधारतायां
श्च ततोऽप्रतीतेः। न च तत्रापि पर्वते वह्निरित्यवप्रतिज्ञादिकमिति वाच्यं कथकसंप्रदायविरोधात्। यदि च वह्न्यादिविशिष्टसंबन्धाधेयताप्र
तीतौ विशेषणांशस्य वह्नेराधेयताप्रतीयत एवेति तदेतदत्रापि तुल्यं इदं चेति। संप्रदायमते न सामान्यकृष्टांनसहितोदाहरणमि

अ० प्रायेण वा दृष्टांतस्य साध्यवैकल्येनोदाहरणाभासत्वं वोध्यं। यद्यप्युभयवैकल्येपि साध्यादिवैकल्यमस्त्येव तथाप्युत्पन्नाकौशलख्यापनाय तो
नापि रूपेणोद्भावनमिति द्रष्टव्य पन्यासइति वा ध्येयं। अनुपदर्शितेति। यथा महानसइत्येवोदाहरणमित्यर्थः। विपरीतेति। यो योग्निमा
७८ न्स धूमवानित्येवोदाहरणमित्यर्थः। एवमग्रेपि। अवयवांतराभासत्वं कथं नोक्तमिति चिंत्यं। अनुमितीति। अनुमितिकरणव्याप
79 रसमानाकारज्ञानजनकावयवइत्यर्थः। यद्यपि तस्मादिति निगमनेन तद्धेतुना व्याप्तिपक्षधर्मपरामर्शउक्तज्ञानजनकत्वं संभवति तथापि
साध्यव्याप्यविशिष्टपक्षविशेष्यकपरामर्शसमानाकारज्ञानजनकत्वं नास्तीति न तत्रातिप्रसंगः। ननु परेषां तृतीयलिंगपरामर्श
स्वीकार एव नास्ति कुतस्तल्लाभायोपनयइत्यत आह तदनभ्युपगमेनेति। तथा चोदाहरणानंतरं पक्षधर्मतायाः स्पष्टप्रदर्शनार्थं
मवयवांतरं परैः स्वीकर्तव्यमेव। व्याप्तिविशिष्टपक्षधर्मताप्रदर्शकं न त्विमर्थं कर्तव्यमित्यत्र शिष्यते तद्वत् तृतीयलिंगपरामर्शोद्दे
तुत्वयवस्थापनादेव निरस्तमिति भावः। तद्वादिति। अनौदासीन्यवारणाय कारणोत्पत्तं न साध्यवी विशेषणं। प्रतिज्ञात्वाभ्युपगमे ही
व्याप्तीति साध्यधीजनकत्वं साध्यधीज्ञानजनकत्वं। प्रतिज्ञावन्निगमनेपि साध्यपदस्यत्वत्वात्तद्भानपरत्वादिति भावः। पर्यायेति। ७८
प्रतीतेः। अपर्यवसानात्। साकांक्षत्वात्। अथेति। अभिधानं॥ व्याप्तिविशिष्टलिंगानुभवः। अभिधेयः। तथाभूतं लिंगं। ननु यावत्पक्षे सा
ध्यविपरीतशंकानावृत्ताभिधेयं पर्यवस्यति। न हि संभवति पक्षे साध्याभावो व्याप्यादिविशिष्टं च लिंगमिति। तथा चाभिधेयापर्यवसानादे

वाचाकोज्ञास्यादत आह विपरीतेति। साध्यविपरीतशंकानिरहेतेरपि पक्षे साध्यसत्वोपदर्शकप्रतिज्ञालक्षणात् अवयवान्तरादेवभावादित्यर्थः। अन्यथा।
प्रतिज्ञायास्तदनिवर्तकत्वे। नहीति। निगमनमपि विशेषदर्शनतां पक्षे निष्ठसाध्यसत्वोपदर्शकतारूपामनादृत्य तन्निवर्तकमित्यर्थः। सिद्धेति।
निगमने पक्षस्य साध्यवत्तया सिद्धत्वमाह प्रतिज्ञा च साध्यनिर्देश इति पक्षविष्ठसाध्यसत्वोपदर्शकत्वाविशेषेपि निगमनमेव तन्निवर्तकं नतु
प्रतिज्ञेतिभावः। स्वरूपेति। सिद्धत्वप्रतिपादकपदाद्यभावान्निगमनस्यापि साध्यविशिष्टपक्षमात्राभिधायकत्वमित्यर्थः। प्रत्युत साध्यनि
र्देशत्वमेवास्य तत्राह। साध्यत्वेति। अन्यथा प्रतिज्ञाया। अपि सिद्धनिर्देशत्वापत्तौ तत एव तन्निवृत्तिसंभवात्स्यवैफल्यमेवस्यादित्यर्थः। समीहितान्
निर्वाहात्। उद्देश्यपरानुमित्युत्पादानिर्वाहात्। तथा च निगमनं विना तात्पर्यविषयीभूता बाधितासत्प्रतिपक्षावितार्थानिश्चानापूर्व
पूर्वभानोद्रेवावपर्वातरस्यतेन सहाकाङ्क्षेतिभावः। प्रयोजकत्वे। जनकत्वं। असिद्धेति। तेन विनापि स्वार्थानुमित्युत्पाददर्शनादित्यर्थः।
यद्वा मह्वेति। अयं च नियमः परामर्शज्ञाने। अन्यथा पराभावज्ञाने सति परप्रत्यक्षं न भवतीन च तत्तद्भावज्ञानसाध्यमिति व्यभिचारः स्या
दिति। अन्यकेचित्। अबाधितत्वादिज्ञानस्यानुमितिहेतुत्वे लाघवे न परामर्शस्यैव तद्विषयतया तन्मिति हेतुत्वं वाच्यं न नु तद्विषयकज्ञा
नांतरस्य गौरवात्। तथा च परामर्शविषयतया बाधसत्प्रतिपक्षत्वयोरसिद्धित्वमेव स्यान्नतु तज्ज्ञानत्वेन वा तयोर्ज्ञानस्य साक्षादनुमि
तिप्रतिबंधकत्वे। परामर्शविघटनद्वारैव प्रतिबंधकत्वसंभवात्। तथा चापसिद्धांतः। किंच। बाधस्य पक्षीयसाध्याभावरूपतया तद्

चिं॰प्र॰ भावस्य पक्षीयसाध्यरूपतया साध्यज्ञानं साध्यज्ञाने हेतुरिति पर्यवसितं। तच्च न संभवति। सिद्धसाधनताप्रसंगात्। यदि साध्याभावप्रमा वा बाधस्तदा

८० स्वपरसाध्याभावप्रमाविरहरूपो वा बाधाभावस्तत्र साध्यसत्त्वनिश्चयं विना निश्चेतुमशक्य एव। तथा च तत्राप्यबाधितत्वनिश्चयापेक्षायामनि

श्चयेपेक्षणीय इत्यबाधितत्वनिश्चयस्यानुमितिहेतुत्वे परंपरया पक्षगोचरसाध्यसत्त्वनिश्चयस्यानुमितिहेतुत्वमापद्यते इति महदस

80 मंजसं। तस्माद्यदवगमे सति यन्न भवति तत्र तदभावज्ञाने सति क्षवत्येवेति परस्य बाधादिज्ञानप्रतिबंधाभिप्रायेणाबाधितत्वादि बाध्यते ननु ज्ञा

नसामग्र्यभिप्रायेणोत्पा॰ङ्कः। वस्तुतस्तु अनुमितौ गुणाद्वाराधनयोग्यताज्ञानवत्संशयनिश्चयसाधारणमबाधितत्वज्ञानमनुमितिहेतु

रित्यग्रे वक्ष्यते। तथा च हेतुत्वादिभिप्रायेणैव तद्बोधनमिति संमंतव्यं। असिद्धिलक्षणं चास्य यैव व्यस्थामः। ननु निगमनेनाप्यबाधितत्व

बोधनं प्रतिज्ञार्थस्यासिद्धत्वप्रतिपादनमुखेन विरोधिमवच्छेदकतया कार्यं अन्यथा प्रतिज्ञावयवादपि तद्बोधापत्तेः। तत्र चपार्गुक्ता न

न्वय इत्यत आह। नचेति। यद्यपि हेतुनाकांक्षितत्वलक्षणासिद्धत्वमपि न साक्षाद्बाधविरहबोधकं तथात्वेपि निगमनस्य सर्वथैव न

द्बोधकत्वं तथापि साध्यपुनर्वचनस्यानुवादकतया प्रयोजनजिज्ञासायां पारिशेष्याद्बाधादिविधूननमेव तदिति स्ववसीयते तथैव व्य ८०

क्तेः। तदाह। उपसंहारस्यैष महिमा यद्विपरीतशंकाविलापनं नामेति। सिद्धेति। सिद्धं पक्षादि। तथा च वह्निव्याप्यवानयमित्यत्र यथै

कदेशेनासिद्धस्य पक्षस्य परामर्शस्तथा साध्यांशेनापि सर्वेनाम्नापरामर्शोपि युक्त इत्यर्थः। विरोधवारणायेति। पक्षे साध्याभावस्य साध्याना

वद्व्याप्यस्य च विरोधिनो निरासायेत्यर्थः। तथेति। थाल्प्रत्ययस्य मतभेदेनार्थत्रयसंभवादिति भावः। प्रकारे। विशेषकधर्मे। उपनयस्य तथा चाय
मित्याकारत्वमाश्रित्याह। आद्य इति। हेतुमानित्यर्थ इति। उपनयस्य स्वसंनिहिततया यावद्दृष्टान्तरोपस्थापितस्य हेतुमत एव तथेत्यत्र तच्छब्देन परामृ
र्शसंभवादित्यर्थः। सामान्येनेति। यो यो धूमवान्सोऽग्निमानित्युदाहरणोपदर्शितसाधारणसाध्यवत एव हि मन्त्रसदोपस्थापितस्य पक्षस्य तच्छब्देन प
रामर्शसंभवात्पक्षवृत्तित्वप्रकारान्वयः पक्ष एवेत्यनन्वय इत्यर्थः। यद्यपि पक्षवृत्तित्वविशिष्टमत्वादिप्रकारकत्वं पक्षे नानन्वितं तथापि तथेत्यने
न तत्पदार्थभिन्नत्वेनैवावगतेन तत्पदार्थवृत्तिधर्मातिदेशः। तथैव व्युत्पन्नत्वेऽपीति भावः। अत एवेति। तत्पदस्य पक्षपरत्वे तत्सादृश्यस्य भेदगर्भ
तया तत्सादृश्यान्वयस्तत्रैवेत्यनन्वय इत्यर्थः। ननु तच्छब्देन दृष्टान्तपरामर्श एवास्तु तथा च तृतीयपक्षे नानन्वय इत्यत आह। अभेदानु
मान इति। अत्र पक्षस्यैव दृष्टान्तत्वेनोक्तदोषतादवस्थ्यमित्यर्थः। ननु धर्म्यभेदेऽप्यवस्थाभेदमादाय सादृश्यस्वीकारान्नोक्तदोष इत्यत आह
बहूनामिति। अतिप्रसंगादिति। अवयवविपर्यासादावपि योग्यतासत्त्वेन प्रकृतान्वयसंभवेनादोषत्वापत्तेरिति भावः। तस्मादिति।
न चकृतकत्वादित्येव कथं न क्रियत इति वाच्यं। सर्वनाममहिम्ना पूर्वोक्ताशेषफललाभेनोपसंहारसिद्धेः। ननु कोऽसौ सर्वनाम्नो सायंम
हिमा यत्पूर्वोक्तानुसंधानं नामेति। ननु मा भूद्विशिष्य निगमनेनानित्यत्वसिद्धतावगम इत्यत आह। अन्यथेति। तद्रूपत्वादिति। नि
गमनवैयर्थ्यादिति। निगमनेनापि पक्षे विशिष्यानित्यत्वस्योपसंहारे तद्बलाद्विरोधीभक्तवाधादिनिराकरणं न त्वन्यथेति भावः।। २१।

वि॰अ॰ हेतुवदवभासमान इति योगाद्धेतुरेव धर्मी हेत्वाभास इति तल्लक्षणमाह। अनुमितीति। अनुमितिकारणीभूताभावप्रतियोगिपदेन यस्मिन्सत्यनुमि
त्यभावनियमस्तादृशं ज्ञानं विवक्षितं। तेन व्यभिचारित्वादिदोषस्य तत्कारणविघटकस्य संग्रहो भवति। अत्र यथाश्रुते तदभाववत्ताप्रमाज्ञाने
८ नैवान्यथासिद्धत्वेनानुमितिं प्रत्यकारणतया तत्संग्रहापत्तेः। कारणपदस्य प्रयोजकपरत्वे उपाधिज्ञानस्यापि तादृशतया तत्रातिव्याप्त्यापत्तेः।
यथोक्तेनुमितौ तत्र न प्रसंगः। उपाधिज्ञानेपि व्यभिचारानुमितावनुमितिप्रतिबंधाभावादिति॥ ।ननु व्यभिचारादौ धर्मे तिव्याप्तिः न वहेतु
८१ त्वाभिमतत्वे सतीति शरणीयमिति वाच्यं। हेतुत्वाभिमतो नो हि कादाचित्कसत्कालीनो वा। आद्ये व्यभिचारादावपि कदाचित्सत्त्वेनातिव्या
प्त्यपरिहारः। अन्त्ये साधारणानैकांतिकादावनभिमानदशायामव्याप्तिः। किंच यथार्थपदेन वह्निव्यभिचरितत्वादिभ्रमविषयीभूतधूमा
दावतिव्याप्तिवारणेपि समूहालंबनीभूतैकहेत्वाभासविषयतादृशज्ञानविषयेभ्यन्यस्मिंस्तावति व्याप्तिस्तदवस्थैव। नच तादृशज्ञाने य
द्विषयतयानुमितिप्रतिबंधकत्वं तद्वे विषयपदेन विवक्षितमिति वाच्यं। बाधितलिंगासंग्रहापत्तेः। बाधज्ञानस्य पक्षनिष्ठसाध्याभा
वविषयतया तज्ज्ञानप्रमात्वविषयतया वा प्रतिबंधकत्वे न लिंगविषयतया प्रतिबंधकत्वात्। ननु बाधायां पक्षधर्मो हेतुरनैकांति ८१
कादावेति नियमो न तु व्यभिचारित्वादिनैवोक्तलक्षणगमनस्यादिति चेन्न। बाधितत्वेनैकरूपेण विभागानुपपत्तेः। न ह्येकेन रूपेण
सामान्यलक्षणे रूपांतरेण विभागासंभवति तथापि वह्नेरमाणोसंकीर्णविभक्तलेऽव्याप्तेर्वर्जलेपत्वात्। नसमन्वेव तत्रापि व्यभिचारित्वा

स्तु

दिसंभवः। अपि चाश्रयासिद्ध्यादिसंकीर्णसत्प्रतिपक्षे तेन रूपेण लक्षणागमनेपि सद्धेतौ तत्राव्याप्तिः। तत्र विरुद्धोभयव्याप्यगोचरसमूहालंबनस्य प्र
तिबंधकत्वात्। तस्याव्यभ्रमत्वनियमात्। नच सद्धेतौ स्वगोचरपरामर्शांशस्य प्रमात्वनियमात्तु रस्कारेणैवोक्तलक्षणागमनं स्यादिति
वाच्यं। ज्ञाने हि यावद्विषयतया प्रतिबंधकत्वं तावतिया याथार्थ्यं विवक्षितं भवत्। आधा परहेतुविषयतयापि सद्धेतुगोचरपरामर्शस्यानु
मितिप्रतिबंधकतया तदंशे चायथार्थत्वनियमेनोक्तदोषापरिहारात्। अन्यथा हि व्यभिचारादिभ्रमविषयीभूतधूमादावतिव्याप्तिः स्याद्
वह्नौ वा। धूमांशे तस्यापि याथार्थ्यात्। नच तस्य धूमविषयतया प्रतिबंधकत्वमेव नेति वाच्यं। किंचिद्धि व्यभिचारीति ज्ञाने धूमितिप्रति
बंधाभावाद्धूमविषयत्वेनैव तस्य प्रतिबंधकत्वात्। नच सद्धेतुपरामर्शस्यैवापरहेतुविषयतया प्रतिबंधकत्वे मानाभावः। तद्विषयक
स्य तस्यानुमित्यनुकूलत्वे न तद्विषयत्वेनैव प्रतिबंधकत्वात्। ननु सत्प्रतिपक्षे विरुद्धयोरनयोरन्यतरस्मिन् व्याप्तिपक्षधर्मतान्यत
रभंग इति ज्ञानस्य यथार्थस्य प्रतिबंधकतया नाव्याप्तिरिति चेन्न। तादृशज्ञाने हि न प्रमात्वेण। किंतु विरुद्धोभयव्याप्यमुभयमेकत्र
नवर्तत इति व्याप्त्यवधारणात्तु मितिरूपं तद्व्याघातं। तथा च यत्र विरोधिद्वयपरामर्शानंतरं विषयांतरसंचारादिना व्याप्तिपक्षधर्मता
न्यतरभंगानुमित्यनुकूलोद्बोधकाद्यपि परामर्शो न जायते तत्र सत्प्रतिपक्षितेव्याप्तिः स्यादेव वह्नौ वा। नच तादृशज्ञानाभावेन तत्रानुमित्यप्रतिबं
धात्ससंशयात्स एव नेति वाच्यं। विरुद्धोभयव्याप्यवत्त्वपरामर्शस्यैव विरोधिसामग्रीत्वेन प्रतिबंधकत्वात्। नहि व्याप्याद्यन्यतमभंगज्ञ।

नपुरस्कारेणाहेत्वाभासत्वं। किंतु कदाचित्सामग्रीसत्त्वे न तदपि ज्ञानं तत्र भवति। अन्यथा तस्यापि करणाविघटकत्वापत्तेर्बाधप्रतिरोधयोः साक्षा
दनुमितिप्रतिबंधकत्वमिति सिद्धांतोव्याकुप्येत। किंचायत्राविरुद्धं समीचीनं लिंगद्वयं विरोधित्वभ्रमेण सत्प्रतिपक्षितं तत्र तज्ज्ञानस्याप्य
यथार्थत्वेनाव्याप्तिर्बन्धत्वेपि वा पक्षव्यापिपक्षधर्मतान्यतरभंगाज्ज्ञानेनानुमितिप्रतिबंधकं किंतु सत्प्रतिपक्षसाध्यासाधकाविमा विनि
ज्ञानं सत्प्रतिपक्षेनुमितिप्रतिबंधकं। तच्च यथार्थमेवेति नाव्याप्तिः। अन्यथा साधकतानुमितिवैयर्थ्यापत्तेरिति। तदुक्तं साध्यासाधक
त्वे हि सिद्ध्यजनकत्वं अनुमितिप्रतिबंधकतावच्छेदकरूपवत्त्वं वा। तज्ज्ञानं च न साक्षादनुमितिप्रतिबंधकं। बाधवदनुमितिविरोध्यव
गाहनात्। नापि करणाविघटकं। व्यभिचारादिज्ञानवत्परामर्शविषयाभावानवगाहनात्। अन्यथाऽसाधकत्वस्य व्यभिचारादिव
द्धेत्वाभासांतरं तोपाध्यापत्तेः। असाधकतानुमानं च नानुमितिप्रतिबंधार्थं किंतु तदंशे हेत्वपमित्यग्रस्फुरमिति। किंच। अनुमिति
प्रतिबंधकयथार्थज्ञानविषयत्वं विशेषणमुपलक्षणं वा। नाद्यः। अज्ञायमाने नित्यदोषे विरुद्धादावव्याप्तिप्रसंगात्। न च तदा त
दसंग्राह्यमेवेति वाच्यं। साध्यव्यापकेकाभावप्रतियोगित्वादेर्विशेषलक्षणस्य तदापि सत्त्वेन संग्राह्यत्वात्। अन्यथा विशेषलक्ष
णानां तदातिव्यापकतापत्तेः। नापि द्वितीयः। सद्धेतावसाधारण्यसत्प्रतिपक्षे च विशेषादर्शनदशायां तादृशज्ञानविषयत्वात्तद्दर्श ५२
नदशायामपि हेत्वाभासतापत्तेः। अपि चायत्र पुरुषीयतादृशज्ञानविषयत्वं यस्यतं प्रति परं हेत्वाभासत्वमन्यं प्रत्यपि वा। आद्ये येन पुरु

षेणाविरुद्धादिविशेषेणानित्यदोषो न गृहीतस्तं प्रतितस्य हेत्वाभासतानापत्तेः। द्वितीये विशेषादर्शनदशायामेकं प्रतिकृतकत्वादित्यादिहेतो हेत्वा
भासत्वे विशेषदर्शनवतः पुरुषान्तरस्यापि हेत्वाभासतापत्तेरिति पूर्वः पक्षः। अत्रोच्यते। अनुमितिप्रतिबन्धकपदेन ज्ञानस्यानुमितिप्रतिबन्धकृ
तावच्छेदकाः सव्यभिचारित्वादयो विवक्षिताः। अनुमितिप्रतिबन्धकतावच्छेदकत्वं तु लिंगान्यत्वे सत्यनुमितिप्रतिबन्धकज्ञानविषयतावच्छेद
कत्वमेव। तद्रूपत्वगोचरयथार्थज्ञानविषयत्वं हेत्वाभासत्वमित्यर्थः। विषयत्वं च विशेष्यत्वं। नातो व्यभिचारादौ धर्मेति व्याप्तिः। तद्रूपत्वगोच
रत्वं तात्त्विकतद्रूपत्वगोचरत्वं। तेन पाकरक्तश्यामो यमितिधी यथार्थत्ववत्काद्यावित्कसंबन्धपुरस्कारेणासत्प्रतिपक्षत्वबुद्धे यथार्थ
त्वेन सत्प्रतिपक्षतोत्तीर्णस्य हेतोर्नातिव्याप्तिः। न चैवं यथार्थपरवैयर्थ्यं तात्कालिकतद्रूपत्वाभावादेव सद्धेतावननुप्रसंगादिति वाच्यं।
तद्रूपं हि न विषयविशेषणं किंतु ज्ञानविशेषणं। तथा चेदानीं वह्निव्यभिचारितो धूम इति भ्रमसाधारण्यातिप्रसंगतादवस्थ्यात्। तादृश
ज्ञानविशेष्यत्वं च विशेषणमेव। न चाद्यतायमानदशायामनित्यदोषेऽव्याप्तिरिति वाच्यं। तेन पुरुषज्ञानस्य तदानीं तद्दुष्टलिंगमित्याकार
स्य तदापि सत्वात्। न चैकपुरुषीयसत्प्रतिपक्षतादशायां कृतकत्वादिहेतोः पुरुषान्तरं प्रति सत्प्रतिपक्षतापत्तिः। आपादकाभावात्। न
हि तादृशज्ञानविषयः सर्वपुरुषं प्रति हेत्वाभास इति लक्षणार्थः किंतु तादृशज्ञानविषयो हेत्वाभास इति। एतावतैव हेतुतदाभासवि
कोपपत्तेः। तत्पुरुषीयसत्प्रतिपक्षतायां तत्पुरुषीयसमानवलोपस्थित्याप्रतिरुद्धतत्पुरुषीयानुमितिकारणीभूतलिंगत्वं प्रयोजकमिति न त

सिं॰च्य॰
८२

दापत्तिष्ठा एवं संसृष्टेनानुमा याः रोपि सामान्यतदृष्टापत्तिः विशिष्य ज्ञापकाभावात् न च समूहालंबनीभूते के हेत्वाभासविषयकता दृष्टा ज्ञान
विशेष्येऽन्वयसदृष्टेनादर्शिकाप्ति। तदंशेऽन्दृत्वप्रकारकयथार्थज्ञाननिर्विषयत्वस्यापि वह्नितत्वात्। बाधितमिदमिति ज्ञानस्य यथार्थत्वात्तद्वि
शेष्ये बाधितेलिंगेनाव्याप्तेः। न च तथापि सत्प्रतिपक्षेऽव्याप्तिरेवा। विरोधिपरामर्शविषयीभूतस्य प्रतिसाधनस्यैव दोषत्वात् स्थापनाहेतौ च
तत्प्रतिसंधानाभावेन तदृष्टलिंगोचरयथार्थज्ञानाभावादिति वाच्यं। इदं लिंगमनेन सत्प्रतिपक्षेण सत्प्रतिपक्षितत्वविशिष्टमिति ज्ञानस्य य
थार्थत्वेन सकलसिद्धतया ज्ञानरूपसंबंधस्य स्वरूपसंबंधं धस्य वा कल्पनात्। तत्संबंधेन ज्ञानस्यापि यथार्थत्वात्। अत एव तज्ज्ञानस्यानि
त्यत्वादमित्यदोषत्वे। नैवं धूमो वह्निव्यभिचारीति ज्ञानस्यैवं धूमादापत्तेः मेपि वह्निव्यभिचारित्वसत्त्वादनिव्याप्तिरिति वाच्यं। तज्ज्ञानस्या
यथार्थत्वेन सकलसिद्धतया तत्र तत्संबंधत्वाकल्पनात्। अवचानस्य गत्यात्तत्कल्पनात्। न च [illegible] बंधीभूतज्ञानस्यैवानुमितिप्रति
बंधकतया तत्संबंधगोचरज्ञानस्य नानुमितिप्रतिबंधकत्वमिति वाच्यं। इष्टापत्तेः। न ह्यनुमितिप्रतिबंधकज्ञानविशेष्यत्वमात्रं लक्ष
णार्थोपितु नादृशज्ञाने विशेष्यत्वं तच्च ज्ञानं व्यभिचारितत्वादिगोचरमनुमितिप्रतिबंधकमपीत्यन्यदेतत्। अन्यथा बाधितेष्वव्या
प्त्यापत्तेः। न हि लिंगविशेष्यकबाधितत्वादिज्ञानस्यानुमितिप्रतिबंधकत्वं। किंतु बाधमात्रविषयकस्यैव तद्विषयतया विरोधित्वाभावा ८२
दिति। न च याथार्थ्यस्य विषयघटिततया विषयविशेषतापीभूतमपि तदृष्टं लक्षमेत। तथा च यथार्थविशेषणात् त्वमित्यपरितोषादाह लक्ष

पूर्वलक्षणं केतोतीयद्विषयत्वेनेति। ज्ञायमानमिति च। तत्रापि च ज्ञानविषयीभूतस्य व्यभिचारादेर्न प्रतिबंधकत्वं किंतु ज्ञानस्यैवेत्यपरितो
षाद्द्वितीयलक्षणं मे तत्वं। अनेन व्यभिचारादयउपाधयो लक्षितास्तद्व्यत्वेनैव लिंगज्ञानस्यानुमितिप्रतिबंधकत्वात्। अत्र लक्षणे इयत्त्व
मित्यत्र तद्व्यस्य तद्व्यत्वमित्यर्थः। तेन व्यभिचारदोषधर्मेनातिव्याप्तिर्वधर्मिणी च लिंगेनासंभवः। न च पक्षताविरहरूपायाता न विरहस्व
पायावा॰ सिद्धेस्तस्य ग्रहइति वाच्यं इष्टापत्तेः। ज्ञायमानदोषस्यैवात्र हेत्वाभासत्वेन लक्ष्यत्वात्। न चाज्ञातादिर्दोषो ज्ञायमानः कार
णाभावत्वेन स्वरूपसत्त्व एव प्रतिबंधकत्वात्। नचैवं संदिग्धासिद्ध्यादिकं कथायां नोद्भाव्यं। अज्ञायमानदोषतया हेत्वाभासत्वाभावा
न्निग्रहस्थानांतरत्वाभावाच्चेति वाच्यं हेत्वाभासाश्च यथोक्ता इति सूत्रे तु उक्तसमुच्चयार्थे न च कारेण तस्यापि निग्रहस्थानत्वप्रति
पादनात्। असिद्ध्यसाधनस्य पक्षताविरहपर्यवसन्नस्यार्थांतरत्वेनैवोद्भावनमिति सर्वमवदातं। नन्वेतल्लक्षणं सद्धेतौ सत्प्रतिपक्षे साधारणे चा
व्याप्तं। व्याप्यत्वधर्मतया तस्यानुमित्यनुकूलतया अनुमितिप्रतिबंधकतावच्छेदकसत्प्रतिपक्षादेरभावादित्यत आह। दूषेति। तथा च तत्का
लेन ज्ञानस्यानुमितिप्रतिबंधकतया अनुमितिप्रतिबंधकतावच्छेदकसत्प्रतिपक्षितत्वस्यासाधारणत्वस्य च भावान्न तत्राव्याप्तिरिति भावः
य॰ ॰घपीति। अत्र सत्प्रतिपक्षपदं विरोधिसामग्रीपरं। तत्वेनैव सत्प्रतिपक्षस्य प्रतिबंधकत्वात्। ननु सत्प्रतिपक्षहेत्वाभासपरो। तस्य प्रत्य
क्षाप्रतिबंधकत्वादिति द्रष्टव्यं। तथापीति। न ह्यनुमितिं प्रति साधारण्यादोषत्वेनात्र लक्ष्यता किंतु ज्ञायमानदोषत्वेनेत्यर्थः। अनुमित्यसाध्या

चिं.अ. णादोषत्वमपि वाधसत्प्रतिपक्षयोरित्याहाय इति। बाधेनेत्युपलक्षणं सत्प्रतिपक्षेणापि द्रष्टव्यं। प्रत्यक्षे प्रत्यक्षबाधत्वेन न तत्सामग्रीत्वेन च प्रतिबं
८४ धकत्वात्। अपीतत्वानुमितावपि शैत्यपीतप्रत्यक्षयोरयानात्। अनुमितौ तु वाधमात्रस्य प्रतिबंधकत्वात्। तथा च वाधेनेत्यत्र वाधमात्रेणेत्यर्थ इ
त्यथः। ननु शब्देपि वाधमात्रस्यैव प्रतिबंधकत्वं अयोगपतज्ज्ञानमात्रस्यैव प्रतिबंधकत्वादिति चेत्। न। अत एव सत्प्रतिपक्षे ज्ञानं शब्दः करो
तिहीनिसिद्धांतानुसारेणान प्रतिबंधकत्वमनंगीकृत्यैवास्याभिधानात्। नवास्मत्सिद्धांतेपि न वाधमात्रस्य शाब्दधीप्रतिबंधकत्वं नरः शिरः शो
चानुमानेन न तद्दशौच वाधकागमस्य वाधापत्तेरिति वाच्यं। उपजीव्यसजातीयत्वेन शब्दस्य बलवत्त्वात् विरोधेनानुमानस्यैव तत्र वाधितत्वा
त्। अतएवागमवाधितोदाहरणमेतदत्र हि विरोधेनानुमानस्यैव तत्र वाधितत्वात्। अतएवागमवाधितोदाहरणमेनदेवाय्यं। नदुर्बलत्वाज्ञा
नदशायां विशेषादर्शनवतः समुत्पन्नया शौचानुमित्या शब्दवाधापत्तेरिष्टत्वादिति। ननु गौरवज्ञानस्यानुवर्थानुमितिप्रतिबंधकत्वाज्ञे
यवस्यापि व्यभिचारादिवद्धेत्वाभासत्वोपाधित्वमस्तु। न च हेतुविषयनयातज्ज्ञानस्य प्रतिबंधकत्वान्न तथात्वमिति वाच्यं। वाधस्याप्य
त्वापत्तेः। नहि तज्ज्ञानमपि हेतुविषयतया प्रतिबंधकमित्युक्तमिति चेत्। न। यज्ज्ञाने सत्यवश्यमनुमितिप्रतिबंधस्तस्यैव तथात्वेनाभिमतत्वे ८४
न च गौरवं तथा। फलमुखगौरवादेः प्रमाणसिद्धत्वात् ज्ञानस्याप्रतिबंधकत्वादिति।। श्री।। ।।ते च पंचभिरुपाधिभिर्विभज्यन्त इत्याह।
ते चेति। सव्यभिचारोपीति। यद्यपि सामान्यलक्षणेनेतरविभागो युक्तः। अन्यथा प्राप्तकालत्वापत्तेः। तथाप्यनुपसंहारीन सव्यभिचारान्तर्भूते

किंत्वसिद्धांतमेतत् इति केषांचिन्मतं। तथा च तत्साधारणेन सव्यभिचारलक्षणमयुक्तमिति शंकामपनेतुं तदंतर्गततत्वप्रदर्शनपरत्वमेवास्य न हेतुविभागे
तात्पर्यमिति भावः। प्रसंजकत्वं साधकत्वमापादकत्वं वा चांतद्व विरुद्धमुभयं प्रमेकस्मिन्न संभवतीत्याह। एकस्येति। नाप्युभयपक्षेति। साध्यवत्साध्या
भाववदुपपन्नद्वयं। अनुपसंहारिणि पक्ष एव तथैवेति भावः। उभयेति। अत्र सर्वैति विशेषणं। तेन न धूमादावतिव्याप्तिः। अर्थेति। साध्यसंदेहजन
ककोटिद्वयोपस्थितिः साध्यतदभावोपस्थितिः। तज्जनकं यत्पक्षधर्मताज्ञानं तद्विषयत्वे सतीत्यर्थः। ननु पक्षधर्मतेति व्यर्थमिति चेन्न। साध्य
संदेहजनकप्रामाण्याप्रामाण्यसंशयात्मककोटिद्वयोपस्थितिजनकज्ञानविषयीभूते ज्ञानत्वेति व्याप्तिवारकत्वात्। पक्षधर्मताज्ञाने च साध्यसंदे
हविषयवृत्तिताज्ञाने। न च ज्ञानत्वस्य साध्यसंदेहविषयपर्वतादिवृत्तिताज्ञानं प्रामाण्यसंशयात्मककोटिद्वयोपस्थितिजनकं किंतु ज्ञानवृत्ति
ताज्ञानमेवेति पक्षविनिवेशनं ह्युदासः। ननु सर्वं ज्ञानं निर्विषयं ज्ञानत्वादित्यनुमितिप्रामाण्यसंशयजनकज्ञानविषये ज्ञानत्वे तथाप्यतिव्याप्तिः।
तत्र संशयविषयीभूतज्ञानवृत्तिताज्ञानस्य च तथात्वादिति चेन्न। ज्ञानस्य निर्विषयत्वरूपसाध्यसंशयविषयवृत्तिताज्ञानत्वेन न प्रामा
ण्यसंशयात्मककोभयकोटिद्वयोपस्थितिजनकत्वं किंतु प्रामाण्यसंशयविषयीभूतनिर्विषयत्वानुमितिवृत्तिताज्ञानत्वेनैव। अन्यथा घटादि
ज्ञाने प्रामाण्यसंशयो न स्यात्। ज्ञानत्वस्य घटादिवृत्तिताविरहात्। ननु व्यभिचारादिभ्रमविषयीभूते सद्धेतावतिव्याप्तिः। न च हेतुत्वाभि
मतपदेन हेत्वाभासपरेण निरासः। अपक्षधर्मता इत्यभ्रमाविषयीभूते तथाप्यतिव्याप्तेः। न च तादृशकोटिद्वयोपस्थापकप्रमाविषयत्वेने

चिं॰व्री॰ वनातिप्रसंगात्। हेत्वभिमतपदवैयर्थ्यापत्तेः। मैवं। हेत्वभिमतपदस्य साध्याव्याप्यत्वपरत्वा। दिति केचित्। तत्र व्यभिचारभ्रमविषयीभूते विरु
द्धे तथाप्यतिव्याप्तिरेव। नच विरुद्धोप्यनेन रूपेणासाधारण एवेति ग्रंथकृताभिधानात्तस्य लक्ष्यत्वमिति वाच्यं। पक्षधर्मतापदवैयर्थ्यापत्तेः
।। निर्विषयत्वादोषसाध्ये तन्नत्वस्य विरुद्धत्वेन लक्ष्यत्वासद्व्यावर्त्तनस्यानभिमतत्वात्। सविषयत्वादोषसाध्येन विरुद्धमिति चेत्। न। तत्र सा
९५ ध्येतरस्य सद्धेतुत्वेन साध्याव्याप्यत्वपदेनैव वारणात्। नच विशेषणाज्ञानजन्यत्वादोषसाध्ये तस्मिन्नेव हेतावतिव्याप्तिः। तस्य तत्र सव्यभि
चारित्वेन संग्राह्यत्वात्। अन्यादृशस्य च साध्यस्याभावात्। तस्माद्यदि विरुद्धस्यासंग्राह्यत्वं तदा व्यभिचारित्वभ्रमविषयीभूते विरुद्धे
द्धेतिव्याप्तिः। यदि च तस्य संग्राह्यत्वं तदा पक्षधर्मतापदवैयर्थ्यापत्तेरिति चिंत्यं।। ।।वदंतु मम।। ।।ज्ञानपदं प्रमापरं।। एवं च यद्विषयत्वे
न कोप्युपस्थापकत्वं तद्देशे प्रमात्वं वोध्यं। तेन स्वरूपासिद्धिसंकीर्णेनाव्याप्तिः। विरुद्धं चासंग्राह्यमेवेति पक्षधर्मतापदं सार्थकं। तादृ
शज्ञानदशायामेवानुमतेर्लक्ष्यत्वमिति तदभावदशायां नाव्याप्तिः। नच हेत्वभिमतपदवैयर्थ्यं। तस्य साध्याव्याप्यत्वपरस्य सद्धेतुसाधा
रणातिव्याप्तिवारकत्वात्। केवलान्वयिनित्यादिनायं थे नतस्यात्रालक्ष्यत्वप्रतिपादनादिति। ननु सद्धेतावसाधारणे साध्याव्याप्यत्वाभा
वादव्याप्तिः केवलान्वयिसाध्यके चानुपसंहारिणि अव्याप्तिरित्यत आह। केवलेति। विशेषलक्षणस्यापि नह्यावश्यकस्यैव वोध्यत्वादि
तिभावः। यद्यप्यस्य संग्राह्यत्वेपि न दोषः। नच लक्षणावारणाय विशेषणमप्यनर्थकं तथापि सद्धेतुः कदापि न हेत्वाभास इति मते मालं वैत

उक्तं। अत इति। यतः पुरुषदोषो न वस्तुदोष इत्यर्थः। प्रमेयत्वेनेति। अयं घट एतद्घटाभिन्नः प्रमेयत्वादित्यत्रेत्यर्थः। तयोरिति। साध्यानवगतसहचार
इत्यादिलक्षणानुसारेणेत्युक्तं। साध्यवद्वृत्तित्वेन। निश्चितसाध्यवद्वृत्तित्वेनेत्यर्थः। पक्षे साध्यस्य संदिग्धत्वादिति भावः। यस्य यदा तादृशज्ञाना नु
विषयत्वं तदा तस्य व्यभिचारित्वमिति मतानुसारेणेदं बोध्यं। अन्यथा तादृशाविशेषस्यापि तादृशज्ञानविषयतया सव्यभिचारकत्वेनाभिव्याप्तिप्रसं
गात्। तथा च तस्यां दशायामस्यापि संग्राह्यत्वमिति भावः। एतज्ज्ञानेपीति। न च साधारण्यावगाहिज्ञाने एतज्ज्ञानस्याप्यनुमितिप्रतिबंधकत्वादिनि
गमनाविरह इति वाच्यं। एतज्ज्ञानस्य विरोध्यविषयकत्वेनाप्रतिबंधकत्वात्। अत एव हेत्वाभासत्वज्ञानमपि नानुमितिप्रतिबंधकं। विरोध्य
विषयकत्वात्। तज्ज्ञानेन व्यभिचरितत्वादिसंदेहापादनेन तस्यैव प्रतिबंधकत्वमिति भावः। एतेन पक्षवृत्तित्वे सतीति। अत्र विरुद्धान्यत्वम
पि विशेषणं। तथा च विरुद्धान्यस्य पक्षवृत्तेर्योनुमितिविरोधी अनुमितेः परंपरया विरोधी करणविघटक इति यावत्। तेन साधारण्या
दिकं लभ्यते। तत्संबंधाभावावृत्तिर्विद्यमानतत्संबंधत्वमित्यर्थः। एतेन स्वरूपासिद्धिसंकीर्णव्यभिचारिण्यव्याप्तिः विरुद्धे चातिव्याप्तिः।
विरुद्धान्यत्वविशेषणे विरुद्धसंकीर्णसाधारणाव्याप्तिः। बाधितत्वसत्प्रतिपक्षितत्वयोरपि अनुमितिविरोधित्वाद्बाधसत्प्रतिपक्ष
योरतिव्याप्तिः। कादाचित्कसंबंधमादाय साधारणे त्वसिद्धेनातिव्याप्तिरित्येतानि दूषणानि निरस्तानि वेदितव्यानि। स्वरू
पासिद्धिसंकीर्णेपि साधारणत्वादेस्तादृशस्य संभवात्। अन्यथा लक्षणानां। विरुद्धान्यस्येति विशेषणाद्विरुद्धे नातिव्याप्तिः। किं

वि॰ प्र॰ टी॰ द्धान्यस्यपक्षवृत्तेरनुमितिविरोधिसपक्षविपक्षव्यावृत्तत्वं तस्य विरुद्धसंकीर्णासाधारणोपि सत्त्वान्नाव्याप्तिः। बाधितत्वसत्प्रतिपक्षत्वयोरनुमि
तिपरंपराविरोधित्वान्नातिव्याप्तिः। अव्यावृत्तिपदमहिम्ना संबंधस्य विद्यमानत्वलाभात् हेतावसाधारणोन्नीणोति व्याप्तिवारणात्। ननु व्य
८६ र्थविशेषणो नीलधूमादौ विरुद्धान्यपक्षवृत्तेरनुमितिविरोधिव्याप्यत्वासिद्धत्वे तत्र नत्वं संबंधस्य विद्यमानत्वादिति व्याप्तिरिति चेन्न। न
व्यर्थविशेषणानामस्येत्यस्यापि विरुद्धत्वग्राहणीयत्वात्। अनुमितिविरोधित्वं चानुमितिप्रतिबंधकज्ञानविषयतावच्छेदकत्वं अतो नाज्ञान
रूपादावतिप्रसंग इति। विरुद्धोपाधिति। नचैवं विरुद्धान्यस्येति विशेषणं व्यर्थमिति वाच्यं अन्येन रूपेणोत्पन्नभिधानादुक्तरूपत्रयान्यतमवत
सिद्धाः॥ एवं विरुद्धस्य लक्षणत्वात्। तथा च सपक्षविपक्षव्यावृत्तत्वज्ञानदशायामेव विरुद्धस्यासाधारणत्वेन संग्राह्यत्वा ननु विरुद्धत्वनिश्च
यदशायां। उक्तरूपत्रयाभावात्। तथा च तद्वारणाय सार्थकमेवतदिति। साध्यव्याप्यत्वे सतीति। साध्यव्याप्यत्वसाध्याभावव्याप्यत्वोभ
यनिश्चयो विरोधिहेत्वाभासत्वोपाधिमत्त्वं साध्यवत्ता व्याप्तित्वसाध्याभावतन्मात्रवृत्तित्वनिश्चयविरोधिहेत्वाभासोपाधिमत्त्वे
त्यर्थः। प्रथममितिसव्यभिचारित्वग्रहं विना हेत्वाभासत्वाग्रहादित्यर्थः। यद्यपि तद्ग्रहेपि शब्दादिना हेत्वाभासत्वग्रहो तु शक्यत ८६
एव तथापि न सार्वत्रिकमित्यर्थः। यथाश्रुते सद्धेतावप्यसाधारणोऽव्याप्तिरिति यथोक्तस्यावश्यवाच्यत्वेऽव्याप्तिशंकेव नास्ति सप
क्षविपक्षव्यावृत्तत्वरूपहेत्वाभासत्वोपाधेरुभयविरोधिनस्तत्त्वापि सत्त्वादित्यपरितोषादाह कश्चिदिति। अयोगोलकादिसपक्ष

व्याप्यत्वे धूमादावपीयत उक्तं सर्वेति सपक्षविशेषणं। नापि पक्षवृत्तित्वं इति। विरुद्धान्यपक्षवृत्तीयत्वे अनुमित्यौपाधिकव्याप्यादि शून्यत्वं तद्
त्वमित्यर्थः। तेन न स्वरूपासिद्ध्यादि संकीर्णो व्याप्तिः। अनुमित्यौपयिकत्वं अनुमितिकारणपरामर्शविषयतावच्छेदकत्वं मतो वा धि
त सत्प्रतिपक्षयोरप्रसंगः। न च विरुद्धे स्वरूपासिद्धे चातिव्याप्तिः। स्वरूपासिद्धे ह्यनुमित्यौपयिकसंबंधशून्यत्वं पक्षधर्मतावच्छूत्वं।
विरुद्धे च सहचरितत्वशून्यत्वं। न च तदुभयं विरुद्धान्यपक्षवृत्तित्वं ते। प्रथमस्यापक्षधर्मेऽपि इति पस्य विरुद्ध एव वृत्तेरिति।। ॥अथ प
ति। ननु शब्दो नित्यः शब्दत्वादित्यादौ शब्दादिना व्याप्तिग्रहदशायामिति व्याप्तमिति चेन्न। नानयाप्तिनिश्चयस्य पक्षीयसाध्यगोचरता
नियमेन तत्र पक्षस्यैव सपक्षतया सकलसपक्षतिपक्षव्याप्यत्वस्वरूपोभयकोद्भुपस्थापकतावच्छेदकरूपवत्त्वसत्त्वाभावात्। विशेषाद
र्शन सहितस्यैव तस्योभयकोद्भुपस्थापकतावच्छेदकत्वे न विवक्षितत्वादिति। ननु केवलान्वयि साध्यकानुपसंहारिण्यव्याप्तिः। तत्र
साध्याभावकोटेरप्रसिद्धेरिति चेन्न। तस्यालक्ष्यत्वात्। व्याप्तिरिति निश्चयविरोधिसंदेहजनककोद्भुपाधितोर्विच्छित्तित्वाद्धा। ता हृः
श श्वसाध्यतद्भावसंदेहः। साध्यपक्षवृत्तित्वसंदेह इत्यभवनीति भावः। अथायमिक्षावानज्ञानादित्यत्र मीप्रामाण्याप्रामाण्यरूपोभ्या
कोद्भुपस्थितिजनकतावच्छेदकज्ञानत्ववति सद्धेतावतिव्याप्तिरिति चेन्न। लिंगनिष्ठतया यज्ज्ञानं उभयकोद्भुपस्थितिजनकं तद्
त्रस्यैतादृशावच्छेदकरूपवत्त्वेन विवक्षितत्वात्। ज्ञानत्वं तु प्रामाण्यसंशयविषयत्वनिश्चये न ज्ञातं तथा। पर्वतो वह्निमानित्यन्

अ॰टी॰ मिति ह्वृत्तितया ज्ञातस्य ज्ञानान्तरस्य वह्नितदभावसंशयजनकत्वाभावापादनाभावापसंशयात्मकोभयकोट्युपस्थापकत्वात् । अन्यथा धूमवति
८९ तया तस्या ज्ञाना न तथात्वेन स न त्वादिति । प्राभा । एपा विशेषणाकसाध्यतदभावकोट्युपस्थापकतावच्छेदकरूपवत्त्वेवा तात्पर्यमतो न ज्ञानेति
तिव्याप्तिः । विरुद्धान्यपक्षवृत्तित्वे सतीति । एतच्च लक्षणं पक्षवृत्तित्वे सतीत्यादिपूर्वपक्षलक्षणौ नैव व्याख्यातं ॥ लक्षणानुरोधेनेति ।
यद्विषयत्वेन ज्ञानस्यानुमितिप्रतिबंधकत्वमिति लक्षणानुरोधेनेत्यर्थः ॥ साध्यवन्मात्रेति ॥ ननु सद्धेतु संकीर्णे विरुद्धसंकी
९७ र्णे वासाधारणे ऽव्याप्तिः । प्रथमस्य साध्यवन्मात्रवृत्तित्वात् । द्वितीयस्य साध्याभाववन्मात्रवृत्तित्वात् । न च साध्यवत्पदं निश्चितसा
ध्यवत्परं । साध्याभाववत्पदं च निश्चितसाध्याभाववत्परं । अनुपसंहार्यव्याप्तेः । सद्धेतु तादृशायां धूमेतिव्याप्तेश्च । प्रथमे निश्चित
साध्यवतो प्रसिद्धेः । प्रमेयमात्रस्यैव पक्षत्वे न संदिग्धसाध्यकत्वात् । द्वितीये निश्चितसाध्यवत्यपि पक्षे धूमस्य हेतोः । अत एव तदुभ
यपदं पक्षातिरिक्त तदुभयपरमपि नो नवसाध्यवन्मात्रवृत्तित्वे नानिश्चितत्वे सति साध्याभाववन्मात्रवृत्तित्वेनानिश्चितत्वे । हे
त्वाभासत्वेन विशेषणात् । ज्ञायमाने धूमे व्यतिरेकव्याप्तिमत्त्वया ज्ञायमानेवा तत्त्वातिव्याप्तिरिति वाच्यं ॥ व्यतिरेकव्याप्तिमत्त्व ८९
या गृह्यमाणो हेत्वंतरेणासत्प्रतिपक्षिते धूमे तथाप्यतिव्याप्तेः । जलह्रदादौ पक्षे स्वरूपासिद्धतया हेत्वाभासे ज्ञायमाने धूमेति
व्याप्तेश्च । अयासाधारणाभावकालावच्छिन्नसाध्यव्याप्यत्वाभाववत्त्वे सति तत्कालावच्छिन्नविरुद्धत्वाभाववत्त्वमुक्तलक्षणं ।

र्यं विवक्षितः। साध्यव्याप्ये विरुद्धे चासाधारणत्वदशायां नदभावककालावच्छिन्नविरहात्राव्याप्तिरिति चेन्न। असाधारणपदं हि तत्पुरुषीयं तत्साध्यीयंच
किंचित्पुरुषीयं यत्किंचित्साध्यीयं वा त्र विवक्षितं। आद्ये यत्साध्यविशेषमादाय यस्य पुरुषस्य प्रतीतं नासाधारण्यं कदापि तत्साध्यकसाधारणा
नैकान्तिके प्रमेयत्वादावव्याप्तेर्वह्निमत्पक्षकत्वात्। न च तत्पुरुषं प्रति साधारणत्वाभावेपि पुरुषान्तरं प्रति स्यादिति वाच्यं। तस्य निष्प्रयोजकत्वात्।
यत्साध्यकासाधारण्यं कस्यापि नावतीर्णं तत्साधारणे सर्वथैवाव्याप्तेः। अन्त्ये यत्किंचित्पुरुषीययत्किंचित्साध्यकासाधारण्यदशायां तद्दे
वासाधारण्यमादाय विशिष्टाभावसत्त्वे सद्धेतुतद्दशायां शब्दत्वादावतिव्याप्तेः॥ अत्रोच्यते॥ ॥साध्यवन्मात्रवृत्तित्वसाध्याभाववन्मात्रवृत्ति
त्वोभयनिश्चयविरोधिहेत्वाभासतोपाधिमत्त्वं विवक्षितं। तादृशोपाधिः सपक्षविपक्षगामित्वयत्पक्षसंहारित्वं असाधारणत्वं वा। यद्यपि साधारणस्य
सत्प्रतिपक्षोद्भावकतया दृष्टकालस्य पक्षे व्याप्तिनिश्चयविरोधित्वं नास्ति तथापि साध्यवन्मात्रवृत्तित्वादिनिश्चयविरोधित्वमस्त्येव। व्यतिरेकव्याप्तिपुरस्कारे
ण तस्य सत्प्रतिपक्षोद्भावकत्वात्। केवलान्वयिसाध्यकोनुपसंहारी संग्राह्य एव नास्मिन्नपि हेतुः इति न तत्राव्याप्तिः। तत्संग्राह्यता पक्षेतु साध्यवन्मा
त्रवृत्तित्वनिश्चयपदेन साध्यनिष्ठहेतुसमानाधिकरणात्यन्ताभावाप्रतियोगित्वनिश्चयः साध्याभाववन्मात्रवृत्तित्वनिश्चयपदेन साध्यनिष्ठहेतुव्या
पकाभावप्रतियोगित्वनिश्चयश्च विवक्षित इति ध्येयं। केचित्तु केवलान्वयिसाध्यकोनुपसंहारी सद्धेतुरसाधारणो विरुद्धसंकीर्णो साधारणस्तु
यन्मते न संग्राह्यस्तन्मते नेदं लक्षणं। वृत्तिमत्त्वेन विशेषणान्नाकाशादावतिप्रसंग इत्याहुः। ननु विरुद्धेऽप्यनेन रूपेणासाधारण एवेति यथ कुतोभिधा

अ॰टी॰ नाउक्तलक्षणानां तत्राव्याप्तिरिति चेन्न नानन्वयि विरुद्धोपि साधारणानैकान्तिक इति तद्दर्थोपि नसाधारणोदाहरणत्वोपाधिसत्त्वापत्तीति विरुद्धस्यापि त
द्धत्वेन ज्ञायमानस्यानुमितिप्रतिबंधकत्वमिति। साधारणविभाजकश्चोपाधिः सपक्षविपक्षगामित्वमिति न तस्यासाधारणत्वं किंतु सर्वदा विरु
८८ द्धत्वमेव वा कस्यचिद्विरुद्धत्वप्रयोजकोपाधिमत्त्वेन ज्ञातस्यानुमितिप्रतिबंधकत्वं कस्यचित्त्वसाधारणत्वप्रयोजकविपक्षगामित्ववत्त्वेनेति। न
४४ च विपक्षगामित्वमेव साधारणविभाजकोपाधिः स्वीक्रियतां तथा चानेन रूपेणासोपि साधारण एव भवत्विति वाच्यं। त्रस्य महर्षेर्नियोग
पर्यनुयोगानर्हत्वात्। अन्यथा साक्षात्प्रतिबंधकत्वेन बाधकांचैव प्रतिरोधयोरप्येकत्वापत्तेः। वयं तु एतल्लक्षणाशयेन संप्रदायमतेन। मणि
कन्मतेनु विरुद्धस्यापि सव्यभिचारत्वेन साध्यवन्मात्रवृत्तित्वनिश्चयविरोधिज्ञानविषयत्वोपाधिमत्त्वं नित्यसाधारणो दृष्टत्वमिति निश्चयमुपश्यामः। न चैवं
विरुद्धस्याप्येतद्विभागाव्याघातः उपधेयसंकरेप्युपाधेरसंकरात्। अन्यथा तस्यापि सिद्धांतभूतत्वेनोक्तदोषापत्तेः। केचित्तु साध्य
व्याप्यत्वेनाप्रतीयमानत्वे सति बाधासिद्ध्युन्नीतिरिक्तहेत्वाभासता प्रयोजकधर्मयोगित्वं लक्षणं। असाधारणे च न सत्प्रतिपक्षीभूय दूषणं
तदंतर्भूतत्वप्रसंगात्। दूषकताबीजस्यैकत्वात्। तथा च सद्धेतावसाधारणो नाव्याप्तिरित्यपि वदंति। तन्नेति। तेनासाधारणस्य पक्षधर्म ८८
द्भावनिरूपितव्यतिरेकव्याप्तिग्रहपुरस्कारेण साध्यतदभावोल्लापकतया दूषणत्वपक्षे नाव्याप्तिरित्यर्थः॥ प्रथमलक्षणेतु नत्र त
स्मिन्नव्याप्तिरेव। तत्र संशयविरोधीभूतव्याप्तिग्रहविरहदशाविशिष्टस्यैव सपक्षविपक्षव्यावृत्तत्वस्येवोभयकोट्युपस्थापकतावच्छेद

कत्वेन संग्राह्यत्वादिति भावइति वदंति। नचैवमिति। यद्यपि बाधस्य साध्याभावरूपत्वं ननु तज्ज्ञापकत्वं तथापि प्रमित साध्याभाव वत्पक्षकत्वरूपस्य बा
धस्य पक्षे यदि हेतोरस्मिन्नतत्तया तस्य लिंगतया साध्याभावज्ञापकत्वादित्यर्थः। इदं चोपलक्षणं। विरुद्धस्यापि साध्याभावज्ञापकत्वेन तदंतर्भावापत्तिरिति
पि द्रष्टव्यं॥ ॥ननु तयोः संग्राह्यत्वान्न दोष इत्यनुशयेनाह। संयोगादीति। अत एवेति। अन्योन्याभावस्याप्यवृत्तित्वादुक्तानित्यामेरित्यर्थः
।यद्वा। अनुपसंहार्यतित्याभेरित्यर्थः। अत एवात्रेन तु ग्राह्यत्वं लक्षणमाह। नापीति। निश्चितसाध्यवद्वृत्तित्वस्य तिसाध्यवदन्यवृत्तित्वमित्यर्थः
।ननु निश्चितसाध्यवदन्यवृत्तित्वेन हि पक्षवृत्तित्वेन धूमादावतिव्याप्यापत्तेरिति। अत एवेति। अमुकसाध्यवदन्यस्मिन्नपि हेतुरित्येवा
भावात्तदर्थः। नापीति। एवं विपक्षत्वस्य मन्योन्याभावगर्भमयेऽत्यं नाभावगर्भमिति नपौनरुक्त्यं। सपक्षपदं चात्र निश्चयाघटितमतो न पौ
नरुक्त्यं। ननु व्यर्थं विशेषणं नापक्ष्यापदव्यर्थतानेत्यर्थः। यद्वा। साध्यवत्पदस्य र्थतानेत्यर्थः। सर्वेति। यत्किंचित्साध्यवदन्यवृत्तित्वं धू
मादावपीत्यत उक्तं सर्वेति। साध्यवद्विशेषणं न साध्यस्य। तदुक्तो प्रसिद्धेः। सामान्याभावाविवक्षायामिदं। तद्विवक्षायां तु व्यर्थविशेष
णत्वमेव दृष्टव्यं। एकव्यक्तिकेति। एकाव्यक्तिराश्रयरूपा यस्य साध्यस्य तदेकव्यक्तिकं। तत्रानेकवादि सर्वपदार्थासंभवादित्यर्थः
॥ ॥विपक्षवृत्तित्वमिति। ननु विपक्षत्वं निश्चितसाध्याभाववत्त्वं साध्याभाववत्त्वं वा। नाद्यः॥ असाधारणावदनित्यदोषापत्तेः। न द्वितीयः। त
न्निश्चयत्वेन प्रतिबंधकत्वे संदिग्धानैकांतिकोच्छेदापत्तेः। तज्ज्ञानत्वेन प्रतिबंधकत्वे च पक्षीयव्याप्तिज्ञानस्य संशयस्यापि तत्त्वेनानुमितिमात्रा

ना२

कुत्र प्रसंगात्। न च साध्याभावांशस्यानिश्चयीभूतत्वेन ज्ञानत्वेन प्रतिबंधकत्वमिति वाच्यं साध्यांशनिश्चयीभूतज्ञानत्वेन प्रतिबंधकत्वे साधारणस्यापि
नित्यदोषत्वापत्तेः। अपि चासाधारणो मिथ्याज्ञानत्वादित्यत्र पक्षातिरिक्ते सर्वत्र मिथ्यात्वनिश्चयरूपाप्रसक्तिश्च यद्दशायां शाकपाकजत्वेनोपाधित्वसंदि
 ग्धे न व्यभिचारसंदेहापादनं पक्ष एवकर्तव्यो। अत्र विशेषदर्शनात्। तथा च साध्याभावांशानिश्चयीभूतत्वाभावाद्व्यभिचारसंदेहः प्रति
बंधको न स्यात्। नैवं व्यभिचारिता न। तत्रोपाधिसंदेहात्तु अज्ञानप्रसंगात्। अप्रसिद्धोतात्वा। ह्रितिरिति कर्तृकाकार्यत्वादित्यत्र प्रयोजक
त्वादिति साध्याभावांशसंशयीभूतपक्षीयव्यभिचारसंदेहप्रतिबंधकत्वस्य सर्वसिद्धत्वात्। किं च साध्याभावप्रतियोगिवैयधिकरण्याप्रा
वेशः यमेतत्संयोगी एतत्त्वादित्यत्र सद्धेतावति व्याप्तिः। तद्व्यवेशे च साध्यसाध्याभावसामानाधिकरण्यमिति फलितार्थः। तथा च साध्याधि
करणाभिन्नाधिकरणवृत्तित्वज्ञानं प्रतिबंधकमस्तु। लाघवात्। किं च साध्यवद्वृत्तित्वज्ञानस्यावश्यं प्रतिबंधकत्वात्तज्ज्ञानेनैव तत्वादाधिक्यं।
एवं च साध्यनिष्ठहेतुसमानाधिकरणात्यंताभावप्रतियोगि ×× धिकरणाभिन्नाधिकरणवृत्ति×त्वज्ञानस्य हेतुनिष्ठसाध्यवदन्यावृत्तिभिन्नत्व
ज्ञानस्य हेतुनिष्ठसाध्यसंबंधाभावसामानाधिकरण्यज्ञानस्य साध्यवन्निष्ठहेतुसमानाधिकरणात्यन्ताभावप्रतियोगित्वज्ञानादेश्च
प्रतिबंधकत्वादाधिक्यं। मैवं। विपक्षवृत्तित्वेहि साध्याभाववद्वृत्तित्वमेव न तु निश्चयगर्भमतो नानित्यदोषता। न हि वृत्तित्वनिश्चयः सर्वदानुमितिप्रति
बंधकः। यन्निश्चीयमानमनुमितिप्रतिबंधकं भवत्येव तस्यैव नित्यदोषत्वं। असाधारणे च शब्दत्वादौ पक्षे साध्यसंशयदशायां सपक्षविप

त्व्याप्यत्वत्वनिश्चयो घटः पटाद्यनित्यव्योमादिनित्यव्याप्यत्वनिश्चयपर्यवसन्न एव प्रतिबंधकः। पक्षे च साध्यनिश्चयदशायां घटादिव्योमादिव्याप्य
त्वेन निश्चयो विद्यमानो ऽकिंचित्कर एव। न हि तत्त्वेन प्रतिबंधकत्वं तस्य। किंतु सपक्षविपक्षसकलव्याप्यत्वनिश्चयत्वेन। तथा च तदा पक्षस्यापि सपक्ष
त्वेन तन्निश्चयस्य तत्त्वं नास्तीति न तत्प्रतिबंधकत्वमिति तस्यानित्यदोषता। प्रतिबंधकता च व्यभिचारज्ञानत्वेन। न चानुमितिमात्रोच्छेदः। तर्क
विशेषदर्शनादिना संशयोच्छेदे ऽनुमानप्रवृत्तेः। यद्वा। हेतुमत्तया निश्चिते उपाधिसंदेहाधायकता हि तयोर्व्यभिचारसंदेहस्तदतिरिक्तव्यभिचारज्ञा
नत्वेन प्रतिबंधकत्वं। वस्तुतस्तु व्यभिचारसंशयतन्निश्चययोरेकं न प्रतिबंधकतावच्छेदकं। तन्निश्चयस्य व्यभिचाररूपव्याप्त्यभावनिश्चय
त्वेनैव प्रतिबंधकत्वात्। तन्निश्चयस्य तेनैव रूपेणान्यत्र प्रतिबंधकत्वात्। व्याप्यसंशयस्यान्यथा प्रतिबंधकत्वादनन्यगत्या तादृशस्यापि
व्यभिचारसंशयत्वेनैव प्रतिबंधकत्वं कल्प्यते। न च पक्षीयसाध्यसंदेहेन तथाप्यतिप्रसंग इति वाच्यं। प्रतिबंधकाननुगमस्यादोषतया फ
लबलेन तत्संदेहत्वेनैव प्रतिबंधकताकल्पनात्। निश्चिते हेतुमति उपाधिसंदेहाधानाद्धि तत्र साध्यव्यभिचारसंशयातिरिक्तव्यभि
चारसंशयत्वेनैवव्यतिन किंचिदनुपपन्नं। अत एव व्यभिचारसंशयत्वेनैव तदुपजीवनमिति। साध्याभावे च प्रतियोगिवैयधिकरण्यं
विशेषणीयमेव। न च गौरवं। तज्ज्ञाने हेतौ साध्याधिकरणभिन्नाधिकरणवृत्तित्वानवभासनात्। विरोधिविषयतया गुरुविषयस्यापि
तस्य प्रतिबंधकत्वात्। न च साध्यवदन्यन्निष्ठत्वादिज्ञानानामपि प्रतिबंधकत्वादाधिक्यं। अन्यतमाभावगर्भव्याप्तिपक्षे ऽन्योन्याभावगर्भ

अ॰टी॰ व्यभिचारज्ञानस्याप्रतिबंधकत्वादन्योन्याभावगर्भव्याप्तिभ्रमस्य चैतत्तद्गर्भव्यभिचारज्ञानस्यप्रतिबंधकत्वात्। प्रतिबंधकत्वे वा व्यभिचारज्ञान
प्रतिबंधकज्ञानविषयता। वच्छेदकत्वेन व्याप्तिज्ञानकारणी। मूलसहचारग्रहसह कार्यभावप्रतियोगिज्ञानविषयतावच्छेदकरूपवत्त्वेन
९० वा सर्वेषामेकीकृत्य साधारणत्वेन विभज्य नाना। याध्यसे वे धस्यापि यावत्पातस्य वे शाभावसामानाधिकरण्यस्यावश्यंविरोधितया तत्स्य ग्रहा
र्थमुक्तोपाधेरवश्यानुसरणीयत्वात्। विरुद्धस्यापि साधारणत्वेन संग्राह्यत्वेऽनुक्तोपाधिमत्त्वमेव तत्संग्राहकं। तदसंग्राह्यत्वे सपक्षग
90 मित्वसहकृतैतेनद्रुपाधिमत्त्वमितिसर्वमवदातं॥ ॥तन्वाह्यानइति। यद्यपि तत्त्वेन तावन्मात्रदृशायामपि साधारण्यमस्य वा। अस्यानि
त्यदोषत्वात्। तथापि तदा तन्नोद्भाव्यते। किंतु विरुद्धत्वमेवेति भावः। एतत्संग्राहकंच सामान्यलक्षणं प्राचीनदर्शितमिति विशेषलक्षणासंग्र
हीतस्य सामान्यलक्षणेनासंग्रहो न दोषः। यदि च दूषणोपाधिमात्रस्यैव सांकर्यं तदा दोषशंकापि नास्ती तिसत्त्वे निश्चितसाध्यवदिति॥ अ
त्र सर्वीतिनिश्चितसाध्यवद्विपक्षयोरुभयोर्विशेषणं। तेन सद्धेतुधूमादि विरुद्धयोर्नातिव्याप्तिः ननु पदाशब्दे नित्यत्वनिश्चयो नास्ति
शब्दत्वे चाप्यवाक्यादेरनित्यत्वप्रतियोगिकव्यतिरेकव्याप्तिग्रहस्तदा तत्रातिव्याप्तिरिति चेन्न। संशयविरोधिविशेषदर्शनविरहकाली
नस्य सर्वे सपक्षविपक्षव्यावृत्तत्वस्य विवक्षितत्वात्। हेत्वाभासत्वेन विशेषणात्तत्र नातिव्याप्तिरिति तु न वाच्यं। पक्षांतरे शब्दत्वस्य स्वस्व ९०
पासिद्धतया हेत्वाभासत्वेन दोषतावच्छेदकात्। शब्दत्वादिनित्यत्वेति। तथा च तदानस्य पक्षव्यावृत्तत्वमपीति नातिव्याप्तिरिति भावः। अन्ययेति।

संदिग्धसाध्यधर्मो धर्मी पक्ष इति मतमालंब्यैतदुक्तं व्याप्तिग्राहकमिति। नन्वेवं व्याप्तिग्राहकसहचारग्रहविघटकतया स्वतो दूषकत्वादुपाधि-
वद्धेत्वाभासत्वं न स्यादिति चेन्न। पूर्वपक्षिणा तस्य इष्टत्वादिति भावः। उपजीव्यत्वमिति। सपक्षव्यावृत्तत्वेनैव तदाहरणाभावात्। अन्यथोदाहर-
णामपि कुर्यादित्यर्थः॥ असाधारणेति। अप्रतिभादिनाउदाहरणाप्रयोगसंभवादिति भावः। व्यतिरेकिप्रयोगे। संपूर्णोऽ इति शेषः। तथा च तत्र न्यून-
त्वाभावादिदमेवोदाहृतमित्यर्थः॥ अकिंचित्करत्वादिति। तत्र सहचारज्ञानविघटनद्वारापि व्याप्तिग्रहाप्रतिबंधकत्वादिति। स्वार्थानुमान-
इति॥ तथा चोभयव्यावृत्तत्वं कुत्रापि न दूषणमिति भावः। अयोगात्। अर्थापत्तितद्वृत्तिपरमतो व्यतिरेकितया निस्वमते। साध्यतदभावोच्छाप-
कतयेति। साध्यतदभावानुमित्यनुकूलव्यतिरेकव्याप्तिद्वयसहितपक्षधर्मताज्ञानविषयत्वेनेत्यर्थः। नन्वेवं सत्प्रतिपक्षोऽसाधार-
णोद्भावनं न स्यात्तेनापि सत्प्रतिपक्षस्यैव करणादिति वाच्यं। इष्टत्वादिति सांप्रदायिकाः॥ ॥अत्र वदंति॥ ॥यो नित्यत्वाभाववान् स श-
ब्दत्वाभाववानिति व्यतिरेकव्याप्तिग्रहे शब्दत्वाभावरूपव्यापकाभावरूपस्य शब्दत्वस्य शब्दे निश्चये नित्यत्वाभावरूपस्य तु व्याप्यस्य तत्-
त्र संशय इति संदिग्धानैकांतिकस्य तत्र प्रतिबंधकत्वात्तत्र व्याप्तिग्रह इति न सत्प्रतिपक्षत्वं। न चानुमानमात्रोच्छेदकतया पक्षीयो व्यभिचारसं-
शयो न प्रतिबंधक इति वाच्यं। तावता व्याप्यवत्तया निश्चिते व्यापकसंशयस्यैव दोषत्वात्। व्यापकाभाववत्तया निश्चिते व्याप्यसंशयस्य
प्रतिबंधकत्वेन कस्यापि विप्रतिपत्तिः। न चैवं व्यतिरेकिमात्रविलयापत्तिः। सर्वत्र व्यापकहेत्वभावाभावरूपहेतुमत्तया निश्चिते

मान३

अ॰टी॰ ८२ 91 पक्षेसाध्याभावरूपस्यापिसंशयेनसंदिग्धानैकांतिकत्वादितिवाच्यं।यत्रतर्कादिनापक्षीयसाध्यसंदेहस्योदासस्तत्रैवतत्संभवात्।व्यतिरेकिणएवप्रसि
द्धमेवसाध्यंयस्यसिध्यतितन्मतेनवातत्संभवात्।नचात्रापिपरस्परविरुद्धतादृशतर्कावतारःसंभवति।एककोटिकतर्कावतारकालेएकत्रविशे
षदर्शनादसाधारणस्यसंधोपिनास्तिकुतोव्यतिरेकव्याप्तिग्रहपुरस्कारेणसत्प्रतिपक्षत्वं॥अतएवपक्षतादशायांसाध्यतदभावानिश्चयेनत
स्यदोषत्वमित्यनंतरमेवाभिधास्यंतिग्रंथकाराः।किंच।एवंदूषकताबीजभेदस्यहेत्वाभासभेदप्रयोजकत्वात्तत्रचतदभावात्सत्प्रतिपक्षभेदोन
स्यात्।हेतुभेदाभेदमात्रस्याप्रयोजकत्वात्।तावतासत्प्रतिपक्षविशेषतापत्तेश्च॥नचोभयपरामर्शविषयतापन्नप्रतिसाधनेसत्प्रतिप
क्षः।समेपक्षव्यावृत्तं चकासायमानेनतद्भिन्नमेवप्रतिबंधकं।तद्ग्रहस्यव्यतिरेकोभयसहचारग्रहरूपत्वपाविरोधिपरामर्शाद्यापकत्वादि
तिवाच्यं।एवंव्यभिचारोद्भावकोपाधिवृत्तस्यस्वनिरीहकेतयाहेत्वाभासत्वेनस्यानैकांतभावबहिर्भावचिंता।किंच।अत्रनिय ८२
मतःसाध्यव्यापकाभावप्रतियोगित्वग्रहेविरुद्धत्वांतर्भावापत्तिः।अपिचव्याप्तिमतोधर्मस्यान्यतरवृत्तित्वनियमेनोभयव्याप्त्यनव
रूपमुभयव्याप्यत्वंतत्रग्रहीतुमशक्यमेव।व्याप्तिमत्त्वेनान्यतराधिकरणावृत्तित्वनिश्चयेनोभयाधिकरणावृत्तेर्योग्यविरहरूपतया
पत्तेः।सपक्षविपक्षव्यावृत्तत्वस्यचसतानमेकत्रैकत्रानविरुद्धांतर्नीयकोटेःपक्षस्यापिसत्त्वेनविरोधाभावात्।विरुद्धोभयव्याप्ति
ग्रहस्यपक्षांतर्भावेनविरोधस्यावश्यकत्वात्।सत्प्रतिपक्षेचासाधारणेपिनाह्वयेनासत्प्रतिपक्षस्तरवत्।नचेष्टापत्तिः।कथंके

संप्रदायविरोधात्। तस्मादुभयव्याप्तत्वग्रहस्योभयव्याप्तिग्रहसामग्रीत्वेन सत्प्रतिपक्षवदुभयप्रतिबंधकतया साधारण्यस्य दोषत्वं विरोधस्ये
मिति सामग्र्या इव विरोधिव्याप्तिधीसामग्र्या अपि प्रतिबंधकत्वाविशेषादिति॥ ॥अत्र ब्रूमः॥ सत्प्रतिपक्षरूपतयैवास्य दोषत्वं। न च पक्षीयव्यभिचार
संशयान्न व्याप्तिग्रह इति वाच्यं। व्यतिरेकिविलयापत्तेः। न च तर्कादिना संशयव्युदासे तत्संभव इति वाच्यं। एवं हि निश्चितहेतुमति पक्षे साध्य
संदेहः प्रतिबंधकः स्यात्। न चानुमानमात्रोच्छेदापत्तिः। तर्कादिना तन्निरासे तत्संभवात्। न चैवमेवेति वाच्यं। अपसिद्धांतात्। अत एव पक्षस्थि
तौल्ले न ते भवत इति ग्रंथेन पक्षतासंपत्तये संशयः प्रागुपपादितः। तस्मात्प्रतिबंधकत्वं फलबलकल्प्यं। तथा चान्वयिनि व्याप्यनिश्चयेऽपि पक्षी
यव्यापकसंशयो व्यतिरेकिणि च व्यापकाभावनिश्चये पक्षीयव्याप्यसंशयो न दोष इति फलबलात्कल्प्यते। न च सत्प्रतिपक्षाभेदः। हेतु
भेदाभेदस्येव तत्र हेतुत्वात्। न चैतावता विशेषाणां न द्विशेषत्वमेवेति वाच्यं। स्वतंत्रेच्छाया नियोगपर्यनुयोगानर्हत्वात्। अन्यथा
ताज्ञानप्रतिबंधकत्वेन बाधप्रतिरोधयोरप्यैक्यापत्तेः। वस्तुतस्तु सत्प्रतिपक्षे उभयपक्षधर्मताविषयत्वेन परामर्शस्य प्रतिबंधकत्वं। अन्यथान्यतर
हेतोः स्वरूपासिद्धत्वग्रहेऽपि सत्प्रतिपक्षापत्तेः। अत्र चैकपक्षधर्मताविषयत्वेनैवेति तदंतर्भावशंकापि नातः। तदिदमुक्तं द्वौ न थेति। यत्तु परमुखनिरी
क्षकतया उपाधिवदुभयव्याप्तत्वं न दोष इति तन्न। यथा साध्यतदभावव्यापकाभावप्रतियोगित्वसहितपक्षधर्मताज्ञानमात्रस्यैव प्रतिबंधक
तया तद्धीविषयीभूतस्यैव हेत्वाभासत्वात्। तत्त्वस्य च लक्षणत्वाच्च। अत एव एकतरानुकूलतर्कावतारेणातिप्रसंगः। न च विरुद्धांतर्भावः। साध्यव्याप

अ॰टी॰ काभावप्रतियोगित्वज्ञानस्य विरोधिविरोध्यविषयतया प्रतिबंधकत्वानुपपत्तेरिति वक्ष्यमाणतो न च शब्दत्वादेर्वह्निमत्त्वग्रहे सति तदभावस्य न साध्य
६२ तदभावव्यापकस्य ग्रह इति वाच्यं नहि सकलव्याप्याधिकरणव्यापकसंबंधो व्यापकत्वं येन साध्यतदभावान्यतरवति सक
लाधिकरणे हेत्वभावसंबंधस्य ग्रहाद्धेतौ वह्निमत्त्वे न ग्रहः स्यात् किंतु व्याप्यवन्निष्ठात्यंताभावाप्रतियोगित्वं तथा च नित्यत्वानित्यत्ववन्निष्ठा
९२ त्यंताभावाप्रतियोगी शब्दत्वाभाव इति ज्ञानं न शब्दत्वे वह्निमत्त्वग्रहे प्रतिबंधकं ग्राह्याभावासंस्पर्शात् अत एव हेतुवह्निमत्त्वज्ञानमपि न
तज्ज्ञानप्रतिबंधकं अन्यथा बाधस्यापि प्रतिबंधकतानापत्तेः साध्यव्याप्यवत्तयाज्ञाने पक्षे व्यापकसंबंधभानस्यावश्यकतया तदभाववद्ग्रा
हिबाधज्ञानस्यानुदयात् तस्माद्यथा व्याप्यवत्तया निश्चिते पक्षे बाधरूपव्यापकाभावनिश्चयस्तथा व्याप्यीभूतनित्यत्वानित्यत्वान्यतर
वत्तया निश्चितेपि पक्षे व्यापकीभूतशब्दत्वाभावाभावरूपस्य सत्त्वस्य निश्चय इति न किंचिदनुपपन्नं यदि च भिन्नप्रकारकत्वान्न त
स्य प्रतिबंधकत्वं तदा प्रकृतेपि तुल्यमिति। सत्प्रतिपक्षे चैतदुक्तं द्रावनमिष्टमेव। न चैवं कथकसंप्रदायविरोधः तस्य संदिग्धत्वा
त्। यद्वोक्तन्यायात् उभयव्याप्यवत्त्वग्रहस्यैवेतरादितदपि विनां सपक्षविपक्षव्यावृत्तत्वादिज्ञानकालेपि यद्वा दिनाप्रियहाद
नमित्यत्वेन रज्जुभवसिद्धत्वात्। अत एव व्यतिरेकसहचारेणान्वयव्याप्तिग्रहः पक्षे विरोधावश्यकतया तत्सामग्र्याः सत्प्रतिपक्षेतेन ६२
पास्ते। किंच उभयव्याप्यवत्त्वग्रहस्योभयसहचारग्रहमात्रतया नोभयव्याप्तिग्रहसामग्रीत्वं। येन विरोधिसामग्रीत्वेन प्रतिबंधक

त्वं स्यात्। किं त्वनुकूलतर्कादिसहितस्य तथात्वं। अत एवैकत्रानुकूलतर्कोविज्ञारेणासाधारण्ये न हीतरसामग्रीसहितस्यापि यद्ज्ञानस्य विरोधि
सामग्रीत्वेनानुमितिप्रतिबंधकत्वे तस्यापि हेत्वाभासत्वमभिमतं। तथा सतीतरसामग्रीसमवहितोपाधिज्ञानस्य व्यभिचारज्ञानसामग्रीत्वेन प्र
प्रतिबंधकतया तस्य हेत्वाभासतापत्तेः। तज्ज्ञानं च यथार्थाभावानवगाहीति न प्रतिबंधकमिति यदि तदेतत्तत्रापि तुल्यं। विरोधिसामग्रीत्वेनान
त्वमुभयत्राप्यस्तीति बाधसामग्रीत्वेनाधिकरणोपस्थितेरपि प्रतिबंधकत्वात्तद्विषयस्यापि हेत्वाभासतापत्तिश्च। परसामग्रीत्वेन
प्रतिबंधकत्वमिति यदि तदेतत्तत्रापि तुल्यमिति। केचित्तु साध्यतदभावोद्बोधकतया। तदुभयसंशायकतयेत्यर्थः। तथा च तत्परतयैवापरो
पियं थोपाख्येय इति। तन्न। पक्षे साध्यतदभावसंशयस्य प्रागपि सत्त्वात्। किं च तत्संशयस्य यथार्थाभावविषयतया प्रतिबंधकत्वे हेतुविषयत
या नैकांतिकसंशयत्वेनैव वा। नाद्यः। आद्यसंशयस्य प्रमाणत्वे तस्य प्रतिबंधकत्वात्। नांत्यः। पक्षीयसंदिग्धानैकांतिकस्यानुमानमात्रो
च्छेदकत्वेनाप्रतिबंधकत्वात्। न च संदिग्धोपाध्याद्याहितव्यभिचारसंशयवत्साधारण्याहितः प्रतिबंधक एवेति वाच्यं। तथा सति परमु
खनिरीक्षकतया तद्रूपहेत्वाभासतानुपपत्तेः। यत्तु सपक्षविपक्षव्यावृत्ते सति पक्षवृत्तित्वमसाधारणत्वं। अन्यथाकाशस्यापि तत्त्वाप
त्तेः। तज्ज्ञानं च साध्यसंशयसामग्रीत्वेन प्रतिबंधकं। यज्ज्ञानं यत्र प्रतिबंधकं तत्सामग्र्यपि तत्र प्रतिबंधिकेति व्याप्तेः। न चोपाधावतिप्र
संगः। तस्यासामग्रीत्वादिति। तन्न। तज्ज्ञानस्य हि सामग्रीत्वं किमितरनिरपेक्षतया साध्यसंशयजनकत्वमितरकारणसमवहिततज्जनक

अ·री· त्वं वानाधायाग्रहंमयात्। न हि कोटिस्मरणाविशेषादर्शनं विना तस्य संशयजनकत्वं व्यभिचारेण तेषामन्यत्रापि संशयजनकत्वानापत्तेः। नोत्तः।
उपाधावतिप्रसंगात्। न हीतरकारणासमवहितस्याप्युपाधिज्ञानस्य व्यभिचारज्ञानजनकत्वं तथा सति तस्य तदजनकत्वमेव स्यात्।
६३ तथा चोपाध्युद्भावनमप्यनर्थकं स्यात्। किं चोभयव्याहतत्वे सति पक्षहेतुनिष्ठत्वज्ञानं साध्यसंशयमपि पक्ष एव जनयेत्। ननु पक्षा
तिरिक्ते। न ह्युभयहत्वे न हेतोर्ज्ञानं नैव तत्र विशेषदर्शनात्। तथा च तादृशस्य पक्षीयव्यभिचारसंदेहस्यैव नानुमितिप्रतिबंधक
९३ त्वं किं तु तत्सामर्थ्येन तज्ज्ञानस्यानाहार्यस्यापि संशयस्यानन्तर्भवेमपि सत्वेन तस्याप्रयोजकत्वाद्वेति संक्षेपः। यद्यपि परार्थानुमाने सा
ध्यतदभावव्याप्यकतयैवायं दोषस्तथापि परंप्रति विपक्षव्याहतत्वाशंकानोद्भावनीय इत्याशयेनोक्तं स्वार्थानुमान इति दृष्टव्यं। असा
धारणेनान्वयिप्रयोगमूनत्वस्योद्भावनमुचितं न त्वसाधारण्यस्येत्यत आह। व्यतिरेकीति। एवं च यद्यपि साध्याभावप्रतियोगिक
व्यतिरेकव्याप्ते रेव साध्याभावव्यापकत्वादुद्भावनमुचितं तथापि व्यभिचारज्ञानायोपाधेरिव तद्व्याप्तिज्ञापनायैव तत्र सर्वसपक्षव्या
वृत्तत्वस्योद्भावनमिति भावः। साध्येति। व्यतिरेकव्याप्तिज्ञानद्वारा साध्याभावव्यापकत्वादित्यर्थः। व्यर्थत्वादिति। साध्याभावव्या ६३
पनेनेत्यादिरित्यर्थः। वस्तुगतिमुक्त्वा कथकसंप्रदायानुरोधादाह। यद्वेति। लक्षणं त्विति। यद्यपि सर्वसपक्षव्यावृत्तत्वेऽपि हेतोर्यदा सपक्षवा
दिना साध्यतदभावान्यतरप्रतियोगिकैकमात्रव्यतिरेकव्याप्तिग्रहः यदा वा तदधीनसाध्यतदभावप्रतियोगिकव्यतिरेकव्याप्तिद्वया

ग्रहसत्त्वदशायां व्याप्तिः। प्रथमस्य सद्धेतुत्वात्। द्वितीयस्य च व्याप्तेरज्ञानात्। अज्ञानरूपासिद्धिमात्रयोगितयाऽसाधारणत्वाभावात्। तथापि सा
ध्यतदभावप्रतियोगिकव्यतिरेकव्याप्तिद्वयज्ञानयाज्ञायमानत्वमसाधारणस्य लक्षणमित्यत्र तात्पर्यं। असाधकतानुमानं तु तत्र सत्प्रतिपक्ष
इव साध्याभावानुमितिसामग्रीप्रतिरुद्धत्वादित्येवमेवेति न तत्रापि वैयर्थ्यशंकेति ध्येयं। व्यर्थेति। असाधकतानुमान इति शेषः। विरुद्धमि
ति। अत्रानैकान्तिकसामान्यलक्षणायोगः पूर्ववदेव समाधेय इति ध्येयं॥ ॥१॥ ॥सिद्धासिद्धीति। सपक्षविपक्षसिद्ध्यसिद्धी इत्यर्थः। अन्व
यति। साध्य तदभाववद्व्याप्तिव्याप्त्यभाववद्व्यतिरेकि साधकस्यानैकान्तिकतापि न स्यात्। उक्तानैकान्तिकसामान्यलक्षणायोगादिति भावः॥
व्याप्यत्वासिद्धमिति। अज्ञानरूपासिद्धमिति भावः। तथापि तत्र परं प्रत्युद्भावनार्हमत आह। अपार्थकमिति। अन्यस्य स्वपक्षसाधकत्वमा
त्रस्याह। साध्यप्रसिद्धाविति। नापीति। केवलान्वयिसाध्यके सद्धेतावतिव्याप्तेराह सत्यन्तं। शेषस्तु साधारणातिव्याप्तिवारणाय। तद
र्थ्यके वलान्वयिधर्मावच्छिन्नसाध्यसिद्धिविरोधिसंदेहविषयवृत्तित्वं। साधारणस्तु निश्चितसाध्यवद्वृत्तिरिति भावः। विप्रतिपन्नेति। साध्या
भावाप्रसिद्धावपि स्वाभिधेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि न वेति संशयसंभवात्। यदि चेति। सहचारग्रहात्पक्ष एव यत्र व्याप्तिग्रह इत्य
र्थः। तत्रैवेति। यत्र सद्धेतौ पक्ष एव व्याप्तिग्रहस्तत्रैवेत्यर्थः। तत्र पक्षातिरिक्ते व्याप्तिग्रहाभावादिति भावः। दोषान्तरमाह। सर्वस्येति। स
र्वमनित्यं मेयत्वादित्यादावित्यर्थः। ननु पक्षातिरिक्तत्वमत्र न विवक्षितं किंतु व्याप्तिग्रहानुकूलप्रतीतसहचारत्वमेवेति नोक्तदो

अ॰ भ॰ द्वयमित्यत आह। असाधारणेति। साधकतायामिति। असाधकतायामित्यर्थः। नचेति। इदमसाधकमनैकान्तिकत्वादित्यसाधकता प्रयोगोऽप्युपसं
हारिणि व्यर्थविशेषणत्वशंकैव नास्तीति भावः। अर्थगतेरिति। अनैकान्तिकत्वमुभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं। तत्र साध्याभाव
८४ कोट्युपस्थापकतावच्छेद[illegible]च भावस्य वग्गमकत्वे विशेषणवैयर्थ्यं तत्राप्यारोपकमिति भावः। यत्तूपसंहारिणि हेतौ पक्षीकृतेऽनै
कान्तिकत्वादिति हेतुवाक्ये न योग्यतावलादुक्तरूपानुपसंहारित्वरूप एवार्थोऽभिधेयः तत्र च व्यर्थविशेषणत्वं दुष्परिहरमेवेति। तन्न।
९५ तत्र कोऽयं शाप(?) क्लिति विना व्यर्थविशेषणत्वाभावात्। अन्यथा धूमपदस्यापि नीलधूमवत्तियोग्यतावलात्तत्परत्वे तदापत्तेः। अनै
कान्तिकत्वे न साधारणायन्नतमत्त्व विवक्षितं तत्र व्यर्थविशेषणत्वमित्यपास्तं। केवलान्वयीति। सर्वैर्मभिधेयं मेयत्वादित्यत्रेत्यर्थः।
अत्र हेतुमाह सर्वस्येति। मात्रार्थस्य व्यवच्छेद्यस्य तत्राभावादिति भावः। पर्यवस्यति रे(?) किं साध्यकेऽनुपसंहारिण्येव्याप्तिर्भवत्येव तथा
पि तस्य वस्तुतः साधारणत्वात्कलङ्कस्य(?) त्वमित्यपि परे त्वयादिति निःसंदिग्धा व्याप्तिं दत्तवानिति भावः। क्वचिदतिव्याप्तेरिति पाठः। तत्राय
मर्थः। ननु मात्रपदं कास्मार्थि परं व्यवच्छेद्यार्थकं वा आद्ये केवलान्वयीति। व्याप्यत्वानस्य पुरुषदोषत्वात्सदुत्तौ तस्मिन्नतिव्याप्ति ८४
रित्यर्थः। अन्त्ये त्वाह सर्वस्येति। उपलक्षणं चैतत्। असाधारणादावतिव्याप्तिरपि द्रष्टव्या। व्याप्तिग्रहानुकूलेति। व्याप्तिग्रहानुकूलो यः एक
त्र धर्मिण्युपसंहारः सहचारग्रहस्तदभावो यत्रेत्यर्थः। पक्षे सहचारसंदेहसत्त्वादप्रतीतसहचारत्वमसंभवीत्यत आह व्याप्तिग्रहानुकू

लेनेति तदनुकूलत्वं च सहचारनिश्चयनेनेत्यर्थः। अन्यथा तर्कापि व्याप्तिधीप्रसंगात्। ननु व्याप्तिग्रहानुकूलत्वं स्वव्याप्तिग्रहानुकूलत्वं तथा च के-
वलव्यतिरेकिण्यपि तादृशसाध्यसाधनसहचारनिश्चयोऽस्तीति तत्र व्याप्तिरिति चेन्न। व्यतिरेकसहचारस्यापि स्वव्याप्तिग्रहानुग्रहानुकूलत्वात्। व्य-
तिरेकसहचारस्यान्वयव्याप्तिर्गृह्यत इति मतामतं तत्रैव व्याप्तिपदमेव स्वसाध्यसिद्ध्यनुकूलव्याप्तिपरं तथा च व्यतिरेकिणि तादृशी व्यतिरेक-
व्याप्तिरपि भवतीति। न इहानुकूलश्च व्यतिरेकसहचारः तस्य च न तत्र प्रतीतिरस्त्येवेति नातिव्याप्तिरिति भावः। ननु ज्ञायमानत्वादशायां सं-
दुतावतिव्याप्तिः। न च हेत्वभिमततद्देहे त्वाभासपरं। जलहृदादिपक्षकेऽसरूपासिद्धतया हेत्वाभासेत्वेनैवातिव्याप्तेः। न च साध्यसहचार-
निश्चयविरोधिहेत्वाभासतोपाधिमत्त्वमिति वाच्यं। विरुद्धेपि गततया इति चेन्न। स्वसाध्यसिद्ध्यनुकूलव्याप्तिग्रहानुकूलसहचारत्वाव-
च्छिन्ननिश्चयविरोधिहेत्वाभासतोपाधिमत्त्वस्य विवक्षितत्वात्। विरुद्धस्य तु व्यतिरेकसहचारनिश्चयाविरोधित्वान्न तत्रातिव्याप्तिरिति
भावः। अनुपसंहारिणि तु प्रमेयमात्रस्य वसाध्यसंदेहविषयत्वान्नोभयसहचारनिश्चय इति। न च केवलान्वयिसाध्यकेऽव्याप्तिः तत्र
व्यतिरेकसहचाराभावादिति वाच्यं तत्र चान्वयव्याप्तिमात्रस्य स्वसाध्यसिद्ध्यनुकूलतया तद्ग्रहानुकूलसहचारत्वेनान्वयसहचा-
रमात्रस्यैव लाभादिति भावः। विरुद्धत्वाज्ज्ञानेति। यद्यपि विरुद्धत्वज्ञानदशायामनुकूलत्वासत्त्वात्तदानुपसंहारित्वमस्त्येव तथा-
पि तदा विरुद्धत्वमेवोद्भाव्यमित्यत्रैवमर्थपरतयैतदुक्तं। एतच्चान्वयसहचारमात्रनिश्चयविरोधित्वेनानुपसंहारित्वमभ्युपगम्योक्तं।

अनु० वस्तुनोव्यतिरेकसहचारनिश्चयस्यैवतत्रसंभवान्नानुपसंहारित्वंतस्येतिध्येयं।ननुतादृशसहचारग्रहाभावःकारणाभावत्वेनस्वरूपसत्त्वेवव्याप्ति
ग्रहप्रतिबंधकोननुज्ञायमानइतिनतस्यहेत्वाभासत्वमित्यत्राशयेनाहकेवलान्वयीति।केवलान्वयिधर्मव्यापकस्वसाध्यसिद्धिविरोधिसं
९५ देहविषयवृत्तित्वमित्यर्थः।तेनप्रमेयत्वसमनवृत्तितेनवेतिसंदेहाधीनपक्षताकेकेवलान्वयिसाध्यकेनुपसंहारिणिनाव्याप्तिः।तस्यापिसंदेहस
स्वसाध्यसिद्धिविरोधित्वात्।नवाविशेषदर्शनकालेनुमित्स्यानुमितिसंभवात्रैवातिव्याप्तिः।तादृशसंशयाभावात्।नवाइदंवाच्यंगुणाक
95 र्मसामान्यविशेषसमवायाभावाअनित्याःप्रमेयत्वादित्यादावव्याप्तिः।केवलान्वयिधर्मावच्छिन्नसंशयाभावेपितद्व्यापकसंशय
सत्त्वात्।अन्यथानुपसंहारित्वानुपपत्तेः।नचसर्वोधूमवान्वह्निमान्धूमवत्त्वादित्यत्रसकलधूमाधिकरणेवह्निसंशयदशायामनुपसं
हारिण्यव्याप्तिः।तस्यव्यतिरेकसहचारनिश्चयाविरोधित्वेनानुपसंहारित्वाभावेनालक्ष्यत्वात्।केवलव्यतिरेकिवत्।ननुज्ञानेसंश
यस्योपहेलनंरूपलक्षणात्वात्स्वरूपसत्त्वाद्दृशसंशयाकोतसकलप्रमेयवृत्तित्वज्ञानंव्याप्तिज्ञानविरोधितयानुमितिप्रतिबंधकेवाच्यं।तथाचस
हचारनिश्चयविरहस्याविरोधकत्वाद्व्याप्यसहाररूपासिद्धिरेवनतुहेत्वाभासः।नचपक्षसाध्याभावसहचाराज्ञानान्नतादृशसह ९५
चारनिश्चयइतिहेत्वाभासत्वं।तथासतिसाध्याभावसहचारस्यैवसाधारणव्याप्तेवानैभवापत्तेः।नचतन्निश्चयोनास्त्येवा।तत्संश
यस्यप्रतीयोनानुमितिविरोधीअनुमितिमात्रोच्छेदकत्वादितिवाच्यं।अतएवनहेत्वाभासः।ज्ञायमानप्रतिबंधकोपाध्यत्वाभावात्।

ह

नचतस्यैवसाध्याभावसहचारसंशयस्य व्यभिचारसंशयत्वेनानुमित्यप्रतिबंधकत्वेपि विशेषगोचरसंदेहविषयसाध्याभावसामानाधिकरण्यप्रका
नत्वेन प्रतिबंधकत्वं कल्प्यतामिति वाच्यं। सर्वत्र निश्चयाभावेनैव व्याप्यप्रतीतौ तेन रूपेणाप्रतिबंधकत्वाकल्पनात्। कल्पने वा केवलान्व
यिसाध्यकस्यासंग्रहापत्तेः। न च साध्याभावाप्रसिद्धेः। न च तस्या लक्ष्यत्वमिति वाच्यं। अव्यवहिताग्रिमग्रंथविरोधात्। तज्ज्ञानस्य प्रतिबंधक
त्वेपि साधारण्यादिलक्षणप्रतिबंधकतावच्छेदकानुपपत्तेः। अन्यथा तादृशसंशयविषयसाध्याभावकत्वज्ञानत्वेनापि प्रतिबंधकत्व
कल्पने हेत्वाभासाधिक्यापत्तिः। यदि चोक्तदोषात् तज्ज्ञानस्यापि शाब्दव्याप्तिधीसत्वात् तस्य तथात्वं तदाशंकितेपि तुल्यं। न तु नादृशसंश
यविषयवृत्तित्वमेव हेत्वाभासतापादकं। तज्ज्ञानस्य फलकरणविषयविरोधनत्वाभावेन यापतिबंधकत्वाभावात्॥ ॥अत्र वदंति॥ केवलान्व
यिधर्मव्यापकतादृशसंशयविषयवृत्तित्वमेवानुपसंहारित्वं। तज्ज्ञाने च हेतौ साध्यसामानाधिकरण्यसंशयसामग्रीत्वेन प्रतिबंधके संशयसामग्र्याः
सामान्यत एव निश्चयप्रतिबंधकत्वकल्पनात्। तद्विशिष्टहेतुज्ञानस्य हेतौ साध्यसामानाधिकरण्यसंशयजनकत्वमवर्जनीयमेवाहेतुमत्तिसंदे
त्रसाध्याभावसंदेहेन हेतौ साध्यसामानाधिकरण्यसंशयस्यौचित्या वर्जितत्वात्। साध्याभावेन साधर्म्मानाधिकरण्यस्यापस्थापनात्। अत एव
स्यानित्यदोषत्वं। विशेषदर्शनसत्वेन तत्र … संशयसामग्रीत्वाभावात्। न चोक्तक्रमेणात्र साध्याभावसंशयएवदोषत्वेन कल्प्यतामिति वाच्यं।
कचिदप्यकल्पनात्। संशयसामग्र्यास्तु निश्चयप्रतिबंधकत्वं क्लृप्तमिति॥ ॥अत्रेदं चिंत्यं॥ तज्ज्ञानसत्वेपि शाब्दव्याप्तिग्रहसंभवेन तस्य न व्याप्ति

प्र. टी. धीप्रतिबंधकत्वात् साध्यसामानाधिकरण्यसंशयस्यैव योग्यतासंशयपर्यवसन्नतया तत्राप्रतिबंधकतया तत्सामर्थ्यात् सुतरामप्रतिबंधकत्वात् तन्न चैवं व्य-
९६ भिचारसंदेहस्यापि शाब्दव्याप्तिग्रहाप्रतिबंधकतया व्यभिचारस्यापि हेत्वाभासत्वं न स्यादिति चेन्न। न हि तत्संशयप्रतिबंधकत्वेन तस्य हेत्वाभास-
त्वं। अपि तु तन्निश्चयप्रतिबंधकत्वेन। यन्निश्चयोपेक्षं यमनुमितिप्रतिबंधकत्वं तस्यैव हेत्वाभासत्वात्। अन्यथा साध्यव्यापकसाधनाव्यापकसंश-
यविषयीभूतोपाधिज्ञानस्यापि तथात्ववर्ज्जितव्यभिचारसंदेहसामग्रीत्वेन प्रतिबंधकतया उपाधेरपि हेत्वाभासांतरतापत्तेः। न च तज्ज्ञानस्य व्य-
96 भिचारसंदेहसामग्रीत्वं तत्सत्त्वेपि कोटिस्मरणादिविरहे व्यभिचारसंशयानुत्पादादिति वाच्यं। एवं हि तादृशसंशयविषयत्वनिश्चयज्ञानस्या-
पि न तत्सामानाधिकरण्यसंशयसामग्रीत्वं तत्सत्त्वेपि तत्सामानाधिकरण्याभावादिकोटिस्मरणाविरहे तत्संशयानुत्पादात्। न च साध्या-
भावेनासाध्यासामानाधिकरण्योपस्थापनमिति वाच्यं। तत्र तस्यासामर्थ्यादिति। साध्याभावेति। साध्याभाववद्वृत्तित्वानिश्चयदशायामित्यर्थः।
तदवगम इति। तन्निश्चय इत्यर्थः। संकर एवेति। कालभेदेन तत्रोभयसमावेशादित्युक्तं तदानुपसंहारित्वाभावेन संकराभावादिति ध्येयं। व्याप्त्य-
वेति। इदं व्यतिरेकिसाध्यकानुपसंहारित्वमभिप्रेत्य। केवलान्वयिसाध्यके तदभावादिति भावः। यद्वा। अज्ञानरूपासिद्धिमभिप्रेत्यो- ९६
क्तं। अत एवानुपदमेव तथा विभावयिष्यति। अत एव तज्ज्ञानेनोपनीतमत्वमित्युपरितोषेणोद्भावने वेत्युक्तं। अनुपदं स्वीकृतत्वादाभिमा-
शंक्याह। घटेति। इदं च साध्यानवगतस्य हेत्वार इत्यादिलक्षणमभिप्रेत्य। वस्तुतः साधारणाय मितिद्रष्टव्यं॥ ॥संयोगादीति॥ ॥संयोगादि

शेषसाध्यकइत्यर्थः। किंतु साध्याऽसमानाधिकरणेति। साध्यवैयधिकरण्यावच्छेदकावच्छिन्नसाध्याभावव्याप्यइत्यर्थः। अन्यथेति। तत्राधिकरणे हेतुरूप
भावात्तेनैवोपपत्तेरित्यर्थः। कस्यचिन्मतं निरस्यति। नचेति। अत्र व्यभिचारव्याप्तत्वेन रूपेणानुमितिप्रतिबंधकत्वात्तद्भेदानुपपत्तिरिति तादृशव्याप्ति
रपि द्रष्टव्यं। अस्तु तावदिति। वस्तुतोनैकांतिकसामान्यज्ञानं प्रतिबंधकमेव न। विरोध्यविषयकत्वात्। किंतु विपक्षव्यावृत्त्यादिज्ञानं। तथा च तदंतर्भा
वस्यावश्यकइति भावः। तथानुपन्यासादिति। नात्र वह्निर्भावेन धूमवत्त्वानुपन्यासादित्यर्थः। अन्यथेति। तथैवोपन्यासे तदसमभिव्याहृतस्य नीलस्य
निराकांक्षतयानन्वयेऽपार्थकतापत्तेरित्यर्थः। साध्यानवगतेति। साध्याप्रमितस्य सहचारइत्यर्थः। तेन गोत्वाश्वत्वयोः सहचारभ्रमेनाव्याप्तिः। विप
क्षेति। साध्याभावसहचरितत्वमात्रविषयतये व प्रतिबंधकत्वे विशिष्टविषयत्वेनानन्यथासिद्धत्वेन रूपेण हेत्वाभासत्वमिति भावः। नहि विरुद्धत्वस्य
मदर्शायां धूमेति व्याप्तिरित्यनुशयेनाह। तत्समापकत्वं वेति। साध्याभावेति। साध्याभावव्याप्तत्वेनैव तत्समापकत्वग्राहात्। तथा च तत्संबंधबुद्धिरावश्य
की। अन्यथा तत्समापकत्वग्रहस्यापि विरोध्यविषयतयाऽप्रतिबंधकत्वापातादिति भावः। एतेन साध्याभावव्याप्यत्वे व्यर्थविशेषणत्वादिनाऽदूषि
तेसाध्यवदन्योन्याभावव्याप्यत्वं बुद्धिस्थं द्वितीयलक्षणमनुघटयति। नापीति॥ ॥साध्यव्यापकेति॥ ॥नन्वेतस्यज्ञानं व्याप्तिग्रहप्रतिबंधकं न।
हेत्वभावस्य हि साध्यव्यापकत्वेन तद्विशिष्टान्यतराभावप्रतियोगित्वं। नचैतद्विषयकबुद्धौ साध्यसामानाधिकरण्यादिविरोधी कोप्यर्थः स्फु
रति। यत्राभावास्फुरणात्। अतथाभूतस्य ज्ञानस्याप्रतिबंधकत्वात्। अन्यथातिप्रसंगादिति चेन्न। सकलसाध्याधिकरणनिष्ठाभावप्रति

अनु० योगित्वस्य विवक्षितत्वात् । सर्वस्मिन् साध्याधिकरणे हेतुविरह इति ज्ञानं च हेतौ सामानाधिकरण्यधीविरोध्येव । साकल्येन साध्याधिकरणे हेतोर्योह्यतया
द्विरहस्यग्राह्यविरहस्य सत्त्वात् । अभावपदं च प्रतियोगिव्यधिकरणाभावपरं । तेनायं द्रव्यं एतत्कपिसंयोगवत्त्वादित्यत्र नातिव्याप्तिः । अथ
९७ यमाकाशवान् द्रव्यत्वादित्यत्रैवेदमव्यापकं । तत्र साध्याधिकरणाप्रसिद्धेः । न च तु दलद्वयमेवेति वाच्यं । साध्ये हेतुसामानाधिकरण्याभावग्रहस्य
व्याप्तिधीप्रतिबन्धकत्वात् तद्विषयस्यापि हेत्वाभासताप्रयोजकत्वात् । तस्य च तत्र सत्त्वात् । न च हेतौ साध्यसामानाधिकरण्याभाव एव सकल
९७ विरुद्धव्यापकत्वात् दुष्टत्वाभासतोपाधिरस्त्विति वाच्यं । असाध्यकाशादिरूपविरुद्धाव्यापकत्वात् । हेतुसाध्यसामानाधिकरण्याभावस्य
दूषकताबीजस्य तत्रापि सत्त्वादिति चेन्न । सर्वेषामेव विरुद्धोपाधित्वं । विरोधित्वाविशेषेण विनिगमकाभावात् । न च हेत्वाभासाधिक्यं । सामा
नाधिकरण्ये साध्यकत्वप्रतियोगित्वधीविरोधिधीविषयत्वेन सर्वोपाधीनेकीकृत्य महर्षिणा विभजनात् । अत एव वक्ष्यमाणसाध्यवद्वृत्ति
त्वादिकमपि नाधिकं । अत एव साध्यवान् हेतुमानिति ज्ञानस्य प्रतिबन्धकत्वात् सकलसाध्याधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेद
कत्वमपि हेतौ हेत्वाभासताप्रयोजकमिति विभागन्यूनतापि निरस्ता । तज्ज्ञानस्य साध्यसामानाधिकरण्यग्रहविरोधित्वेनोक्तविभाज
कोपाध्याक्रान्तत्वात् । तदविरोधित्वे व्याप्तिग्रहाप्रतिबन्धकत्वात् । अथ व्याभिचारसहचारयोर्ग्रहमविरुध्यतो व्याप्तिग्रहाविरोधित्वात् । तथात्व ९७
साध्यसामानाधिकरण्यधीविरोधिधीविषयत्वं विभाजकोपाधिरिति । तन्न । अस्ति साध्यकविरुद्धाव्यापकत्वादिति । नन्वेवं तदस्ति हेताव

तिव्यापकं। न च दूषकतावीजसाम्यात्तस्यापि लक्ष्यत्वमेवेति वाच्यं। तत्रोक्तविरुद्धत्वग्रहेऽपि व्यतिरेकव्याप्तिग्रहाप्रतिबंधकत्वादिति स्वरसादाह। यद्वेति। न
याच वृत्तिमतः सकलसाध्याधिकरणनिष्ठात्यंताभावप्रतियोगित्वग्रहे न व्यतिरेकव्याप्तिग्रह इति भावः। केचित्तु वृत्तिमत इत्यसंकीर्णस्फुटलक्षणाय।
अन्यथा वृत्तित्वसामान्यतो ज्ञाने पक्षवृत्तित्वस्यापि ज्ञानात्स्वरूपासिद्धिसंकीर्णतापत्तेः। दूषकतावीजं तु साध्यवद्वृत्तित्वमेवेत्याहुः। साध्यव
द्वृत्तित्वेति। साध्यवद्वृत्तित्वप्रतियोगिकाभावाधिकरणत्वमित्यर्थः। पूर्वोक्तस्वरसमत्रापि हृदये निधाय वृत्तिमत्वपरधर्मपरोतभावेन लक्षणा
न्तरमाह। साध्येत्यादि। अन्योन्याभावात्यंताभावगर्भतया लक्षणयोर्भेदो द्रष्टव्यः। वयंतु ब्रूमः। असाधारण्यक्रमायनवृत्तिमत्वघटितोक्तवि
रुद्धत्वग्रहस्यापि न व्यतिरेकव्याप्तिग्रहप्रतिबंधकत्वं। तस्मिन्सत्यपि शब्दादिना तद्ग्रहे बाधकाभावात्। तस्माद्व्यतिरेकसहचारेणान्वयव्या
प्तिरेव गृह्यत इति मते विरुद्धस्य हेत्वाभासत्वं। तत्र न वृत्तिमत्वोत्तभेदः। तं विनाप्यन्वयव्याप्तिग्रहप्रतिबंधकत्वसंभवात्। अत एव वक्ष्यत्यले। सि
द्धेरपि हेत्वाभासत्वे। न हि व्यर्थविशेषणो नीलधूमादौ तद्ज्ञानस्य व्यतिरेकव्याप्तिप्रतिबंधग्रहप्रतिबंधकत्वसंभावना। विषयविरोधा
भावादिति। व्यतिरेकव्याप्तिव्याप्तिरिति। साध्यवद्वृत्तित्वज्ञानस्य तत्रापि संभवादनुमितिप्रतिबंधापत्तिरित्यर्थः। वस्तुतिव्याप्तेरसंभवात्।
अत एव तत्र तादृशज्ञानाभावमेवोपपादयति। तत्रेति। व्यतिचारज्ञानेऽपीति। अव्यभिचारज्ञानेत्यर्थः। अयोग्यताज्ञानस्येति। अयोग्यता हि
पदार्थयोः संसर्गाभावः स चैव। सैव च पक्षे न विरुद्धत्वधीः। तया च विरुद्धत्वज्ञानज्ञाधनमेवात्रायोग्यताधीः पर्यवस्यतीति तस्य विरुद्धज्ञानोप

अनु० जीवकत्वमितिभावः। एवं वाधेपीति। अत्रैयैवानुमानेवाधधीः सैवशब्देऽयोग्यताधीरिति कथमनयोरुपजीव्योपजीवकभाव इति चिंत्यं। निरग्निकत्वात्।
अग्निसंबंधाभाववत्त्वात्। तेन धूमव्यापकवह्न्योरभावस्तद्व्याप्यत्वे तत्संबंधाभावइति भावः। अभेदेपि व्याप्यव्यापकभाव इत्यभिप्रायेण वह्न्यभा
९८ वएव वा हेतुः। अतएव। व्यापकत्वमत्रैरेपीति वक्ष्यति। एतद्ज्ञानेपीति॥ अत्रेदंचिंत्यं। यदि प्रतिबंधकज्ञानविषयतावच्छेदकत्रैविध्येन त्रैवि
ध्यंतदा विधांतरमपि स्यादेतत्पूर्वोक्तसाध्यवदवृत्तित्वादिज्ञानानामपि प्रतिबंधकत्वात्। यदि च सहचारज्ञानविरोधित्वेन तेषामनुगम
मे २ स्तदे तेषामप्यनुगमान्न त्रैविध्यं। नचैतन्त्रितयं विरुद्धहेत्वाभासतोपाधिः। प्रथमोपाधिज्ञानस्य साधारणानैकांतिकत्वेनैव दोषत्वात्। द्वितीय
तृतीयोपाधिज्ञानस्य विरोध्यविषयत्वेनाप्रतिबंधकत्वात्। नहि धूमे साध्यवदभावव्याप्यत्वग्रहस्य हेतौ वह्निविरुद्धत्वग्रहस्य वाति
98 रोधित्वं किंतु धूमविरुद्धत्वग्रहस्यैव। जलाशयत्वादौ वह्निविरुद्धत्वग्रहकालेपि शब्दाभासादिना धूमव्याप्यत्वग्रहसंभवात्। न च प्र
थोक्तएव विरुद्धहेत्वाभासतोपाधिः। तस्य च ग्रहोपकारत्रयमिदमिति वाच्यं। एतत्त्रितयप्रकाराभानेपि साध्यवदवृत्तित्वादि ग्रही
ता तज्ज्ञानेपि कदाचित्साध्यविरुद्धत्वाग्रहात्। एवं निषेधसाधनेपीति। ननु विरुद्धे वाधस्य तमज्ज्ञानस्यावश्यकत्वात्तेस्यैवानुमितिप्र ९८
तिबंधकत्वेन नास्य हेत्वाभासांतरत्वमित्यतआह। अयं चेति। वाधादिपदं तज्ज्ञानपरं। तथा च वक्ष्यति विद्धाधादिज्ञाने सांकर्येपि कंपिका
चित्तदसंकीर्णसाध्यवदवृत्तित्वादिज्ञानस्य प्रतिबंधकत्वादस्य हेत्वाभासत्वमिति भावः। यत्तु चतुर्विधाः परमाणवो नित्याः पार्थिवपा

माणुत्वादित्यत्रव्यक्तविरुद्धरूढस्यबाधितत्वादिदोषसांकर्यमितिस्वरूपकथनमिति । तत्र । प्रकृतानुपयुक्तत्वात् । अन्यथा हेत्वाभासांतरेऽपि हेत्वाभासां
रसांकर्यं विभावयेदिति ॥ ॥ आपि ख्या । प्रपक्षधर्मतयाज्ञानत्वमिति ॥ ॥ व्याप्तिपक्षधर्मतावगाहिसमाभज्ञानविषयत्वमित्यर्थः ॥ आरोपयितु
मिति । यद्यपि भ्रमरूपानित्यत्वव्याप्यत्वावगाहित्वप्रसिद्धिः संभवत्येव तथापि प्रमितमेवारोप्यतइतिमतमालंब्येदमुक्तं । एकत्रेति । सत्प्रतिपक्षयोर्मध्ये
एकत्र हेत्वाभासत्वमित्यर्थः । पक्षविशेष्यकपरामर्शाभिप्रायेणेदं बोध्यं । विशेषणतावच्छेदकप्रकारकज्ञानस्यैव विशिष्टवैशिष्ट्यावगाहिज्ञानजनक
त्वमितिमतमालंब्येदमुक्तं । अन्यथा हेतुविशेष्यकपरामर्शे विशिष्टस्यानारोप्यत्वेन तदप्रसिद्धेरदोषत्वात् । एकमाहूयमितिन्यायेन शब्दस्या
वणत्ववैशिष्ट्यस्य श्रावणत्वे च नित्यत्वव्याप्यत्ववैशिष्ट्यस्यायुगपदवभानात्तत्र विशेष्यकत्वेप्यदोषत्वाच्च । अत एव दूषणमिदमलमकमे
वेतिसिद्धांते नोद्धरिष्यति । अन्यथा लिंगाभासादनुमित्यनापत्तेरिति । यद्वा ॥ एकत्र । आकाशादौ लिंगे । उभयाभावात् । व्याप्तिपक्षधर्मतोभय
योभावात् । विशिष्टस्य उभयस्य । व्याप्तिपक्षधर्मतारूपस्य तत्रासिद्धेरित्यर्थः । विशेषश्च न व्याप्तिभंगाभागरूप इति । अनिर्धारितो वाय इति शेषः ।
एकत्र भंगनियमादिति । तयासामान्यतरत्वेन निर्धारणासंभवात्सर्वथैवोभयोरनिर्धारितविशेषत्वमित्यर्थः । साध्येति । अत्राधिकबलो
पस्थितिप्रतिरुद्धकार्यहीनबलेलिंगेऽतिव्याप्तिवारणाय । उक्तं समानबलोपस्थित्येति । समानत्वं च निर्णायाजनकत्वेन विवक्षितं । अधिकब
लोपस्थितिश्चनिर्णायजनिकैवेति न समानेकत्वेति नोक्तदोषः । ननु तत्फलस्य बाधस्यैवतत्रानुमितिप्रतिबंधकत्वं न त्वधिकबलोपस्थितेः ।

अनु० किं वा यत एव दोषात् प्रतिबध्यस्य हीनबलत्वं तत एव तत्रानुमितिप्रतिबंधसंभवान्न तस्यापि तत्प्रतिबंधकत्वमिति चेन्न बाधस्यानुमितिप्रतिबंधकता
यां तत्सामग्रीत्वेनाधिकबलोपस्थितेरपि प्रतिबंधकत्वात्। यत्र च यज्ज्ञानं प्रतिबंधकमित्यादि व्याप्तेः। अन्यथा बाधावतारपूर्वसमये हीनबलत्वेनापि
९९ लिंगेनानुमितिजननापत्तिः। न च तदानुकूल्यबलत्वेन सत्प्रतिपक्षितत्वमेवेति वाच्यं॥ अव्यवहितोत्तरसमये धिकबलेनापि बाधरूपानुमि
तजननापत्तेः यदि हीनबलानुपयोगात् तं दोषांतरमपि ज्ञातं तदा तस्यापि प्रतिबंधकत्वमस्तु। प्रत्येकमवश्यं सामग्र्येत्वात्। विनिगमकाभावात्।
अन्यथा हेत्वाभासद्वयावतारकालेप्युभयप्रतिबंधकत्वं न स्यात्। दोषांतरज्ञानसंकीर्णो याएवास्याः सर्वत्र प्रतिबंधकत्वात्तद्विषयस्य न
९९ हेत्वाभासतोपाधित्वं। अतथाभूतज्ञानविषयस्यैवतया स्यात्। अत एव बाधस्य दोषांतरे रासंकराय प्रयास इति। धूमो यत्र न त्वं सपक्षधर्मः
पर्वते तद्वृत्तित्वात्। इत्यादौ यदा बाधावतारस्तदा पर्वते तद्वृत्तित्वादौ लिंगे ति व्याप्तिः। बाधरूपोपस्थितेऽपि पक्षधर्मता विषयत्वेन बलोप
स्थितित्वात्। स्वयं च निर्णयरूपतयान्तिर्णयाजनकत्वेन समानत्वादित्यत आह साध्यविरोध्युपस्थापनसमर्थत्वमुपस्थितौ विशेषणं। रा
बाधरूपोपस्थितिस्तु साध्यविरोध्युपस्थितिरेव न तु तज्ज्ञानिकेति तद्युदासः। न च बलपरस्य स्वविरोधिबलपरत्वादेव नायमतिप्रसंग इति
वाच्यं। उक्तविशेषणादानेन तत्पर्यवसानात्। न तु केवलमेव बलपदं तत्परं विशेषणवैयर्थ्यापत्तेः। साध्यविरोध्युपस्थापनसमर्थत्वं च ९९
साध्यसिद्धिविरोध्युपस्थितिजनकत्वं। अतो न केवलान्वयिसत्प्रतिपक्षाव्याप्तिः। ननु यत्रानित्यत्वव्याप्यकृतकत्वनिश्चयः सत्प्रतिपक्षात्मात

वैवच्च समूहालंबनात्मके नित्यत्वविरुद्धं जन्यत्वमपि मा तं तत्र नित्यत्वविरुद्धत्वे नज्ञायमाने जन्यत्वेति व्याप्तिः। नित्यत्वरूपसाध्यविरोध्यनित्यत्वो
पस्थापनसमर्थया निर्णयात् जनकत्वेन समानतया तयैव बलोपस्थित्या तस्य प्रतिरुद्धकार्यत्वात्। न च बलोपस्थितित्वे न प्रतिबंधकत्वं विवक्षितं।
विरुद्धत्वोपस्थितेश्च सहचारानिश्चय विरोधित्वेन तत्र मितिवाच्यं। एवं हि पर्वते वह्निरित्यादौ हेतावति प्रसंगाभावाद्विशेषणवैयर्थ्यमेव। नहि तत्र बलोप
स्थितित्वेन प्रतिबंधकत्वं किंतु ग्राह्याभावनिश्चयत्वेनेति चेत्। अत्राहुः। बलोपस्थितित्वेनैव प्रतिबंधकत्वं विवक्षितं। एवं च सर्वाण्येव विशेषणा
न्यसंभववारकाणीति तदवैयर्थ्यं। तथाहि। बलोपस्थितित्वेन प्रतिबंधकत्वमसंभवि स्वकीयबलोपस्थितेरप्रतिबंधकत्वात्। अतः साध्यसिद्धि
विरोधित्वाद्युपस्थितो विशेषणं। केवलान्वयि सत्प्रतिपक्षानुरोधात् अनेनैरूपेण प्रतिबंधकत्वं न तु साध्याभावसाधकबलोपस्थितित्वेनेति
न दोषस्तादवस्थ्यं। साध्यविरोध्युपस्थितिस्वरूपयोग्यबलोप x संग्रहा x स्थितित्वस्यहीनबलोपस्थितावपि सत्वे न तत्वं न प्रतिबंधकतावच्छेदकमित्यसंभवतादव
वस्थ्ये न तदुद्धारणाय च समानपदं। समानत्वं च प्रतिवद्यापेक्षया बलवदनपेक्षया। निर्णीयमानत्वं। न च हीनायां बलोपस्थितौ न दोषस्ति। एवं च वाधतस्य भ्रमा
दावतिव्याप्तिर्वनाशंकनीय तन्निरासाय विशेषणमिति॥ ॥अत्रेदं चिंत्य॥ तादृशबलोपस्थितित्वमपि न प्रतिबंधकतावच्छेदकं। तथाहि। यत्रोभयहे
तुपरामर्शकाले भयत्र वाधाद्यन्यतरोभयस्यापि हीनबलत्वं तत्र तदुपस्थितावति प्रसंगेन पुनरप्यसंभव एवात स्यापि प्रतिबंधकापेक्षा
बलवदनपेक्षयाऽनिर्णीयमानत्वेन समानत्वात्। न च तदासत्प्रतिपक्षत्वमिष्टमेवेति वाच्यं। अप्रसिद्धान्तात्। बाधादेवानुमितिप्रतिबंधसंभवात्। वाधि

कृ॰ ९५

सिं॰ग्र॰टी॰ तेनापि सत्प्रतिपक्षे हेत्वाभासांतरेणापि तद्दापत्तेः। किंचा अधिकबलोपस्थितेरपि प्रतिबंधकत्वान्न समानबलोपस्थितित्वं प्रतिबंधकतावच्छेदकं। किंतु न्यून
बलोपस्थितित्वमेव। न च समानपदेन तथैव विवक्षितमिति वाच्यं। हीनबले तिव्याप्तेः। अनेनैव रूपेणाधिकबलोपस्थित्याप्रतिरुद्धकार्यलिंगत्वात्
१०० स्या। न न्वधिकबलोपस्थितेर्विरोधिसामग्रीत्वेनैव प्रतिबंधकत्वं न त्वनेन रूपेणेति चेन्न। हेनैवं समानबलोपस्थितेरपि विरोधिसामग्रीत्वेने
100 व प्रतिबंधकत्वमस्तु। परस्पर [illegible] निरुद्धार्थकशब्दस्थलेन था प्रतिबंधकत्वकल्पनात्। तथा च सुतरामसंभवः। तेन रूपेण कस्यचिदपि प्रतिबंधक
त्वाकल्पनात्। तस्मादुपस्थितित्वेनाप्रतिबंधकत्वेपि यदुपस्थितेः प्रतिबंधकत्वे व्याप्तिपक्षधर्मतावलंबेनापि रूपेण विषयतयावच्छेदकं त
दुपस्थित्याप्रतिरुद्धकार्यत्वं विवक्षितं। तथा च पर्वतो वह्निमानित्यादिलिंगप्रतिबंधकबलोपस्थिते यत्राभावोपस्थितित्वेन प्रतिबंधकत्वं। व्या
प्तिपक्षधर्मतावैशिष्ट्यस्य च तत्र यावत्तया तदभावरूपस्य बलस्य ग्राह्याभावरूपतया तदवच्छेदकत्वमित्यतिव्याप्तिः। तथा चैंद्रारणाय साध्य त ५
विरोधीत्यादिविशेषणं। अनित्यत्वव्याप्यकृतकत्ववानित्यत्वविरुद्धजन्यत्ववान्निश्चयरूपबलोपस्थितौ च समूहालंबनरूपायां विषया
तया न बलं प्रतिबंधकतावच्छेदकं किंतु विरुद्धत्वमात्रं। तावतैव तत्र तस्याः सहचारधीप्रतिबंधद्वारा व्याप्तिधीप्रतिबंधकत्वसंभवादि
ति। लिंगपदं च व्याप्तिपक्षधर्मतयाज्ञानत्वपरं। तेनापि तादृशबलोपस्थित्याप्रतिरुद्धकार्यलिंगे विरुद्धत्वेन ज्ञायमाने जन्यत्वादौ नाति १००
व्याप्तिः। अत एव चात्ममनःसंयोगे विरुद्धव्यभिचारिणि वा तत्वेन ज्ञायमानेनातिव्याप्तिः। तदपि हितादृशबलोपस्थितिप्रतिरुद्धकार्य

र्थमेवानत्प्रतिरुद्धायामनुमितौलिंगवदात्मादेरपि कारणत्वात्तान च साध्यविरोधीनित्वसाध्यपर्य्यवसाध्यप्र रतन्तःकथमलिंगेतत्रातिव्याप्तिरितिवाच्यं।
साध्यंहित्त्राप्यंतत्र लिंगस्यैवात्मादेरपीतिसर्वसुस्थं। यत्तु समानबलोपस्थित्या प्रतिरुद्धकार्यलिंगत्वमेवतत्त्वं। समानत्वमेव केनरूपेणाविवक्षितमि
त्यपेक्षायांसाध्यविरोध्युपस्थापनसमर्थत्वं विशेषणं। तथा चतेन रूपेण समानयाबलोपस्थित्या प्रतिरुद्धकार्यत्वं विवक्षितमिति। तन्न। अधिकब
लोपस्थित्याप्रतिरुद्धकार्ये हीनबलेतिव्याप्तेः। नचसा न समाना किंत्वधिकेतिवाच्यं। साध्यविरोध्युपस्थापनसमर्थत्वेन तस्यापि समानत्वा।
त्। प्रकारांतरेणासमानत्वविवक्षायां साध्येत्यादिविशेषणवैयर्थ्यापत्तेः। ननु बलं सपक्षसत्त्वादिकं विपक्षासत्त्वादिकं वा। अधिकव्याप्तेरेकाप
आप्तेः। अन्यथा केवलान्वयिन्यव्याप्तिरित्यत आह। बलं चेति। व्याप्तिपक्षधर्मत्वसाध्यसिद्ध्यनुकूलाविवक्षिता। सा च क्वचिदन्वयव्याप्तिः क्वचिद्व्यति
रेकव्याप्तिरिति भावः। विरोधीति। अत्राप्यधिकबलोपस्थित्या प्रतिरुद्धकार्यलिंगे गतिव्याप्तिवारणाय विरोधिबाधकान्तेति। गमकतोपयि
करूपविशेषणं बाधकत्वं च न स्वरूपयोग्यत्वं किंतु फलोपहितत्वं। तेन समत्वातिपक्षस्यापि विरोधिबोधस्वरूपयोग्यत्वेन तदसत्त्वाभावात्त्रा
संभवः। तदर्थोपि विरोधिबोधो वास्तु उपहितान्पक्षमतो न केवलान्वयिनि सत्प्रतिपक्षो विरोधिबाधकाप्रसिद्ध्याऽव्याप्तिः। गमकतोपयिकं च
रूपं व्याप्तिपक्षधर्मते। अत्रापि व्याप्तिपक्षधर्मतया ज्ञाततत्परलिंगपदं बोध्यं। तेन न पूर्वोक्तातिव्याप्तिः। यत्तु चक्षुरादिकमप्यनुमानेन स
त्प्रतिपक्षितं भवतीति मतेनत्साधारणमपि लक्षणासु लभं भवत्विति लिंगपदं नोक्तमिति। तन्न। तन्मते यथा चक्षुरनुमानेन सत्प्रतिपक्षितं

अनु० तथा च स्तुषाप्यनुमानं सत्प्रतिपक्षितं वा यान्तत्र नोक्तलक्षणासंगृहीतस्मात् ताज्ञायमानत्वेन चक्षुषोऽप्रतिबंधकत्वादग्रे चक्षुरादेश्च तेनेन ग्रंथकृतैव न
न्मतस्य दूषणत्वाच्च। एकदा निरंतरयोर्वेति। सामग्र्यनियमात्क्वचिदेकदा क्वचिन्निरंतरयोरितिसूचनं स्थितविकल्पः। न चाग्रिमपरामर्शकाले पूर्व
१०१ मपरामर्शेनानुमितिजननापत्तिः। विरोधिपरामर्शसामग्र्या एव तदा प्रतिबंधकत्वादग्रिमपरामर्शस्य प्रतिबंधकतया तदभावस्य कार्यसहभूतस्यै
व जनकत्वाभ्युपगमेन तत्कालं तदभावाच्च। स्वपरसाधारणत्वादिति। तथा चास्या पि दूषणासमर्थत्वाद्दूषणांतरवक्तव्यं परार्थानुमानेऽप्यविस
द्धमितिभावः। प्रतिरुद्धं चेति। विरोध्युभयपरामर्शविषयीभवत्प्रतिसाधनत्वानानंतरमित्यर्थः। प्रतिरुद्धत्वज्ञानस्य प्रतिरोधाहेतुत्वात्। उ
भयोरेकत्वेति। ननु विरोध्युभयोरेकत्वनिश्चय एव कुत इति चेन्न। हेत्वोर्विरोधापरिस्फुर्तेस्साध्ययोश्च तन्न रिस्फुर्तेश्च सामग्रीसमा
जादुभयपरामर्शसंभवात्। न हि साध्यविरोधस्य एव हेत्वोर्विरोधः। उभयपराययोर्नेतरस्या व्याप्यो विरोधभाने च सत्प्रतिपक्षसंभवात्। किंच।
सत्पक्षरूपपरामर्शे विरोधिव्याप्यत्वग्रहो न प्रतिबंधकः पीतः शंख इति भ्रमानुपपत्तेः। किंतु या साभाव्याप्यत्वग्रहमात्रं तस्य च तत्राभावात् न
सत्प्रतिपक्षासंभव इति भावः। ननु सद्धेतुना कथं सत्प्रतिपक्षः हेत्वाभासतादृशस्य प्रयोजकस्य साध्याविरहस्य तत्राभावात्। तादृशस्यापि हेत्वा १०१
भासत्वे सर्वदैव तत्वं स्यादित्यत आह। दूषकताबीजमिति। दूषकताबीजं हेत्वाभासताप्रयोजकं। तथा च विरोधिपरामर्शविषयीभवद्ययं निर्णयो
नजनयतीत्यत एव हेत्वाभासो न तु व्याप्याद्यभावात्। तथा च सद्धेतोरपि तस्य तथात्वं। अत एव न सर्वदैव तथात्वं। तादृशविरोधिपरामर्शस्य का

दाचित्कत्वात्। नन्वदूषकताबीजमनुमितिप्रतिबंधज्ञानविषयतावच्छेदकमिति भ्रमः कर्तव्यः। निर्णयाजनकत्वज्ञानस्य प्रतिबंधकत्वात्। तादृशज्ञान
विषयतावच्छेदकं च प्रतिहेत्वयमेवातद्भिन्नं च यथा तदुभयस्य तथोक्तं प्राक्। एकत्वेति। अन्यतरत्वप्रकारकव्याप्त्यादिभिन्नज्ञानजनकत्वात्तल्लक्षणेऽति
व्याप्तिवानतिप्रसक्तेन तु पृथिवीत्वेनास्य हेत्वाभासत्वमित्यर्थः। तत्र कादाचित्कमिति। न सदास्य हेत्वाभासत्वमिति भावः। एवं च यदा व्याप्त्यादिभ्रमस्तदा तद्
दास्पदोषत्वं तदा दूषकतायामसिद्ध्युपजीवनान्नास्य हेत्वाभासत्वं प्रयोगिणि निरस्तं बोध्यं। ननु मानप्रतिरुद्धे च हेतुसाध्योर्लिंगत्वाभावादुष्ट
त्वज्ञानयोरव्याप्तिः। तस्य व्याप्तिपुरस्कारेण गमकत्वात्तद्ग्राहकज्ञानद्वारा तत्र दूषणत्वासंभवाच्चेत्यत आह। वस्तुतादृष्ट्वेति। ननूपस्थिता विति।
पीतत्वाभाव व्याप्यशंखत्वोपस्थिताविपि पीतप्रत्यक्षोदयस्यानुभवसिद्धत्वादित्यर्थः। तन्नैवमिति। यदि समानबलमात्रेणासत्प्रतिपक्षत्वस्युप
गम इत्यर्थः। समानबलत्व इति। व्याप्त्यादिभिन्नं बलमभ्युपेत्य। तन्त्राणां योगश्च विसत्प्रतिदोषसमेव दोषान्तरमाह। अधिकेति। तस्येति। विरो
धिवाक्यस्य। अधिकबलत्वे तात्पर्य नानुमेयस्य बाधितत्वादेवानुमानवैयर्थ्यं। न्यूनबलत्वे च ज्ञानेऽसाध्यनिश्चयात् दृढतरैव वैयर्थ्यमिति भावः। उक्त
हीति। प्राबल्यरूपं च प्रमाणत्वं तादृशं बलमित्यर्थः। प्रतिवाक्यजन्ये च ज्ञाने प्रमाणत्वशंकास्कंदितत्वादिति भावः। ननु यदि सात्रिपक्षधर्मत्वे बला
दामत्वादेः सत्प्रतिपक्षत्वापत्तिः सर्वसिद्धो विरुद्धो न स्यादत आह। समत्वादिति। कथायामिति। यदुपन्यस्तं परं प्रमाणं जनयति तदेव प्रमाण
मुपन्यसनीयं। प्रत्यक्षं च स्वरूपसत एव प्रमाजनकत्वं। शब्दस्य तथात्वेपि वादियुक्तत्वे नाप्रामाण्यशंकास्कंदितत्वादिति भावः। एकैकमिति।

अनु० यत्पेकमसाधारणत्वाभावादिनिभावः। साध्यतदभावयोरित्यादिसाध्याभावएव बाधः। अप्रामाण्यशंकाशून्यं च तज्ज्ञाने प्रतिबंधकमितिमतेनेदमुक्तं।
ननु विरुद्धद्वयद्वनिश्चयसामग्र्याः संशयजनकत्वकल्पनादवश्यमवतयानुमितिरूपसंशयउत्पाद्यः। नच विशेषादर्शनसहितायास्तस्यास्तथात्वं।
१०२ प्रकृते च विशेषदर्शनमिति वाच्यं। एकमात्रकोटिविशेषदर्शनस्यैवसंशयप्रतिबंधकत्वात्तदभावस्यैवसंशयकारणत्वात्। तस्य च प्रकृतेसत्त्वात्।
अन्यथास्थाणुत्वपुरुषत्वोभयव्याप्यदर्शनेसति पुरोवर्तिनि तदुभयकोटिकसंशयानुपपत्तेः। ननु विरुद्धद्वयसत्त्वसामग्र्याः संशयजनकत्वे अ
102 न्यथा विरुद्धस्मृतिसामग्रीतः संशयरूपस्मृत्यापत्तेः। विरुद्धार्थकशब्दद्वयाच्छाब्दसंशयापत्तेश्चेति चेन्न। एतन्मतइष्टापत्तेः। ननु एवमन्यत्रापि
संशयरूपस्मृतौ बाधकाभावात्संशयस्यापि संस्कारजनकत्वं स्यान्न च सर्वमतनिषिद्धमिति चेत्। एतावता विरुद्धानुभवसामग्र्यास्त्विन संशयज
नकत्वमस्तु। ननु प्रत्यक्षे साध्याभावप्रत्यक्षत्वेन प्रतिबंधकत्वादनुमितौ शाब्दज्ञाने वा साध्याभावज्ञानत्वेनैव प्रतिबंधकत्वे कल्प्यमाने ला
घवेन सामान्यतः साध्याधिकरणानधिकरणज्ञानत्वेन कल्पने। तद्वत्साध्याभावव्याप्यज्ञानेप्यस्त्विति चेन्न। एवं हि जलह्रदोवह्निमानिति
भ्रमरूपाप्यनुमितिः कदापि न स्यात्। पक्षतावच्छेदकजलह्रदत्वादिज्ञानस्यैव साध्याधिकरणानधिकरणज्ञानत्वेन प्रतिबंधकत्वसंभवात्।
नच स्वरूपेण तज्ज्ञानं प्रतिबंधकं नापि तु साध्याभावव्याप्यत्वेनेति वाच्यं। एवं हि साध्याभावव्याप्यज्ञानस्यापि तत्त्वेनैव वह्न्ययोगव प्रतिबंधकत्वे १०२
वाच्यं नोक्तरूपेणाउक्तातिप्रसंगात्। तच्च न संभवति। अन्यत्र तथा प्रतिबंधकत्वे कल्पनात्। किंवा साध्याभावव्याप्यवद्धीसत्त्वामात्रवचनात्।

रूंज्ञानं नोत्पद्येत। नचेष्टापत्तिः योग्यतादिज्ञानसत्त्वे शाब्दज्ञानोत्पत्तेरावश्यकत्वात्। ननु प्रमत्तस्थले नकोटिस्मरणादेर्निश्चयत्वावच्छिन्नसामग्रीत्वं
किंतु ज्ञानसामग्रीत्वमेव। तद्विशिष्टज्ञानं प्रत्येव तत्कोटिस्मरणे तज्जनकत्वात् प्रतिबंधकाभावे सति सा निश्चयं जनयतीति निश्चयसामग्री तु अतो न
या च संशयस्यापि ज्ञानत्वावच्छिन्नज्ञानत्वसामग्र्या तदुत्पत्तावविरोधः। व्याप्यदर्शनं न ज्ञानमात्रसामग्री किंत्ववधारणात्मकनिश्चयसामग्रीति न
तया ऽनुमित्यात्मकसंशयस्योत्पादनमिति चेन्न। रूजीयलिंगपरामर्शस्य हि कार्यतावच्छेदकमनुमितित्वं जातिर्लाघवात्। न त्ववधारणात्म
कनिश्चयत्वं। गौरवात्। व्यभिचाराच्च। अनुमितित्वं च संशयरूपायामप्यनुमितावितिकथं तेन न तदुत्पादनं। ननु साध्याभावव्याप्यज्ञानं न
साध्यानुमितिप्रतिबंधकमेव। अन्यथापीतः शंखइत्यनुमितिरपि स्यात्। पीतत्वाभावव्याप्यशंखत्वबुद्धेरप्रतिबंधकत्वात्। अन्यत्र ह्यत्र दोषवशा
द्विशेषादृष्टिः॥ [illegible] ॐ। शंखपीतत्वव्याप्यधर्मपरामर्शे संशयरूपपीतत्वानुमितेरिष्टत्वात्। तदपरामर्शजनिकारणाभावादेव पीतानुमित्यनु
त्पाद इति तदभावव्याप्यज्ञानस्यापि प्रतिबंधकत्वे मानाभावः। ननु साध्यतदभावनिश्चयरूपस्य परस्परप्रतिबंधकत्वात्तत्सामग्री
त्वेन परामर्शयोरपि परस्परप्रतिबंधकत्वमिति चेन्न। प्रत्यक्षस्थलेपि संशयानापत्तेः। मैवं। संशयरूपाप्यनुमितिरनुभवबलाद् स्वी
कार्या। विरोधिनिश्चयसामग्र्योस्तु न संशयजनकत्वकल्पना सामग्र्यावलाद्द्। नाध्य। अनुमिनोमीत्यनुव्यवसायस्य सत्वादिति पक्षस्थलो
प्रसिद्धेः। सेदं ह्रीत्याद्यनुव्यवसायस्य चावश्यकल्पनीयकारणाभावकोटिस्मरणात् दिजन्यसंशयविषयत्वेनाप्युपपत्तेः॥ ॥ [illegible]पि द्वितीयः॥

अनु० विरोधिप्रत्यक्षसामग्रीत्वेनैवसंशयाजनकत्वकल्पनात्। तत्र अन्यथाव्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वस्यानुमितित्वप्रयोजकत्वात्संशयोत्तरमु
त्पन्नेप्यनुमित्यापत्तिः। तत्रानुमिनोमीत्यनुव्यवसायाभावात्फलाभावेनिश्चितेप्रत्यक्षसामग्रीविरहसहकृततज्जन्यत्वमनुमितित्वप्रयोजकमितिप्र
१०३ तिबन्धकाप्रकृतेपितादृशानुव्यवसायाभावाद्विरोधिप्रत्यक्षसामग्रीजन्यत्वसंशयत्वप्रयोजकमितिकल्पनेननुकारणानुरोधेनफलकल्पना।
अतएवविशेषणज्ञानविशेष्येन्द्रियसंनिकर्षादिकं प्रकारणासत्वेपिप्रवर्तनेवहिसाक्षात्कारानुभवाद्विशेषणासंनिकर्षस्यापिकार
णत्वंकल्प्यतइतिसंक्षेपः। विरोधीति। यद्यपिनैकं विरोधित्वमुभयज्ञानेविषयस्तथापियथासाध्याभावज्ञानंसाक्षात्प्रतिबंधकं तथा
103 तदभावव्याप्यत्वज्ञानमपीतितात्पर्यं। विपरीतेति। ज्ञानपदं प्रमापरं। पक्षधर्मइति। वृत्तिमतइतिलक्षणानुरोधेनाकाशादिनेवि
रुद्धइतिमतेनेदमुक्तं। नन्विदंबाधितेपिगतमित्यतआह। बाधइति। तथाचविपरीतज्ञानजनकत्वं विरुद्धत्वं ननु। विपरीतज्ञान
विषयपक्षवृत्तित्वं। अतोनतत्रातिव्याप्तिरितिभावः। पक्षइति। अन्यतोविपरीतज्ञानसंभवादित्यर्थः। व्याप्तिबाधइति। व्याप्यत्वपक्षधर्म
ताबाधइत्यपिद्रष्टव्यं। तथाचव्याप्तिपक्षधर्मतान्यतरबाधःफलमित्यर्थः। क्तो। प्रकृतोभयसाधकहेत्वोरित्यर्थः। व्यामीति। ता
दृशजिज्ञासाजनकोपस्थितिविषयत्वमित्यर्थः। नन्वेकपरामर्शादपितादृशजिज्ञासासंभवतीत्यतिव्याप्तिरित्यतआह। नहीति। १०३
असतीति। तथाचतारणान्यायेनविजातीयजिज्ञासायामस्यजनकत्वान्नव्याप्तिरितिभावः। अत्रहेतुसमीचीनत्वइष्टुपलक्षणसाक्षा

त्यपि इष्टव्यं। अपरहेत्विति। क्वचिद्व्याप्तिज्ञानेना क्वचित्पक्षधर्मताज्ञानेना अग्निमद्विशिष्टज्ञानं च वह्निव्याप्यवानयमित्याकारं पर्वते धूमविशिष्टे वह्निव्या
प्तिरित्याकारं वा। तदन्यतरज्ञानेत्यत्रिकालेपूर्वपरामर्शविनाशादित्यर्थः। अन्यथा विरोधित्वेन प्रथमज्ञानस्यैव परामर्शनाशकत्वाज्ञानाभ्या
मित्यसंगतं स्यात्। जातेत्यत्र इति। सत्ता दौ व्यभिचारवारणाय। घटस्याद्यौ व्यभिचारवारणाय द्वितीयं हेतौ विशेषणं। ननु गुणवत्त्वादावुपाधेन
यापि व्यभिचार इति चेत्। तथापि सत्प्रतिपक्षितत्वमक्षतमेव। विशेषादर्शनकालीनेनापि तास्वीकारात्। अत एव वक्ष्यति। विशेषादर्शनदशा
यामिति। अ। तएवाग्रिमानुमानेपि परान्योन्याभावादौ व्यभिचारान्न दोषावह इति भावः। पीनत्वव्याप्येतद्धर्मवत्त्वपरामर्शस्य शरवेनापीनत्वा
नुमितिप्रतिबंधकः। अप्रामाण्यशंकास्कंदितत्वात्। तदनास्कंदने तु सत्यतिप्रतिपक्षितत्वमिष्टमेवेति तत्त्वं॥ ॥१०॥ प वस्तुत इति। ॥११॥
इदं च विशिष्टाभावस्य प्रत्येकाभावसामानसंवित्संवेद्यत्वमभिप्रेत्योक्तं। वस्तुतस्त्वखंडाभावस्य तस्य शब्दादिना केवलस्यापि ज्ञातस्य ग्राह्याभावं च
हिरानंत्वाविशेषेणावश्यप्रतिबंधकत्वात्सोपि दोष एवं यथा च न हेत्वाभासाधिक्यं तथा वक्ष्यते। वर्षेति। इदमप्यखंडाभावमनभ्युपेत्योक्तं।
[illegible]मत्वादिति। प्रत्येकाभावज्ञानेजातस्यापि विशिष्टाभावज्ञानस्याप्रामाण्यशंकास्कंदितत्वे न स्वकार्याक्षमत्वादित्यर्थः। का चित्काभि
प्राय[illegible]पजीव्यत्वमुक्तमित्यप्याहुः। नन्वेवं व्यभिचारादेरसिद्ध्यंतर्भाव इत्यत आह। व्यभिचारादाविति। उपजीव्यत्वं का चित्काभिप्रायेणेति ध्ये
यं। तथेति। इदं त्वनौपाधिकत्वव्याप्तिपक्षे। तत्रोपाधिरेव व्याप्तिविरह इति ध्येयं। [illegible]हेत्वादि। साध्यव्यापकत्वादिना पदार्थघटितत्वेनास्य न

अनु० रूपेणयाविलंबितप्रतीतिकत्वादित्यर्थः। ननुज्ञप्तावनुपजीव्यत्वेप्युत्पत्तावुपजीव्यत्वं तत्त्वं स्यादित्यत आह। यदि चतस्मादिति। सएवेति। ज्ञानगर्भहेत्वाभासलक्ष
णानुरोधादितिभावः। सिद्धेऽनयोरपिहेतुत्वादित्यत्रहेतुमाह। व्यभिचारादेरिति। सद्धेतौ। सद्धेतुत्वदशायां। सिद्धिदशायामितिवार्थः। तथा च व्यभिचारि
१०५ त्वादेर्हेतुत्वंतदा नस्यात्। यदि सिद्धिखंडनहेतुत्वे तन्निष्ठव्यभिचारादेः स्यात्। तदेवनास्तितदा तस्य न हेत्वाभासत्वं किंतु हेतुत्वमेवेत्यर्थः। अनेन ननु य
त्र व्यभिचारादेर्हेतुदोषस्याभासत्वं स हेतुर्यत्र तु न तस्य तत्त्वं सतदाभासइत्येव हेतुतदाभासविवेकः स्यादित्यत आह। व्यभिचारादेरिति। चकारोऽत्र भिन्नक्र
१०५ मो व्यभिचारादेश्चेत्येवं योजनीयः सोप्यपर्थः। तथा च व्यभिचारादेरपि सिद्धिखंडनप्रयोजकतया हेत्वाभासत्वमिष्यते। सिद्धिखंडने च यदि व्य
भिचारादिविरहितेसद्धेतावपि स्वीकृतं तदा तत्र यत्सिद्धिखंडनं तत्कुर्वंतस्तस्य सिद्धिखंडनाप्रयोजकत्वाद्व्यभिचारादेर्हेतुदोषत्वं स्यात्तथा च त
त्स्वाभासत्वकृतोपिहेतुतदाभासविवेको न स्यादितिभावइत्याशङ्कः। मनोयोगादेरपीति। यदि च मनोयोगादिकारणत्वेप्रमाणांतरमस्ति तदा त
द्व्यतिरेकाद्यननुमितिव्यभिचारकस्याप्रपकत्वादसिद्धिवदस्यापि हेत्वाभासत्वं स्यादित्यनिष्टो वेद्वयकारणाभावस्यस्याविशेषादिति।
ननु मास्तु मनोयोगादिकं कारणमित्यप्युपगंतारं प्रत्याह। सिद्धेरिति। तथा चापसिद्धांत इति भावः। गमकतौपयिकपदेनाबाधितत्वा
सत्प्रतिपक्षितत्वे विवक्षितौ तत्प्रतिद्वंद्वित्वं बाधसत्प्रतिपक्षयोः। तावदन्यतमत्वं लक्षणमिति नाननुगमः। व्याप्तिविरहनियतत्वेनेति १०५
।।व्याप्तिविरहनियततावच्छेदकरूपेण व्यभिचारित्वादिना ज्ञातयोरित्यर्थः। विशेषदर्शनस्येति। विरोधिविषयतामात्रेण साम्यं। मूल।।

त्मेयाद्याभावव्याप्यग्रहस्य प्रतिबंधकत्वदर्शनादुभयोरपि व्याप्तिविरहव्याप्यत्वेनैव ज्ञानयोः प्रतिबंधकत्वमित्यैतत्त्वमिमानेनैनेतदुक्तं। विवक्षितत्वादिति
असिद्धत्वेनेति शेषः। नेत्यन्ते। ननु व्याप्तिपक्षधर्मता विशिष्टाभावादिकमिति भावः॥ ॥प्रत्येकमेवेति। एवकारो भिन्नक्रमः। प्रत्येकं दोष एवेत्यर्थः।
ननु विशिष्टाभावः। विशिष्टाभावमात्रमित्यर्थः। अत्र हेतुः पूर्वोक्तः प्रत्येकस्य ज्ञानादित्यादिः। परामर्शविषयाभावेनेत्यत्र हेतुमाह। यथेति विशेषणा
वादिति। परामर्शांशस्य यथार्थत्वादित्यर्थः। तस्य परामर्शस्य एतेन विशिष्टाभावो विदोषएव। विशिष्टस्यापि ग्राह्यतयातद्भावस्यापि विरोधितात्
न च यथार्थविशेषणानां। अखंडाभावे तदभावात्। शब्दादिना प्रत्येकाभावानुपस्थितावप्युपस्थिततया बनतनेवानाथासिद्धिः। तथा च प्रत्येकमनु
दोषानन्तु विशिष्टाभावइत्यसंगतमित्यपास्तं तस्यापि दोषत्वस्वीकारात्। उभयोजनयाग्रंथस्यसंगतत्वात्। असिद्धेर्द्विविधत्वोपवर्णन
मुपलक्षणं। अतएव हेतौ पक्षसंबंधविरहः। पक्षे हेतुसंबंधविरहः। व्याप्तिपक्षधर्मतासामानाधिकरण्यविरह इत्यादयोपि परामर्शविषयी
भूततत्तत्पदार्थप्रतियोगिकाभावाअसिद्धंतर्भूताएव। नन्वेवं हेत्वाभासाधिक्यस्यादिमत आह। परामर्शविषयाभावत्वेनेति। ननु व्य
भिचारसहचारयोः परामर्शविषयतया तदभावे व्यभिचारेविरुद्धेचातिव्याप्तिः। साध्यस्यापि तादृशतयातदभावरूपे बाधे चाति व्याप्तिः
ननु यद्रूपोपस्थिततयाद्विषयतयापरामर्शस्यानुमितिजनकत्वं तद्रूपावच्छिन्नतदभावो विवक्षितः। साध्यप्रतियोगिकव्याप्तित्वप्रकारो
पस्थितव्याप्तिविषयतया च परामर्शस्तथा। अतो व्याप्तित्वावच्छिन्नाभावोभवत्वसिद्धिः। न तु व्याप्तिशरीरप्रविष्टप्रत्येकाभावः। प्रत्येक

अनु० विषयत्वेन च परामर्शस्य जनकत्वे तत्परामर्शादेरनुमित्यापत्तेरिति चेन्न। एवं पक्षे हेतुसंबंधासिद्ध्यादेरसंग्रहापातः। नहि हेतुसंबंधस्य प्रकारोपस्थि-
तहेतुसंबंधविषयतया परामर्शस्यानुमितिजनकत्वं। हेतुसंसर्गस्य परामर्शे संसर्गविधया भानत्वेन तत्र प्रकारत्वेनाभानात्। नवा व्याप्तिवि-
१५ प्रकारोपस्थितव्याप्तिविषयतया परामर्शस्य कारणत्वं। विशकलितव्यभिचाराभावसहचारग्रहणानंतरभाविनः पक्षे लिंगवैशिष्ट्यविष-
105 यकस्य लिंगे च तदुभयवैशिष्ट्यविषयकस्य मानसादिपरामर्शस्यानुमितिजनकतापत्तेः। व्याप्तित्वस्य पूर्वोपस्थितत्वेन प्रकारत्वाभावात्।
तदुभयवैशिष्ट्यस्यैव व्याप्तिरूपतयानुमितिजनकत्वं तस्यापीति मैवं। व्यभिचारादिवत् पृथग्भिन्नहेत्वाभासत्वस्य विभाजकोपाधित्वा-
त्। अत एवेति। असिद्धेरेकरूपत्वाभावादेवेत्यर्थः। अन्यथा बहुवचनं येऽत्यन्तनस्यादिति भावः। [illegible]इति। व्योमकमलं सुरभि कमलत्वा-
दित्यादावेवाश्रयासिद्धिर्बोध्या। तत्र व्योमकमलादिकमप्रसिद्धमिति कथं तद्विरहं भावनीय इत्यर्थः। व्योमकमलमिति। निषिध्यत इति
शेषः। अपार्थकमिति। तथा च नाश्रयासिद्धिरुद्भाव्यते किं त्वपार्थकमेवेत्यर्थः। ननु वा माश्रयासिद्धिः कुत्रेत्यत आह। आश्रयेति। सु-
वर्णमयोऽद्रिरग्निमान् धूमवत्त्वादित्यादौ सुवर्णमयत्वादिविशेषणासिद्धिराश्रयासिद्धिरसंकीर्णेत्यर्थः। एवं च व्योमकमलपदमपि पु- १०५
द्रिप्रसिद्धकमलतात्पर्येणोच्चार्यते तदा तत्र व्योमीयत्वविशेषणासिद्धिराश्रयासिद्धिर्वा अद्रौ सुवर्णमयत्वासिद्धिवदिति ध्येयं। [illegible]
दमप्यपार्थकं। आश्रयासिद्धेस्तत्रोपजीव्यत्वात्। अत एव बाधस्यापि दोषत्वं। यत्तु पक्षविशेषणापक्षे तात तदसिद्धिराश्रयासिद्धिरिति।

भा सता

तन्न। तद्विरहस्य कारणाभावत्वेन स्वरूपसत एव प्रतिबंधकतया हेत्वाभावात्। अनुपपन्नतावच्छेदकधर्माभावो न हेत्वाभासः। तज्ज्ञाने सत्यपि पक्षे धर्मिणि
लिंगपरामर्शसत्त्वेनानुमितिप्रतिबंधाभावात्। नच हेतुपक्षतावच्छेदकसामानाधिकरण्यस्य परामर्शविषयतया तदभावज्ञानस्य तद्विशिष्ट
परामर्शविघटकतया तद्विशिष्टावगाह्यनुमितिप्रतिबंधकत्वेन हेत्वाभासत्वमिति वाच्यं। एवं हि साध्यपक्षतावच्छेदकसामानाधिकरण्य
स्यानुमितिविषयतया पक्षतावच्छेदकधर्माभावज्ञानस्य व्याप्याभावज्ञानत्वेनैव प्रतिबंधकतया तस्य बाधांतर्भावापत्तेः। नच साध्याभावस्यैव बाधत्व
निर्वाच्यो पक्षतावच्छेदकसाध्यसामानाधिकरण्याभावस्यापि बाधबहिर्भूतत्वापत्तौ हेत्वाभासाधिक्यापत्तेः। नच सोप्याश्रयासिद्धिरेवेति वा
च्यं। परामर्शविषयाभावत्वाभावेन तस्य तद्विघटकतयाऽसिद्धिबहिर्भूतत्वात्। [illegible]कुः। हेतुपक्षतावच्छेदकसामानाधिकरण्यस्य पराम
र्शविषयतया तदभावस्याश्रयासिद्धिरूपत्वं। नाप्यंशसामानाधिकरण्यस्यानुमितिविषयतया तदभावस्य बाधत्वासंभवात्। पक्षतावच्छे
दकाभाववत्पक्षतावच्छेदकसाध्यसामानाधिकरण्याभावादयश्चाश्रयासिद्धाभाववत्तया बाधांतर्भूता एवेति॥ ॥ अथ तु पक्षतावच्छेदकाभावस्य
साध्याभाववत्तया यदि बाधत्वं तदा परामर्शविषयाभाववत्तयाऽसिद्धत्वमेव कुतो न स्यात्। न च साध्याभावातिरिक्तपरामर्शविषयाभावत्व
मसिद्धत्वमिति वाच्यं। परामर्शविषयाभावातिरिक्तसाध्याभाववत्त्वं बाधत्वमित्यस्यापि सुवचत्वात्। न चैवं साध्यस्यापि परामर्शविषयतया
तदभावोप्यसिद्धिरेव स्यादिति वाच्यं। लिंगोपहितलैंगिकभानपक्षे लिंगव्याप्यादेरपि परामर्शविषयतया तदभावस्यापि बाधत्वापत्तिरिति दि

अनु० नुत्सेतस्माद्यद्ज्ञानं परामर्शविघटकद्वारानुमितिप्रतिबध्नाति स नवाधः। यद्ज्ञानं च परामर्शे ज्ञातेपि साक्षात्प्रतिबंधकं स एव बाधः। अत एव लिंगोपहित
भानपक्षेस्वरूपासिद्ध्यादीनां नवाधत्वं प्रकृते च कांचनेमयत्वाद्यभावज्ञानं तद्विशिष्टपक्षकानुमितौ तद्विशिष्टपक्षधर्मतावगाहिपराम
र्शविघटनद्वारैव प्रतिबंधकं न तु साक्षात्। तादृशपरामर्शस्य पक्षे तद्वैशिष्ट्यविषयतानियमेन तदनंतरं पक्षे तदभावज्ञानासंभवात्।
पक्षे तदभावज्ञाने च तद्विशिष्टपक्षधर्मतावगाहिपरामर्शाभावादेवानुमितिप्रतिबंधः। तथा च पक्षतावच्छेदकाभावस्य ग्राह्याभावत्वेपि
नवाधत्वं किंत्वाश्रयासिद्धत्वमेव करा विसाक्षात्प्रतिबंधकत्वाभावादिति ब्रूमः॥ ॥पर्वतोवह्निमानित्यत्र प्रतिबंधेपि विशिष्टविषयका
नुमितिप्रतिबंधकत्वेनास्य हेत्वाभासत्वं। व्यर्थविशेषणास्थलेऽनुमित्युत्पादेपि दृश्यानुमितिप्रतिबंधकतया हेत्वाभासत्ववत्। एवं चकां
चनमयत्वविशिष्टत्वेन ज्ञातेपि पर्वते तत्त्वाभावज्ञानपर्वतभिन्नत्वज्ञानपर्वतस्य वर्णमयत्वसामानाधिकरण्याग्रहाभावज्ञानानामपि प
रामर्शप्रतिबंधकत्वात्तद्विषयाभावानामाश्रयासिद्धत्वमेवास्वरूपासिद्धिव्याप्यत्वासिद्धिभिन्नासिद्धित्वेन तेषामनुगमाद्वा। न वि
भागव्याघातः इत्यवधेयं॥ व्याप्ति विरहस्तिर्वति। असंकीर्ण इतिशेषः। आदिपदाद्व्यर्थविशेषणत्वपरिग्रहः। यथा चात्र व्याप्यत्वासिद्धिस्तथो १०६
पवक्ष्यते। ननु व्यर्थविशेषणासाधवसंकीर्णायधोस्तु। सव्यभिचारादिहेतौ व्यभिचारादिसंकीर्णाव्याप्यत्वासिद्धिः कथं। यत्किंचिद्व्याप्ति
विरहस्य सद्धेतुसाधारण्याच्चाक्यत्वादिसमानाधिकरणात्यंताभावाप्रतियोगित्वमादिसामानाधिकरण्यरूपस्यकृतव्याप्तेरसिद्धेः। न च

तधा२

साधनं समानाधिकरणात्यंताभावप्रतियोगित्वं साध्ये व्याप्यत्वासिद्धिरिति वाच्यं। अव्यभिचरितसामानाधिकरण्यस्य व्याप्तित्वेन विशेषणीभूताव्य
भिचारविरहरूपतया अव्यभिचारानंतर्भूतत्वात्। विशेष्यसामानाधिकरण्यविरहस्य च विरुद्धत्वात् तथा च विशिष्टविरहस्य तत्त्वं वाच्यं। तत्र चाप्र
सिद्धिरेवेति चेत्तन्न। हेतुसामानाधिकरण्यविशिष्टस्य हेतुसमानाधिकरणात्यंताभावाप्रतियोगित्वस्याभावो व्याप्यत्वासिद्धिः। न च विशेष्यवि
रहज्ञानस्यैव व्यभिचारत्वेनानुमितिप्रतिबंधकत्वमिति वाच्यं। हेतौ साध्यसामानाधिकरण्ये गृह्यमाणे साध्येपि हेतुसामानाधिकरण्यस्य सम
नसंविन्नवेद्यतया ग्राह्यत्वे न तद्विशिष्टाभावग्रहस्यापि प्रतिबंधकत्वात्। न च प्रतियोग्यप्रसिद्धिः। सव्यभिचारादिहेतुव्यापके प्रमेयत्वादौ तत्प्रसि
द्धेः। न चावृत्ति विरुद्धे तथाप्यसिद्धिः। तद्व्यापकाप्रसिद्धेरिति वाच्यं। तथैव स्य व्याप्यत्वासिद्धत्वेनासंग्राह्यत्वे नाप्यदोषात्। विरुद्धत्वादिनैव तस्य
हेत्वाभासत्वादित्यादिकं स्वोक्तं एवाचार्यसंमतिमाह। तदुक्तमिति। ननु नोपाधिकत्वस्य व्याप्तिरूपत्वे न तदभाव उपाधिर्व्याप्यत्वासिद्धिः। न च नील
धूमादावुपाधिरस्तीति न तत्र व्याप्यत्वासिद्धिरित्यत आह। उपाधिस्त्विति। ननु प्रयोजकत्व एव किमिति सांकर्यं नोक्तमित्यत आह। प्रयोज
केति। प्रतिकूलेति। न च तद्विषयस्य तर्करूपमेव ज्ञानं प्रतिबंधकमिति तस्य। हेत्वाभासत्वापत्तिः। तज्ज्ञानस्य नियमतोऽयथार्थत्वात्। अनुमि
तिप्रतिबंधकयथार्थज्ञानविषयस्यैव हेत्वाभासत्वादिति केचित्। अपरे तु यद्विषयत्वेन ज्ञानस्य प्रतिबंधकतावच्छेदकं तस्यैव हेत्वाभा
सत्वं। अत एव सिद्धसाधनस्यानुमितिप्रतिबंधकत्वेपि साध्यं न हेत्वाभासः। न चेह तर्के विषयविषयकत्वं तथा। तदर्थविषयकज्ञानं तेरारण्यत्

अनु० मितिप्रतिबंधापत्तेः। किंतु विषयानिरपेक्षज्ञाननिष्ठप्रामाण्येनैव तर्कस्य तथात्वं। अत एव समानविषयकादपि तर्कादिष्टापादनदशायां न प्रतिबंध इत्याहुः।
इह यथा व्याप्तिविरहज्ञाने पक्षधर्मताविरहज्ञानं साक्षात्परामर्शविघटकं तथा व्याप्तिविरहव्याप्यवत्त्वज्ञाने पक्षधर्मताविरहव्याप्यवत्त्वज्ञानं च
१० विरोधिज्ञानत्वेनाविशेषात्। न तथात्वे नडुभयविरहवत्त्वं उभयविरहव्याप्यवत्त्वं कथं न हेत्वाभासांतरमिति चिंत्यमिति वदंति। अत्र केचित्। तत्
द्विरहव्याप्यवत्त्वज्ञाने व्याप्तिपक्षधर्मताप्रत्यक्षादिविरोधितया तथा। व्याप्याद्यनुमितिविरोधितया वा। आद्यः संभवः। न हि व्याप्त्यादिविषयके
(१०) प्रत्यक्षे शाब्दज्ञाने वा तदभावव्याप्यधीर्विरोधिनी। प्रत्यक्षे ग्राह्याभावप्रत्यक्षस्येव शाब्दज्ञाने ग्राह्याभावज्ञानमात्रस्येव प्रतिबंधकत्वात्। अ
त्मनुसत्प्रतिपक्षत्वमेव। विरुद्धोभयव्याप्यवत्त्वात्। न च वह्न्युपाधिना व्यभिचारानुमितिरपि विरोधिनी तस्यादिति वाच्यं। योग्यपक्षधर्मिणो व्य
भिचारस्याप्ययोग्यत्वेन विशेषदर्शनानंतरं पुरुषप्रत्यक्षवद्व्यभिचारप्रत्यक्षस्याप्युत्पत्तेः। अयोग्ये तु सत्प्रतिपक्ष एवेति वदंति। तन्न।
व्याप्याद्यनुमितिप्रतिबंधकत्वेनैव हेत्वाभासत्वासंभवात्। न च सत्प्रतिपक्षत्वमेव। वह्नेर्धूमव्याप्तिविरहव्याप्यवत्त्वस्य धूमव्याप्यानुमि
तौ सत्प्रतिपक्षतया प्रतिबंधकत्वेपि वह्निना धूमानुमितावसत्प्रतिपक्षत्वात्। अन्यथा व्याप्तिविरहादेरपि न तथात्वापत्तिः। ग्राह्याभावस्यैव वाधो०७
बाधत्वात्। न च व्याप्तिरूपग्राह्याभावेन बाधः। किंत्वनुमितिविषयाभावः। तस्यैव साक्षात्प्रतिबंधकत्वादस्य च परंपराविघटकत्वादिति वाच्यं।
एवमपि व्याप्तिरूपग्राह्याभावव्याप्यवत्त्वं न सत्प्रतिपक्षः। किंत्वनुमितिविषयाभावव्याप्यवत्त्वं। तस्यैव साक्षात्प्रतिबंधकत्वादस्य च परंप
धूमविरहव्याप्यत्वस्यैव प्रतिपक्षत्वात्तेनैव धूमव्याप्तिविरहव्याप्यस्य तस्य व्याप्तिविघटनद्वारा धूमानुमितिप्रतिबंधकत्वात् सत्प्रतिपक्षस्य साक्षात्प्रतिबंधकत्वात्॥३॥

रादिघटकत्वादितितुल्यं ज्ञानस्याद्यर्थ्यव्याप्तिविरहज्ञानस्य बाधज्ञानत्वेपिन प्रतिबंधकत्वेपिन धूमाद्यनुमितौ बाधत्वं तथा व्याप्तिग्रहे व्याप्तिविरह
व्याप्यग्रहस्य सत्त्वेपि ज्ञात्वेन प्रतिबंधकत्वेपिन धूमाद्यनुमितौ सत्प्रतिपक्षत्वं। किंतु व्याप्तिविरहवद्धेत्वाभासांतरत्वमेवेति। अपरे तु तत्र योग्यपि
व्याप्यत्वासिद्धत्वमेव। अतो नाधिक्यं। न चाननुगमः। स्वरूपासिद्ध्याश्रयासिद्ध्योरपि न्नासिद्धित्वेन स्वरूपसते करूपेणासर्वसंग्रहादित्याहुः। तद
पि न। तत्र हेत्वाभासत्वव्यवहाराभावेन वक्ष्यमाणदोषाद् हेत्वाभासत्वाभावेन व्याप्यत्वासिद्धत्वाभावात्॥ ॥वयं तु ब्रूमः। सएव हेत्वाभासो
यस्य प्रमज्ञाने सत्यपि वक्ष्यमाणानुमितिप्रतिबंधः। न तु यज्ज्ञाने सति किंचिदनुमितिप्रतिबंधः सोपि तथा। उपाधेरपि हेत्वाभासतापत्तेः। व्याप्त्या
दिविरहव्याप्यवत्त्वज्ञाने च सति नावश्यमनुमितिप्रतिबंधः तज्ज्ञाने सत्यनुमितिरूपव्याप्तिग्रहप्रतिबंधेपि सत्प्रतिपक्षाद्व्याप्तिग्रहादनुमि
त्युत्पत्तेः न हि व्याप्त्यादिविरहव्याप्यज्ञानं प्रत्यक्षप्रतिबंधकं। पीतत्वाभाववद्व्याप्यशंखकत्वग्रहेपि पीतशंखोदयात् न चातज्ज्ञाने शौनं प्रतिबंधकं यो ८ श५
ग्प ग्यतादिज्ञानाविरोधित्वात्। अतएव स्थाणुत्वाभाववद्व्याप्यकरचरणवत्त्वज्ञाने पूर्वमयं स्थाणुरेवेत्यादिकं च नात्स्थाणुत्वनिश्चयोनुभवसिद्धः। अतएव बा
धप्रतिपक्षातिरिक्तः परामर्शविषयाभाव एव हेत्वाभासः शास्त्रकाराभिसंधानविषयः। तादृशस्याश्रयासिद्ध्यादिरेव। तेन व्याप्त्यादिविरहव्याप्य
वत्त्वस्य ज्ञायमानतया साक्षादप्रतिबंधकत्वेपि न हेत्वाभासत्वं। न च शास्त्रकारस्य तथाभिसंधाने मानाभावः। तत्र हेत्वाभासव्यवहारस्यैव मानत्वा
दितिसमाधानमनुपादेयं। उक्तेनैवोपपन्नेरिति। पक्षे साध्यासिद्धौ सिद्धसाधनमेव। तदभावसिद्धौ स्वरूपासिद्धिरेव। तदसिद्धावज्ञानरूपासिद्धि

यनिचे नाहशो-यत्र प्रसिद्ध ... १४

व

अनु० रेखातदसिद्धावज्ञानरूपासिद्धिरेवानेसाध्याविशेषणस्यनाधिक्यमाशंकनीयं॥ ॥साध्याभाववदिति॥ ॥प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नसाध्यावि
१०८ वत्त्वकत्वमित्यर्थः।एवमग्रिमलक्षणेषुप्यभावपदं तादृशाभावपरं बोध्यं।नन्विदं बाधितत्वं केवलान्वयिन्यप्रसिद्धमित्यबाधितत्वमपि तत्र नास्तीति तद्बो
धकनिगमनस्याप्युनवकाशः स्यादित्यपरितोषादितिरिक्तविषयतावादिमते नलक्षणांतरमाह। पक्षनिष्ठेति। पक्षनिष्ठं यत्साध्यविषयत्वं विशेषण
ताविशेषस्तन्निरूपकारीभूताभावप्रतियोगिसाध्यकत्वमित्यर्थः। विवक्षितेति। बाधज्ञानस्य हेतुविषयतया तत्प्रतिबंधकत्वाभावात्तन्मात्रविषयता
येवप्रतिबंधकत्वादितिभावः। प्रमात्वेनेति नथा च तत्प्रमात्वे दोषस्य ज्ञानस्य प्रतिबंधकत्वादितिभावः। अप्रमायामिति पक्षलक्षणे प्रमायामप्रमा
त्वनिश्चयेऽनुमितिनुमत्वेऽस्त्यपि इष्टव्यं॥ ननु पक्षे साध्याभावानुपस्थितौ विरोधाभावादप्रतिबंधकत्वात्तदुपस्थितौ च हेतुविषयत्वे व्यभिचारः।
तदविषयत्वे त्वसिद्धिरितिनासांकर्यं कुत्रापिबाधस्येति शंकते। अथेति। आश्रयासिद्धिरितिसंप्रदायमतेन बोध्यं। पक्षइति। नथा च फल
बलात्कल्पनीयव्यभिचारसंशयस्याप्रतिबंधकत्वेपितन्निश्चयस्य तत्त्वस्यादेवेतिभावः। अनुमितिनुत्पादेनेत्युपलक्षणं। तज्ज्ञनकपरामर्शेनचेति
इष्टव्यं॥ विशेषेति। विरोधीत्यर्थः। एकदेशिमतेनासांकर्यं शंकते। अथेति। यत्पक्षे फलेलाघवात्प्रमाणत्वावच्छेदेनैवोपनयस्य सहकारित्व १०८
कल्पनादितिभावः। अतएवेति। विशिष्टाप्रसिद्ध्यातादभावाप्रसिद्धेस्तत्वयुक्तसंसर्गयोग्यताभावेनाश्रयासिद्धिरपिनेत्यर्थः। अधिकर
णधर्मावच्छेदेनबाधवद्व्यभिचारोपिसंभवत्येवमनंतरत्वबाधोपिनेत्याशयेनसमाधत्ते।वस्तुतइति। अज्ञानादिति। विशिष्टवैशिष्ट्यावगाहिज्ञानेविशे

षणां तावच्छेदकप्रकारकविशेषणाज्ञानस्यैव कारणत्वमिति मतेनेदमुक्तं। विशेष्ये विशेषणं तत्र च विशेषणांतरमिति न्यायेन विशिष्टवैशिष्ट्यावगाहिज्ञानस्य
भवादित्ति ध्येयं। नन्वेवं धूमेन वह्न्यनुमितौ वह्निज्ञानानुमितिरपि न स्यात्। धूमे तन्निरूपितव्यभिचारादिसत्वात्। अथ यत्साध्यतावच्छेदकावच्छिन्नसाध्य
निरूपितं व्यभिचारादिकं दोषस्तदा प्रकृतेपि तुल्यमित्यपरितोषादाह। न चेति। न च साध्याभाववदिति। तथा च कांचनमयवह्न्यभावोपि न बाध इति
भावः। ननु साध्यतावच्छेदकस्य हेतुनिष्ठव्याप्तिनिरूपकत्वात्तन्निरूपितव्यभिचारस्यादोषत्वेपि वह्नौ कांचनमयत्वाभावज्ञानस्य ग्राह्याभावज्ञान
त्वेन प्रतिबंधकत्वं स्यादेव। तथा च ग्राह्यसाध्याभावस्यापि हेत्वाभासत्वं। यत्साध्याभाववत्ता विशेषात्मज्ञानस्यापि प्रतिबंधकत्वादित्यस्वरसादाह। व
स्तुतस्त्विति। वह्नौ कांचनमयत्वाद्यनुमितिसामग्रीविरहादेव न तज्ज्ञानं। ननु बाधादिति भावः। नन्वेवं प्रमत्वमात्रस्यायथार्थत्वप्रसंगः। प्र
वेत्र पूर्वोपस्थित[?]सकलभानापत्तेः। न चादृष्टादिकं नियामकं। प्रकृतेपि तुल्यत्वात्। फलव्यतिरेकस्यात्राप्रसिद्धेः। लाघवेन प्रमाणत्वावच्छेदेनैवाप
नयसहकारित्वकल्पनाच्च। अथोपनीतभानसामग्रीप्रत्यक्षादौ दोषसत्वादौ प्रत्यक्षादिसामग्रीसहायभावाच्च। न तु स्वतंत्रा। प्रत्यक्षादिसाम
ग्र्यभावेपि ज्ञाननापत्तेः। तथा चोपनीतभानेपि ज्ञानलक्षणेंद्रियप्रत्यासन्निसत्वादस्तूपनीतांशेपि तत्प्रत्यक्षं। अनुमितिसामग्र्यां तु साध्यादि
का। न चोपनीते सास्तीति कथं तत्सहाय्यात्तत्रोपनीतज्ञानं न सामग्री। कथं वा साधीरत्वनुमितिः। विषयैक्यं विना सामग्र्यात्तन्योन्यसहकारित्वस्या
तिप्रसंगेनानुमानकस्यात्र इति चेन्न। एवं तर्हि भिन्नानुमानेकत्वेकत्वमपि न भासेत। न च लाघवेपनीतसामग्रीप्रमाणमात्रसहकारिणीति न दु

अनु० पनीतं[illegible]इतिवाच्यं।तस्याअपिसत्वेनायाअजनकतयासत्प्रतिपक्षादिसामग्रीसहितायाएवजनकत्वाभ्युपगमप्रसंगात्।तस्याश्चप्रकृतेपिव्याप्त्या
दिसहिता[illegible]भावात्।नचव्याप्त्यादिसामग्रीसाहित्यमात्रंविवक्षितंनतुतद्व्याप्त्यादिसामग्रीसाहित्यंगौरवादितिवाच्यं।अत्रापितुल्यत्वात्।यथा
१८ चतत्रैकत्वभासतेतथाग्रेवक्ष्यतइत्यपरितोषादाह।अपिचेति।तुल्यमिति।तथाचोद्देश्यानुमितेरनाभासत्वात्तदाभासत्वप्रयोजकत्वेपि
नोपनीतभानपक्षेपिवाधोदोषः।उद्देश्यानुमितिप्रतिबंधकतयातदाभासताप्रयोजकतयावाहेत्वाभासत्वाभ्युपगमादितिभावः।तत्रवा
१०९ धकानामिति।तथाचवाधगताभासत्वमेवसामान्यतोदुष्टाभासत्वप्रयोजकत्वाद्दुष्टरूपोदोषइतिभावः।वाधस्येति।वाधगताभास
त्वरूपस्येत्यर्थः।वह्नित्वादिकमेवेति।वह्निरूपसाध्यइत्याद्यनुमानइतिभावः।तर्हीति।हेतौसाध्याभावव्याप्यसामानाधिकरण्येपिभासमानेपक्षे
रत्नुद साध्याभावव्याप्यवत्त्वस्यापिभानात्।सामानाधिकरण्यस्यतद्घटकरूपाधिकरणरूपत्वात्।अन्यथाविरोधिविषयत्वाभावादितिभावः।
अनैकांतिकत्वमेवेति।वस्तुतःसाध्याभावव्याप्यवद्बुद्धेरन्यथासिद्धत्वंनसाध्यव्याप्यवद्बुद्धेरन्यथासिद्धत्वंविना।अन्यथासत्प्रतिपक्षस्य
वतत्रदोषत्वप्रसंगात्।तथाचतद्देवतत्रदोषोनतुकरूपावाधः।तेनरूपेणकाचिदपिप्रतिबंधकत्वाकल्पनात्।अतएवतृणमणिमंत्रादि १८
वदुभयप्रतिबंधकत्वमितिभावः।हेत्वाभासान्तरतापत्तेः।पक्षेनिष्ठसाध्याभावस्येतिशेषः।तस्यत्वदभ्युपगतवाधान्तर्भूतत्वादितिभावः।स्व
रूपसतएवप्रतिबंधकत्वादिति।ज्ञानमात्रस्यार्थनिश्चयरूपत्वादितिसाध्याभावप्रमावाधइतिचमतेनेदंबोध्यं।अन्यत्रेति।प्रत्यक्षादावित्यर्थः।

अत्रैव तथादूषकत्वकल्पने गौरवमिति भावः॥ ॥ ज्ञानमात्रादिति। ज्ञानमात्रस्यार्थनिश्चयरूपत्वे प्रामाण्यग्राहकवैयर्थ्यं। भ्रमत्वेनापि ज्ञायमा-
नस्यार्थनिश्चयत्वप्रसंगश्चेत्यर्थः। तथा चेति। अत्र पक्षे साध्याभावनिश्चयायाविव्यभिचारज्ञानत्वेनैव दोषो वाच्यस्तदा तदुपजीव्यत्वे न पक्षे साध्याभा-
वज्ज्ञानस्य प्रमात्वनिश्चयोपेक्षणीयः। यदि च बाधत्वेनैव दोषस्तदा तज्ज्ञानाधिकबलरूपत्वेन सोप्यपेक्षणीय इत्याशयेनोपजीव्यत्वेनाधिकबलत्वे
न वेति विकल्पठकः। अधिकबलत्वमत्राधिकं च तद्बलं चेति कर्मधारयो न तु बहुव्रीहिः। तेनाधिकबलत्वस्य प्रमात्वनिश्चयधर्मत्वलाभ इत्यवधे-
यमित्यपाकुः। व्यभिचारः। व्यभिचारनिश्चयः। उपजीव्यत्वादिति। ननु पक्षे साध्याभाववज्ज्ञानस्य प्रमात्वं साध्याभाववत्साध्याभावप्रकारक-
त्वं। तथा च तन्निश्चयोपि पक्षे साध्याभावनिश्चय एव। अन्यथा पक्षनिष्ठसाध्याभाववत्त्वांशविषयत्वाभावे तस्यानुमितिविरोधिताया अ-
संभवात्। एतेन यत्र विशेष्यावृत्तिप्रकारकत्वादिरूपप्रमात्वग्राहाद्धिकबलत्वं तत्र व्यभिचाराविषयत्वमित्यपास्तं तथासति विरोधि-
विषयत्वेन प्रतिबंधकत्वासंभवात्। तस्मात्तस्यापि साध्याभावसहचरितहेतुविषयतया व्यभिचारज्ञानत्वेनैव दोषत्वमुपेयं। ननु सा-
ध्याभावज्ञानप्रमात्वज्ञानत्वेन। तथा प्रतिबंधकत्वाकल्पनात्। तज्ज्ञानस्यैव व्यभिचारज्ञानतयोपजीव्यत्वस्याभावात्। यदि तु तन्निश्चये हे-
तुर्न भासते तदाऽसिद्धिरेवेति चेन्न। यत्र परामर्शानन्तरं पक्षे साध्याभाववज्ज्ञानस्य प्रमात्वग्रारणांशद्वेन वा तज्ज्ञाने तत्र तस्य हेतुविषयतया
व्यभिचाराविषयत्वात्। न च तदाऽसिद्धिसांकर्यमेवेति वाच्यं परामर्शस्य हेतुविषयकस्य तदानीमपि सत्त्वेन तद्दसंभवात्। किंच। यत्र

अनु० दौतज्ज्ञानस्य तत्त्वेनैव प्रतिबंधकत्वकल्पनाद्व्यभिचारादिसांकर्येऽपि नादोषत्वं। मणिमंत्रवदुभयोरप्यन्यत्र प्रतिबंधे क्रमसामर्थ्यत्वेन विनिगमकाभा-
११० वात्। अपि च। परामर्शोत्तरकालीनस्यानुमानस्य यदि निवारकत्वेन साक्षात्प्रतिबंधकत्वं कल्प्यते तदा तदुत्पत्तिव्यवहितोत्तरक्षणे विनश्यदवस्थपराम-
ना र्शेनानुमितिजननेऽपि नापत्तिः। व्यभिचारज्ञानस्य परामर्शविघटकस्य तस्मिन्क्षणे किंचित्करत्वात्। न चापरामर्शोत्तरक्षणे व्यभिचारज्ञानावकाशोऽपि।
अव्यभिचरितसामानाधिकरण्यरूपव्याप्तिविषयकपरामर्शस्यैव व्यभिचारग्रहप्रतिबंधित्वात्। भावाभावज्ञानयोरन्योन्यप्रतिबध्य-
११० प्रतिबंधकभावदर्शनात्। यत्र च पक्षतावच्छेदकसाध्यसामानाधिकरण्याभावग्रहस्य वह्निमान्निर्धूम इत्यादौ पक्षीयवह्निमत्त्वविरहग्रहस्य वा
याप्याभावग्रहत्वेनानुमितिप्रतिबंधकत्वं तत्र ज्ञाने हेतुविषयत्वेऽपि साध्यतावच्छेदकावच्छिन्नसाध्याभावसामानाधिकरण्यरूपव्यभि-
चारविषयत्वासंस्पर्शो व्यभिचारासंकीर्णत्वात्। एतेन पक्षे साध्याभावज्ञानप्रमात्वस्य ज्ञानेन प्रतिबंधेन। तस्य परतो ग्राह्यत्वात्। किं त्वनु-
८५ मानेन। न च पक्षनिष्ठसाध्यव्याप्यवत्त्वग्रहेणासत्यपि पक्षे तत्साध्याभाववत्त्वधीरित्यतस्तत्प्रामाण्यस्य ग्रहे कथं समर्थं स्यात्। न चानुमानयोः
पक्षभेदे कथं सत्प्रतिपक्ष इति वाच्यं। विषयविरोधस्य तंत्रत्वेन पक्षभेदस्यातंत्रत्वादिति निरस्तं। सत्प्रत्यादिरूपस्यैव प्रमात्वग्रहस्य संभवात्। ११०
अत्रेदं चिंत्यं। भवतु बाधस्य व्यभिचारासांकर्यं। तथापि तत्प्रमात्वज्ञानं न प्रतिबंधकं। मानाभावात्। विरोधिज्ञानस्य सत्प्रतिपक्षादौ त-
था प्रतिबंधकत्वाकल्पनाकल्पनात्। किंतु स्वरूपसत्साध्याभावज्ञानमेव। नन्वेवं पीतत्वभ्रमानंतरं शंखत्वादिनाऽपि तदनुमितिर्न स्यात्।

नचाप्रामाण्यशंकाशून्यं तज्ज्ञानं प्रतिबंधकं। तच्छंकायास्तत्रोत्तेजकरूपत्वात्। साध्यज्ञाने सिसाधयिषावत्। पीतत्वभ्रमस्याप्रामाण्यशंकास्कंदित
एवा। अन्यथाऽपीतत्वानुमितेरनुत्पत्तेरितिवाच्यं। एवं हि पीतत्वज्ञानेऽप्रामाण्यसंदेहोपि न स्यात्। तस्यापि शंखे पीतत्वाभाववत्त्वसंशयपर्यवसन्नतया
तत्पूर्वं तदनास्कंदितत्वेन पीतत्वज्ञाने नैव निवर्तनीयत्वात्। एवं वाप्रामाण्यानुमितिरपि न स्यात्। तस्मादनन्यगत्या प्रमात्वग्रह एव प्रतिबंधक
इति चेन्न। अप्रामाण्यग्रहसामग्र्या अप्युत्तेजकरूपत्वात्। उत्तेजकत्वप्रतिबंधकत्वयोः फलबलकल्प्यत्वात्। तथा च तत्संवलितस्य साध्याभाव
ग्रहस्य प्रतिबंधकत्वमतो नोक्तदोषलेशावकाशः। न च तादृशसाध्याभावग्रहापेक्षया तत्प्रमात्वग्रहस्य लाघवात् प्रतिबंधकत्वं तस्याभावादिघटि
तत्वादितिवाच्यं। तस्य गुरुत्वेप्यावश्यकत्वात्। अन्यथा साध्याभावज्ञानप्रमात्वज्ञाने यत्राप्रामाण्यशंकास्कंदितं तत्रापि अनुमितिप्रतिबंधापत्तेः।
न च तत्प्रमात्वज्ञानमपि प्रमात्वेन ज्ञानं प्रतिबंधकमिति शक्यं वक्तुं। अनवस्थाप्रसंगात्। एवं रजतत्वेनेदं रजतमिति ज्ञानेपि विशेषदर्शनेन पत्र र
जतत्वग्रहस्तत्रापि रजतत्वाभावग्रहस्याप्रामाण्यशंकास्कंदितत्वेनैवाप्रतिबंधकत्वे। अन्यथा रजतत्वग्रहानुपपत्तेः। ननु विरोधिविशेषदर्शी
नस्यांशप्युत्तेजकतया तत्संवलितस्याप्रतिबंधकत्वे। तथा सति बाधस्यानुमितिप्रतिबंधकत्वानापत्तेः। तृतीयलिंगपरामर्शरूपविशेषद
र्शनरूपोत्तेजकसंवलिततया तस्याप्रतिबंधकत्वात्। यदि चैवं तर्हि प्रामाण्यशंकास्कंदितस्य पीतत्वसमानाधिकरण्यशंखत्वज्ञा
नस्य व्यभिचारज्ञानत्वेनापीतत्वानुमितावप्रतिबंधकत्वाद्व्यभिचारज्ञानस्यापि प्रमात्वेनैव तस्य प्रतिबंधकत्वं कल्प्यतां। शंखत्वा

अयोगै॰

अनु॰ नुमितेनमुक्तत्वेनापीतस्यानुमानेचाप्रामाण्यशंका कोंनस्यमुक्तत्वाभावग्रहस्यस्वरूपासिद्धिज्ञानत्वेनाप्रतिबंधकत्वान्नज्ञानस्यापिप्रमात्वेनै
वप्रतिबंधकत्वंकल्प्येत।किंचायमयोगपेंवालिंगेनुमितिरूपव्याप्तिग्रहसामग्र्यनंतरंव्याप्यत्वासिद्धिनिश्चयस्तत्रतन्निश्चयस्यबाधत्वेनैवप्रतिबंध
११२ कत्वंवाच्यं।तथाचतत्प्रमात्वाग्रहात्तस्यव्याप्तिग्रहप्रतिबंधकत्वंनस्यात्।नस्याद्वहेत्वाभासता।तज्ज्ञानेसत्यनुमित्युत्पत्तेः।तथाचासिद्ध्यादिष्व
पितत्रज्ञानप्रमात्वमेवतत्तद्धेत्वाभासःस्यात्।तत्वपरामर्शविषयाभाववत्वेनसत्प्रतिपक्षसिद्धिस्वरूपेहोपिसाधुसमर्थितःस्यात्।यदिचसाध्याभा
।।। वग्रहस्यैवानुमितिविरोधित्वंतदाविरोधिसामग्रीत्वेनसत्प्रतिपक्षस्यानुमितिविरोधित्वंनस्यात्।ननुप्रमात्वेनागृहीतमपिसाध्याभाववज्ज्ञा
नंनप्रतिबंधकं।तद्ग्रहेविनाऽधिकबलत्वाभावादितिचेन्न।अन्यथासिद्धसाध्याभावज्ञानत्वेनैवतस्याधिकबलत्वात्।नहिप्रमात्वग्र
हाधीनमेवाधिकबलत्वं।अन्यत्रतथाऽदर्शनात्।किंतुस्वभावाधीनं।अतएवानुमानापेक्षयाप्रत्यक्षस्याधिकबलत्वेनतयोर्नसत्प्र
तिपक्षत्वं।वस्तुतस्तुविरोधिविषयत्वेसत्यन्यूनबलत्वमेवानुमितिप्रतिबंधकत्वेतंत्रंनत्वधिकबलत्वं।अन्यथासत्प्रतिपक्षज्ञानम
पिप्रमात्वेनागृहीतंनतत्प्रतिबंधकंस्यात्।नहिसंभवतिविरोधिविषयत्वाविशेषेपिसाध्याद्देवविरोधिविषयंसाध्याभावज्ञानंतत्प्रति
बंधायप्रमात्वज्ञानमपेक्षतेनपुनःपरंपरयाविरोधिविषयंसाध्याभावव्याप्यवत्वज्ञानमिति।नचतदपिगृहीतप्रामाण्यमेवप्रतिबंधकमि ११२
तिवाच्यं।एकत्रविरुद्धोभयव्याप्यज्ञानेप्रमात्वग्रहस्यासंभवात्।अपसिद्धांतात्।अतएवयदिसाध्याभावज्ञानमुक्तरूपंबाधनिश्चयःस्या

तदासत्त्वानि पक्षस्थलइव नैकस्मिन्नपि फलोदयः स्यात्। विरोधिज्ञानविधमा[illegible]याया अविशेषात्। तथा च बाधेनाधिकबलत्वमसमहेतो विरुपपित्वा
सप्रगतमित्यपास्तं। उक्तरूपत्वेनैव बाधस्याधिकबलत्वात्। ननु यदि साध्याभावज्ञानं स्वरूपसदेवानुमितिप्रतिबंधकं तदा तद्धेत्वाभासो न स्यात्।
ज्ञायमानप्रतिबंधकस्यैव हेत्वाभासत्वेन ग्रंथकृदभिमतत्वादिति चेत्। अहष्टत्वात्। पक्षनिष्ठसाध्याभावस्यैव बाधत्वात्। तस्य च ज्ञायमानप्र
तिबंधकत्वात्। अत एव बाधो हि पक्षविषयापहार इति सिद्धान्तप्रवादोपि। अनयापरामर्शानंतरमप्रामाण्यशंकाशून्यसाध्याभावग्रहे
प्यनुमितिः स्यात्। न च तत्त्वमात्रग्रहादेव तत्रानुमितिप्रतिबंध इति वाच्यं। तत्त्वमात्रग्रहस्यानुमितिरूपतया पक्षज्ञानेपरामर्शाद्यधीने
तयाविलंबितत्वेनानुमितिसामग्रीबलवत्तया चानुमितेरेवोत्पत्तेः। अत एव शब्दादौ न तथा दर्शनादित्यप्यसंगतं। उक्तयुक्त्या तत्रापि भ्रमात्
ग्रहस्याप्रतिबंधकत्वात्। न चैवमनन्यसाध्याभावप्रमेतिज्ञानादनुमितिप्रतिबंधो न स्यादिति वाच्यं। तज्ज्ञानस्यापि साध्याभावविषयत्वनि
यतत्वेन तेनैव रूपेण प्रतिबंधकत्वात्। अन्यथा विरोधिविषयत्वाभावेनाप्रतिबंधकत्वादित्येनमेवापरितोषं हृदि निधायाह। पक्षधर्मेनावलेना
प्रसिद्धमिति। अत्र बाधपदं साध्याभावपरमतो नोक्तदोषावकाशः। अत्र च व्यभिचारादिभावादेव बाधस्य न तद्भवप्रसंगांकर्यशंका स्यादत्र मिति
भावः। अत्र वदंति। प्रसिद्धस्य पक्षान्यवृत्तिसाध्यस्य सिद्धौ भ्रमरूपानुमितिः स्यात्। तथा च यवांकुरं प्रति कलमत्वे बीजस्येव भ्रमरूपानुमितिं
प्रति सत्परामर्शस्याकारणत्वादेव ततो न प्रसिद्धसाध्यानुमितिः। ननु बाधानां अन्यथा समानप्रकारकज्ञाने सेव विरोधित्वोक्तित्वेन

अनु रूपाणां बाधानवगमात्प्रसिद्धापि वह्नित्वेन पक्षे भासे तैवापक्षान्यवृत्ति पक्षे साध्यं नास्तीत्यादिरूपबाधस्य भिन्नप्रकारकत्वात् न च समानप्रकारकत्वे
नबाधस्य प्रतिबंधकत्वमेवेति वाच्यं। एवंहि निर्वह्निपर्वते पक्षान्यवृत्तिर्वह्निरत्र नास्तीति ज्ञाने लिंगपरामर्शेनुमितिर्नस्यात्। पर्वतीयव
११२ ह्नेरभावात्। पक्षातिरिक्तवह्नेर्बाधितत्वात्। न चेष्टापत्तिः दृश्यमानप्रवृत्त्यादिविरोधात्। तथा च तत्रानन्यगत्या तादृशवह्निबाधमवधू
यवह्नित्वेन स्फोरणाबाधित एव पक्षातिरिक्तवह्निर्भासत इत्यभ्युपेयं। तस्मात्सत्स्थलेपि न तादृशबाधस्य प्रतिबंधकत्वं किंतु तादृशसाध्य
112 विषयकानुमितेर्भ्रांतत्वनियमेन तत्कृतनकदोषस्य बाधयथार्थपरामर्शस्य तत्राभावान्न तदनुमितिरितिमेवं। अयथार्थपरामर्शस्य दो
षत्वाभावात्। अन्यथाऽब्धिकर्तृके घटे कार्यत्वेन सकर्तृकत्वानुमितिलोपवभ्रमेण एककर्तृविषया भ्रांता न स्यात्। दोषाजन्यत्वात्।
प्रमावस्यात्त्वगुणाजन्यत्वात्। वह्निमति पर्वते वाष्पे धूमभ्रमाज्ज्ञायमानानुमितिर्भ्रांता वस्तुतो शेपि स्याद्दोषजन्यत्वादेव। अत एव न
यथार्थपरामर्शस्य गुणत्वं॥ गंधप्रागभावावच्छिन्नाष्टपृथिवी गंधवतीत्यत्र बाधानवतारदशायामनुमितेर्भ्रांतत्वानुपपत्तेश्चातस्माद्
बाधितत्वभ्रमादयुणाः। तद्रुमस्तु दोषः। नन्वेवं प्रसिद्धवह्नेरबाधितत्वभ्रमाभावादेव पर्वते न भानं ननु बाधादिति वाच्यं बाधस्य तत्रोपजी ११२
व्यत्वात्। अन्यथा व्यभिचारज्ञानादेरपि प्रतिबंधकत्वं न स्यात्। तस्मिन्नति परामर्शाभावादेवानुमितिप्रतिबंधात्। न चाबाधितत्व
ज्ञानस्यानुमितिजनकत्वे मानाभावः। बाधज्ञानस्यैव प्रतिबंधकतया तदभावस्यैव हेतुत्वात्। यत्तु ताबाधितत्वज्ञानस्य साध्यग्रहपर्यव

सन्न तयासिद्धसाधनापत्तेरिति वाच्यं। संशयनिश्चयसाधारणस्यैव योगपत्ज्ञानवत्कारणतानभ्युपगमात्। गुणानुरोधेनैवतज्ज्ञानकारणत्वक
ल्पनात्। अन्यथा योगपत्ज्ञानस्य शाब्दज्ञानप्रतिबंधकतया तदभावस्य कारणतापत्तौ योगपत्ज्ञानकारणतानुपपत्तेः। अभावकारणत्वापत्ते
या भावकारणत्वस्य लघुत्वाच्च। नच प्रत्यक्षेनैव स्वाभिमतज्ञानस्याकारणत्वाद्बाधज्ञानाभावस्यैव प्रतिबंधकाभावतया कारणत्वकल्पना
द्ज्ञापितत्वेति वाच्यं। तत्र प्रत्यक्षमात्रे वा धस्यैव प्रतिबंधकतया तदभावस्य प्रत्यक्षे प्रति कारणत्वस्य कल्पनेति वाधज्ञानसामान्याभावस्यानु
२८ मितिप्रतिहेतुत्वमत्रैव कल्पनीयं। तथा च लाघवावतारात्। अत एवाबाधितत्वबाधनायनिगमनमिति सिद्धांतोपि। तद्धेत्वानभ्युपग
मेपि पक्षतावच्छेदकावच्छेदेन पक्षे ज्ञाप्याभावेति लिंगस्य दोषत्वं। तद्धेतिचलिंगज्ञानस्य गुणत्वं। तथा च प्रसिद्धानुमितिजनकदोषस्या
सत्वाद्बाधादेव प्रतिबंधः। समानविषयत्वेन व ज्ञानयोर्ज्ञानः स्वविरोधावस्यकत्वान्न समानप्रकारकत्वेनापि विरोधित्वं। गौरवात्। अन्य
या पक्षे पक्षीयः पक्षातिरिक्तवृत्तिश्च वह्निर्नास्ति वह्न्येपर्वतवृत्तित्वं नास्तीत्यादिवाधानंतरमनुमितिः स्यादेव वह्नित्वप्रकारिका। वाधस्य
भिन्नप्रकारत्वेनाविरोधित्वात्। न चैवं मानुमितेरनुत्पत्तिः। पक्षानमवृत्तिरेव वह्निरित्यवधारणेऽस्यापत्तेः। तदनवधारणो वह्नित्वेनह्य
नस्यतत्त्वारोपात्। वह्नित्वेन ज्ञाते च पर्वतत्वादिकं संभवत्येवाज्ञानं च संशयादिसाधारणं। वह्निमत्वेन ज्ञानस्याभेदारोपाद्वा। पर्वतस्यापि व
ह्निमत्वेन संशयविषयत्वात्। यत्तु दोषप्रावल्येन बाधमवधूय भ्रमोत्पत्तेः पीतः शंखः इत्यादाविव निर्णयानाधितो दोषवलाद्वह्निर्भासत इति

रं

अनु० तन्नातथासतिबाधस्यप्रतिबंधकत्वेमानाभावात्तस्मिन्सत्यप्यनुमितेः। नाहृशदोषाभावादेवचसत्पक्षलेशसिद्धाभानोपपत्तेः। अत एवपीतश
शंखइत्यत्रापीतत्वानुमितिरूपबाधस्याप्रतिबंधकतयाप्रत्यक्षबाधत्वेनप्रतिबंधकत्वंकल्प्यते। असाधकतायांचहेत्वरूपरागेणायद्यप्यस्यलिंग
११३ त्वंप्रतिबंधकेचनद्वैयर्थ्यंतथापियावद्विषयत्वेनदोषत्वंतावदेतन्मात्रेणाहेतावस्त्येवेत्येवास्यतथात्वमितिविभावनीयं॥ ॥ ॥ ॥कसांतरमाहसा
113 भाववन्मात्रसहचारइति। साध्याभाववन्मात्रेसहचारः। हेतुसाध्याभावपारितिशेषः। क्वचित्साध्याभाववन्मात्रसहचारइतिपाठः। सचसुगमएव। प्रा
वंचेति। एवंचरूपप्रागभाववद्भिन्नोघटोरूपवान्घटत्वादित्यादौपक्षतावच्छेदकीभूतधर्मिणोरूपसामान्यात्यंताभावाभावात्व्यभिचारइतिप्रागभावस्
पसाध्यविरहज्ञानमेवतत्रानुमितिप्रतिबंधकं। अतोबाधएवतत्रदूषणमितिभावः। ननुरूपप्रागभावविशिष्टोघटादिरत्रपक्षः। नत्रचरूपा
त्यंताभावोनतुप्रागभावः। विशेषणांशेरूपादेःसदैवासत्त्वात्। तथाचतत्रव्यभिचारएवेतिचेन्न। प्रागभावपदस्यस्वसमयपरत्वात्। अतएवानु
पदमेवतथाविभावयिष्यति। तथाचतत्समयरूपेरूपप्रागभावएव। अतोनव्यभिचारः। अतएवरूपप्रागभावविशेषणेघटत्वादेरभावाद्वि
शिष्टेस्वरूपासिद्धिरेव। तस्यचोपलक्षणत्वेसिद्धसाधनमेवेतिनिरस्तं। तत्समयस्यविशेषणत्वान्न। तत्रचघटत्वादेःसत्त्वात्। यद्यपितत्स
मयरूपविशेषणेपिरूपांतरसत्त्वाद्विशिष्टमपिनबाधः। किंतुसिद्धसाधनमेवतथाप्येकस्यकस्यापिरूपस्याविशिष्टत्वान्नेतितत्रबाधः। तद्घटरूपे ११३
॥नतद्वारीयरूपसाधनेनतथाप्यप्रतीकारस्येतिभावः। ननुसाध्यात्यंताभाववद्वृत्तित्वंनव्यभिचारः। इत्यादेनसंयोगानुमानापत्तेः। नचसाध्य

तद्विशिष्टसाध्यः

तावच्छेदकावच्छिन्नतद्वत्त्वं ताभाववद्गामित्वं तदिति वाच्यं। एतद्दूषणत्वादिना संयोगविशेषानुमानापत्तेः। न च प्रतियोगिसामानाधिकरण्यमपि विशेषणं त
र्हि तादृशाभाववद्गामित्वमेव व्यभिचारोस्तु किमर्थं ताभावपर्यन्तग्रहणेन। रूपप्रागभावस्य प्रतियोगिसमानाधिकरणतया तावतापि पक्षे व्यभिचा
रशंकावारणाद् इति चेन्न। अप्रतताभावपदस्यैव तन्निरासपर्याप्तता। न च रूपप्रागभावसमयविशिष्टघटे कदाचिदपि रूपानुत्पत्तेः प्रतियोगिसमानाधिक
रणसाध्याभावसत्त्वाद्व्यभिचार इति वाच्यं। एवं हि प्रथमक्षणविशिष्टघटे सर्वदैव गुणानुत्पत्तिप्रसंगसमानत्वात् तादृशसाध्याभावसत्त्वाद्व्यभिचारप्रस
गेन द्व्याप्त्या नापि गुणानुमानप्रसंगात्। तस्माद्विशेषान्तरावच्छेदेन तादृशसाध्याभावो न व्यभिचारप्रयोजकः। अतिप्रसंगात्। ननु रूपप्रागभाव
समयावच्छेदेन रूपसाधकाभावादेव न रूपानुमितिर्न बाधात्। न च पक्षधर्मतायाः पक्षतावच्छेदकविशेषणावच्छेदेन पक्षे साध्यसाधकत्वान्नद्वल
मेव तत्साधकमिति वाच्यं। पक्षधर्मता हि लिंगस्य पक्षवृत्तित्वरेव। सा च साध्यसामान्यव्याप्तिमतस्तस्य पक्षीयसाध्यविशेषं विनानुपपन्नेत्यतो
व्याप्त्या सह परामृश्यमाना पक्षसंबद्धं साध्यं साधयति न तु पक्षतावच्छेदकत्वेन उपादीयते तदवच्छेदेन साध्यसंबंधं। बीजाभावात्। तं वि
नातस्यानुपपन्नभावात्। तदवच्छेदेन पक्षसाध्यसंबंधं विना प्रकृते घटत्वादिहेतोर्व्याप्तिपक्षधर्मताया उपपन्नत्वात्। नात्र स्वभावादेव सा तत्साध
यतीति राद्धान्तनिर्देशमात्रत्वात्। तथा च पक्षधर्मताबलेन साध्यस्य पक्षतावच्छेदकधर्मसामानाधिकरण्यमर्थवशात्सम्पन्नं सिध्यति। न तु
तयोः पक्षे धिकरणेनावच्छेदेनापि हन्तो निर्व्यहत्येव। अत एव पक्षधर्मतानुपपत्तिनिरासमात्रं हि तयमेव साध्यं पक्षधर्मताबलात्सिध्यति

अनु० त्वन्यादृशमपीत्याचार्यचरणैरुक्तं। अत एव च परिमलेनाग्रहणोक्तं। उत्पत्तिकालीनोयं घटो रूपवान् घटत्वादित्यत्र हेतुर्वाधादेव दुष्ट इति। उत्पत्ति
कालीनस्यैव कथं चिद्रूपवत्वे न बाधावकाशः पक्षविशेषणेन तु तत्सामानाधिकरण्यं सिध्यतीति। अत एव पक्षधर्मताबलात्पक्षतावच्छेदकं मेसामा
११४ नाधिकरण्यं साध्यस्य सिध्यतीत्यत्राधिकरणं देशकालावुभावपि विवक्षितौ। तेन यदा यत्र पक्षतावच्छेदकं तदा तत्र साध्यं सिध्यति। अन्यथा तत्का
लीनत्वस्यार्थिप्रवृत्तिर्न स्यादितिपरास्तं। तत्कालीनसाध्यं विना पक्षताया उपपन्नत्वेन तादृशस्वभावाकल्पनात्। स्वकीयविवक्षामात्रस्याति
114 प्रसंजकत्वात्। तत्कालीनवह्निसिद्ध्यकालिकव्याप्तिग्रहाद्युपपत्तेः। न च यथा शब्द तात्पर्यवशेन कश्चिद्विशेषणविशिष्टवैशिष्ट्य
वेत्यन्वयवोधे हेतुरूपं तथानुमित्सावशादनुमितावपि द्वैविध्यमिति वाच्यं। सिसाधयिषायाः पक्षताशरीरनिष्पादकत्वे नान्यथासिद्ध
तयाव्यभिचाराच्चानुमितावहेतुत्वात्। न चानुमितिविशेषे तद्धेतुत्वे मानाभावात्। पक्षताया अहेतुत्वापाताच्चेति चेत्। अत्राहुः। समाना
स्यायं स्वभावो यद्वाधकं विना विशिष्टवैशिष्ट्यमेव ज्ञानं जनयति। अरुणाये त्यादिशब्दस्थले तथादर्शनात्। तथा च ज्ञानसामान्यसाम
ग्रीबलादेव तदवच्छेदेनानुमितिः स्यादिति न बाधो दोष इति। अवच्छेदक इति। एतच्च यथाश्रुतमभिप्रेत्योक्तं। प्रागभाव एतस्य स्वसमय
परत्वे सिद्ध्यसंभवादिति द्रष्टव्यं। नन्वीति। सिद्धसाधनं स्यात्तु ह्यस्य सिद्धौ भवति। उद्देश्यं चात्र प्रागभावसमयावच्छेदेन घटरूपवत्त्वं। न ११४
त्सिद्धिश्चेत्तदा प्रागभावप्रतियोगिनोरेककालसत्तापि स्यादित्यर्थः। प्रागभावस्य प्रध्वंसस्य प्रागभावप्रध्वंसतत्प्रतियोगीत्वप्रागभावस्य

विषय क ४

ध्वंसत्वं तियोगिनो नयोरित्यर्थः। अन्यथैवेति। एकवृत्तित्वाभावमात्रेणापरंपरागुच्छेदेनापि द्वित्वाभ्युपगमे संयोगादित्वदत्यंताभावयोरव्याप्यवृत्तित्वं
भज्येतेत्यर्थः। ननु साध्याभावविशिष्टे यत्र संशयापरिग्रहेण पक्षताविरहात्पक्षासिद्धिरेव दोषः स्यान्न बाध इत्यत आह। असिद्धेरपीति। असिद्धेः। पक्षा
सिद्धेः। तथा चोपजीव्यत्वाद्बाध एव तत्र दोषो न त्वसिद्धिरिति भावः। इदं च प्राचीनमतेन। वस्तुतो बाधेपि न पक्षताविरह इति ध्येयं। सिषाधयिषितेति।
एतदपि संप्रदायमतेनैवाध्येयं। अन्यमते तस्य साक्षादनुमितिप्रतिबंधकत्वेपि ज्ञायमानस्य न प्रतिबंधकत्वमिति न हेत्वाभासत्वं। ननु तथापि साध्य
हेत्वाभासोस्तु। तस्य ज्ञायमानस्य प्रतिबंधकत्वादिति चेन्न। यन्निश्चयोऽस्यानुमितिप्रतिबंधकोपयन्नान्यदपेक्षते तस्यैव हेत्वाभासत्वात्। साध्यं च न तथा।
तन्निश्चयेपि तदर्थं सिसाधयिषाविरहात्पक्षताया अन्यथा श्रवणानंतरं मननाभावप्रसंग इत्याकूतं। ननु चेति। तथा च रूपप्रागभावादिरू
पो बाधोपि न दोष इति भावः। रूपं न निश्चयादिति। विशेषदर्शनेनेति शेषः। प्रत्यक्षप्रमेति। अप्रामाण्यशंकास्कंदितप्रत्यक्षत्वमित्यर्थः। अनुमितेति
त्विति। प्रमाया हेतौ वाप्तं वा निप्राप्येण। अप्रामाण्यशंकाग्रहस्य भावज्ञानमात्रमेव भ्रमाभ्रमसाधारणं ननु प्रत्यक्षत्वमपि जनकत्वं त्रमि
त्यर्थः। बाधस्य यद्यपि साध्याभावसाध्यप्रागभावसाध्यध्वंसवैधाभावसाध्यवद्भिन्नत्वादिरूपतयानेकत्वं तथापि प्रतिरोधानतिरिक्तसा
त्वादनुमितिप्रतिबंधकत्वावच्छेदकत्वेन स्वरूपसतानुगतत्वात्सव्यभिचारवदेक एवेति बोध्यं। आगमेनेति। नारस्य छ
द्धिसत्वेहं सचेलो जलमाविशादित्यादिनेत्यर्थः। राजेति। स्वाराज्यकामो राजा राजसूयेन यजेतेति श्रुत्या क्षत्रियकर्तृकत्वतावोधिकया।

अनु० र्था ज्ञानाभावाप्रकरणतानिषेधादि त्यर्थः॥ ॥०॥ ॥महाल्पत्वाज्ञेयमिति॥ ॥०॥ ॥उपोद्घातसंगतिमाह हेत्वाभासानामितितथा चासाधकतासाध
नत्वाज्ञानोत्तरं तत्परिचये हेत्वाभासनिर्वचनमेव निरर्थकमापद्येतेति भावः किमिति तथा चासाधकतासाधकत्वं न स्यादुत्तरत्वमिति भावः परेति। परे
११५ णायामनुमितिमुद्दिश्यप्रयोगः कृतः सोऽस्याप्रतिबंध इत्यर्थः। तथा च यमिति तथा च तदर्थमिदमनैकांतिकमित्येवोद्भावनमिति भावः द्वितीयं त्विति इदमसा
धकमनैकांतिकत्वादितिक्रमेण लिंगत्वाभिधानादित्यर्थः ननु साधकतासाधनमुद्दिश्य मिलित्रैवास्य पदस्यत आह प्रतिबंधकत्ववदिति दूषणत्व
संभवः अपकर्षसूचकत्वसंभव इत्यर्थः। तथा च कथकसंप्रदायानुरोधात्स्वतंत्रताशङ्कि स्थापनार्थं तदुद्देश्यमिति भावः पक्षधर्मेति। पक्षेऽपि असाधक
तानुमाने वितन्दुडुलादित्यादिकमेव प्रयोज्यं न तु पक्षधर्मतापि धूमवत्त्वादित्यत्रैवानाकांक्षितत्वात् तथापि विरुद्धोऽय ।तायां इति ।मिति प्रयमा
द्भावनमभिप्रेत्येदं दूषणं विरुद्धं वेद्भिल्लरूपनपेक्षत्वात् पक्षधर्मताप्रदर्शनापकार्षे एवेत्यपाकुः। अबाधितत्वादिबाधनापकि मिति निगमनं नकि
यत इति तु वितंडके चित्तुदाहरणं विनां चत्वारो वयवाः कर्तव्याः एवं पक्षधर्मतापा एवैतस्यैवकारव्यवच्छेद्या व्याप्तिरित्याहुः अपि केति अनाकांक्षि
ताभिधानापत्तेरित्यर्थः समयेति एतेन सामेकत्वप्रदर्शने नयत्र न समयस्तत्रासाधकतासाधनं न क्रियत इति सूचितं आवश्यकत्वादिति निग्रहस्य राम
यावादिप्रतिवादिनोस्तादृशसमयकरणमेव न संभवति असाधकताव्याप्तेन दूषणेन तत्साधनासंभवादिति भावः यस्त्विति व्याप्तिमात्रानंगीक
र्तो चार्वाकादिरित्यर्थः वायस्येति दूषणस्येत्यर्थः बाध्यते अनेनेति यत्सतेः दूषणत्वमिति असाधकत्वं व्याप्यत्वमित्यर्थः। कर्तव्य एवेति एवकार। ११५

भिन्नाक्रमः तथा च तत्प्रतिदूषणत्वं प्रसाध्यैव पंचावयवप्रयोगः कर्त्तव्यः विवादपदं साध्यासाधनायेति शेषः तथा चासाधकतानुमानेतत्रापि नोदाहर
णं विषयमिति भावः स्वतोपि परस्य कदाचित्परामर्शो संभवेनाह कर्त्तव्यतायां यथा पंचावयवप्रयोगः क्रियते तथा असाधकतानुमानेपि पर
षेणास्वव्यापारस्य कर्तुमुचितत्वादित्याह फलितेति कथेति तथा चापसिद्धांतमपि पंचावयवप्रयोगस्तवचनकार्यमित्यर्थः तेन विरुद्धादिनात्वेन
विरुद्धत्वादिनेत्यर्थः नन्वेतत्काल इति दूषणज्ञानकाल इत्यर्थः तथा च तत्कालीनं साध्यविशिष्टपक्षज्ञानाजनकत्वमसाधकत्वमिति विशेष
णत्वस्यापसिद्धांतेत तयातत्कालीनस्योपलक्षणत्वपक्षमात्रं दूषयति सद्धेताविति सद्धेतोः सत्प्रतिपक्षत्वे असाधारण्यस्य संशयो
त्पादकत्वपक्षे साध्यांशे तस्यापि प्रमात्वात्स्यादोरेवेति भावः साध्याप्रसिद्ध्या व्याप्तिरित्यपि बोद्धव्यं अप्रसिद्धसाध्यके असिद्धा
दावव्याप्तिरित्याह साध्याप्रसिद्धाविति इदमुपलक्षणं अप्रसाधकत्वेपि तदप्रसिद्धिरित्यपि द्रष्टव्यं घटो भिन्नो यो ज्ञो द्रष्टा इत्यादौ स्व
रूपासिद्धेश्च कृतसाध्यानैकान्तिकाप्रसिध्या असाधकत्वं नस्यादित्याह केवलेति इदं चोपलक्षणं यत्साध्यं निरूपितं तत्प्रतिपक्षादिकं नज्ञा
तं तत्साधके अप्रसिद्धसाध्यके वा अप्रसिद्धादावव्याप्तिरित्यपि द्रष्टव्यं अथ तत इति अनैकान्तिकाद्यन्यतमत्वे साध्ये अनैकान्तिकत्वस्य
साध्यांशस्याप्रसिद्धेरित्यैव साधनादित्यर्थः अयतत्रासिद्धत्वेनाह साध्येति असिद्धत्वे नसाध्याविशेषणत्वमित्यर्थः यद्वा ननु नानैकान्तिका
द्यन्यतमत्वं [illegible]नीयं किं तु प्रत्येकं अनैकान्तिकत्वं तत्र तदेवासाधकत्वं यत्र चासिद्धत्वं तत्र तदेवासाधकत्वमिति न केवलान्वयिसाधनेऽने

अ॰टि॰प्र॰ कांतिकत्वापत्तिश्चाद्यादिकोपि दोषद्वयमत आह । अंशतइति असाधकत्वनिर्भयवनस्पतिदोषः एवंसति सिद्धसाधनं साध्याविशेषश्चेत्यर्थः यत्किंचि
अत्र एतत्कालपदेन व्यभिचारादिधीकालोभिनक्ति तः अत एव तद्रूपीयत्वमपि विशेषणं तेन सद्धेतुसत्प्रतिपक्षादौ पुरुषांतरीयतादृशप्रमा
जनकत्वान्तान्ताव्याप्तिः अत एवाग्रे प्रतियोग्यप्रसिद्धिवसतियद्यप्येतत्कालस्याभावविशेषणं तेनाप्रसिद्धिस्तथापि जलत्वहेतौ भिन्नानिसाधोप
ह्रविषयता दृश्या प्रमापाप्रसिद्धिरेवेति व्यधिकरणयोरितिएतद्व तत्साध्यव्याप्यहेतुत्वं तत्परंपदानंतन्तद्रूपीयतादृशसाध्यप्रमाकरणं त
११६ द्वाबोधकं वाधेतदपिनसंभवतीति ध्येयं तन्मतेमेव दूषयति तन्नेतितत्र मत्व बत्तेति विरुद्धोभयव्याप्तिपक्षधर्मताविषयते त्यर्थः तद्धर्मस्येति
एकविरुद्धोभयव्याप्यपक्षधर्मयोरभावान्न ज्ञानस्य च मतत्वनियमादित्यर्थः हेत्वाभासलक्षणं तथयाशुस्छं तथोक्तधर्ममात्रस्येति व्यमा
116 द्वावपि व्यभिचारणमादाय तयोरन्यतरांगवैकल्यमिति प्रमापाः सत्वादनुमानमात्रोच्छेदापत्तिरित्यर्थः नन्वन्यतरांगवैकल्यज्ञानं सत्प्र
तिपक्षयोरसिद्ध्यादिसंशयाधायकत्वेन दूषणं स्यादेव प्रमाणेनतज्ज्ञानं न संशयाधायकं विशेषदर्शनात्तद्दर्शनदशायां तत्राप्रतिज्ञा
नानुमितिप्रतिबंधकत्वस्य चैत्वादिसपरितोषादाह अन्यतरेति अयतिपद्यपि हेत्वाभासत्वनियतमसाधकत्वं ज्ञानेनास्ति तथापि तादृशज्ञा
नविषयत्वमसाधकत्वमितिमंतव्यं एतदितिएतद्धेतुविषयकानैकांतिकज्ञानत्वादित्यर्थः अत एवात्र दूषीये त्वापि हेतुविशेषणं तेनप
रकीयतज्ज्ञानेनव्यभिचारः केचित्तत्रसाधकत्वान्नव्यभिचारः तस्यापिप्रतिबंधकत्वानच तथासति तत्सत्वे अनुमितिर्नस्यादिति वाच्यं । अत्र राम
११६

पुरुषपरकायतादृशज्ञानस्याभावादित्याहुः अत्र च मते प्रकृतहेतोः प्रकृतसाध्यव्याप्यत्वस्य उभयसिद्धत्वाभावः तादृशसमयाभावादित्युदाहरणम
पि कार्यमेव अत एव तत्रेयं दृष्टांतमाह एतदन्यज्ञानवदिति नत्र पत्रानैकांतिकत्वानमन्यदा ननतानंतत्रदृष्टांता सिद्धिः तत्रसामान्यमाश्रित्य या
येणतत्त्वं भवादिति भावः साध्ये चैतत्पक्षके स्फुटेशासिद्धेपपक्षांतरे तस्यानुमितिप्रतिबंधकत्वादित्यवधेयं साध्ययेतिसाध्यविशिष्टत्वविशिष्ट
पक्षप्रत्ययेपीत्यर्थः एकेत्तिगात्वादि साधके मर्यः। अन्यतरत्वं भावत्वाभावत्वान्यतरत्वं लिंगलिंगतावच्छेदकं ननु भावाभावान्यतरल्लिंगत्वमि
त्यर्थः प्रतियोग्यप्रसिद्धेरितिव्याप्येपि न स्याप्तीतितद्धर्मीवह्नित्वमात्रीत्यर्थः साध्यव्याप्यत्वमेवेतिसाध्यव्याप्यत्वमेवानुमितिविषयत्वेत त्रतथा
च भावो भावो वा उभयथापि प्रमेयमित्यनुमितौ प्रमेयत्वमाप्यत्वमेव विषयः स्यान्न त्वास्येवेत्यर्थः वह्निव्याप्येति इदं चाभ्युपेत्यसमाहि
तं वस्तुतो वह्निव्याप्याभेदे भासमाने वह्निस्तद्व्यापकत्वेन भासते न नुकूटव्यापके वह्नित्वं भासते साम प्रीविरहात्सवधेयं नियम इति पक्षध
र्मता निश्चयविषयत्वादित्यर्थः तथा च येन रूपेण तादृशनिश्चयविषयत्वं तेन रूपेणानुमितिविशायत्वं साध्यमतः संदेहविषयीभूतभावत्वा मान
द्देनव्यभिचारः नियम इति तादृशज्ञानविषयोदासीनवत्त्वादिव्यभिचारवारणाय न तु तत्र पक्षधर्मताज्ञाने नियमेन भासत्वं द्रष्टादेर
पि। सर्वत्र तथात्वे पर्वतत्ववदित्यसंगतमिति चेन्न पक्षविषयत्वेन पक्षधर्मताज्ञानस्यानुमितिजनकत्वं तत्वस्य विवक्षितत्वात् तस्मान्नीतित्र
त्रापि यद्विषयत्वेन व्याप्तिज्ञानस्य कारणत्वं तत्वादिति भिवह्नित्वमिति न वक्ष्यारो व्यभिचारः एवमग्रेपि कयुक्त्यातरमाह किं चेति अत्र च मते

अ.भकु. एवंज्ञानेनोपनीतंपर्वतादिकमप्यनुमितौभासतएवयुक्तेस्तौल्यात्पूर्वकालेन्द्रकारणीभूतज्ञानविषयत्वेनतद्विषयत्वमितितत्रनतद्विषयत्वमितिमि
तव्यंशकतेविषयेतिनचरमकारणस्यापिप्रतिबंधकसत्त्वावान्नफलजनकत्वंस्यादितमताहप्रमरुसामग्रीतइतितथानानुमितस्यनं
तरमेवानुमितिःस्यान्नानुव्यवसायादिरूपविषयांतरस्तेचारस्यार्थःसिद्धतिपक्षताविरहादितिभावः। यत्तुअनुमितौलिंगाभानेधूमाद्व
११७ ह्निमनुमिनोमीत्यनुव्यवसायोनस्यादुपनायकाभावादितितन्नुक्तंज्ञानांतरोपनीतस्यापिधूमजन्यत्वस्येवधूमस्यतद्विषयत्वसंभवात् अ
नुयालिंगज्ञानपक्षेपिपरामर्शेणाधूमजन्यत्वानुपस्थापनात्तादृशानुव्यवसायासिद्धिप्रसंगान्नचैवंवक्तुषात्रूपंपक्षधर्मीपदनार्थ
117 न.धिगच्छामीत्यनुव्यवसायपत्ताविष्टुःपरस्योक्तरूपशाब्दज्ञानविषयत्वापत्तिरितिउक्तमितिजन्यत्वाकोनसर्वांशसमीचीनासाम
ग्र्यासयाजनकत्वमुक्तंतथाचतमेवेत्यर्थः अस्तुतावदितिअत्रेदंचिंत्यंसंदेवात्रत्रयमसत्वेपिसनानुमितिविषयःतस्यवह्निव्याप्यत्वेनापराम
शात्तदुपनीतत्वेनचलिंगाभानानुपपत्तेरन्यथातस्यसंदेहत्वेनासंग्राह्यत्वात् तथाचबाष्पस्यधूमत्वेनपरामर्शे विषयत्वात्
तदुपनीतस्यतस्यधूमत्वेनानुमितिविषयत्वंअन्यथापरामर्शोपितत्रस्यात्तोनस्यात्तदंशेकथमनुमितेःसत्यत्वमितिअत्रकेचिल्लिंगा राम
स्यानुमितौभानेमानाभावएवनचोक्तानुमानंतथाअप्रयोजकत्वान्नापिकारणीभूतज्ञानेभातत्वंतथाअप्रयोजकत्वादेवनन्वेकवि ११७
शेषणवत्तयाज्ञानेविशेषणांतरधीसामग्रीतएवविशिष्टवैशिष्ट्यप्रतीतिरित्युक्तंइतिचेन्नप्ररूविषयकसाध्यानुमितित्वेनकार्यतावाप्यत्व

कारकपक्षधर्मताज्ञानत्वेनकारणतातथाचलिंगज्ञानंप्रतिस्वरूपायोग्यत्वात्परामर्शस्यततस्तज्जनतद्विषयानुमितिर्यथाप्रमरूपपक्षस्थितमपिशा
स्त्रबोधेनविषयस्तथाप्रकृतेपितद्बोधकान्नचलिंगविषयत्वमपिकार्यतावच्छेदकमध्येप्रविष्टंप्रमाणाभावादितिवदंतितन्नएवंहीश्वरानुमाने
कर्त्रैकत्वमपिनविषयःस्यादित्यक्तंस्वज्ञानदशायामितिविरुद्धत्वाघटितमहेत्वाभासोपाधिविशिष्टप्रमामिस्तथैःअतोनविरुद्धत्वादिभ्रमप्रमा
दायनसद्धेतावतिव्याप्तिःसत्प्रतिपक्षस्थलेचैयेनसंबंधेनयत्पातत्प्रमातयोक्तंहेत्वाभासलक्षणव्याख्यानावसरेतद्दशायांनोपलाणांकिंतुवि
लसाधनवति साध्यवत्त्वं दर्शयता उदाहरणेन प्रदर्शयता तेन तदभावो व्याप्यत्वासिद्धिरवच्छेदकत्वाभावे पर्यवसन्ने नीलधूमादौ नीलधूमे
धूमत्वरूपावच्छेदकांतरसत्त्वे नीलधूमत्वस्य तत्र घटितशरीरस्यानवच्छेदकत्वात् एवं च परामर्शविशेषविषयाभावत्वमपि समर्थितं भवतीत्या
हुः। अत्र वदंति संबंधितावच्छेदकलक्षणायां मातावच्छेदकत्वं यद्यनतिरिक्तदेशवृत्तित्वं तदा तन्नीलधूमत्वेप्यस्ति अथ तादृशधर्मांतरघ
१३३ टितत्वमपि तत्र विशेषणं तदा सर्वव्याप्तिलक्षणगौरवात् अनुमित्यहेतुत्वे तेन तदभावज्ञानस्य कप्रतिबंधकता तादृशधर्मांतराघटित
त्वादेरुदाहरणप्रतिपादयता ग्रंथकेनास्तीति न किंचिदेतदिति तस्मादिदमत्र तत्त्वं नीलं धूमे धूमत्वावच्छिन्नव्याप्तिसत्त्वेपि नीलधूमत्वा
वच्छिन्नव्याप्तिविरहो व्याप्यत्वासिद्धिः सर्वविशेषणावच्छिन्नव्याप्तिविरहो वा संबंधविरहो वेत्यन्यदेतत् एवं च ज्ञानगर्भहेत्वाभासलक्षणे
परामर्शविषयाभावत्वं वसंग्रहते न च नीलधूमत्वावच्छिन्नव्याप्य प्रसिद्धेः कथमेवमिति वाच्यं कस्यचिद्रिवारहनादिप्रतियोगिरूपविशेष
व्याप्तेरेव तादृशप्रसिद्धेः न च तादृशी व्याप्तिः नीलधूमे स्त्येवेति वह्नित्वावच्छिन्नप्रतियोगिकनीलधूमत्वावच्छिन्नव्याप्त्यभावस्य व्याप्य
त्वे पुनः सैव प्रसिद्धिरिति वाच्यं नीलधूमत्वावच्छिन्नव्याप्तिप्रतियोगित्वलक्षणव्यापकत्वाभावस्य वह्नित्वावच्छिन्ने व्याप्यत्वासिद्धिप
दार्थत्वात्तज्ज्ञानस्यापि प्रतिबंधकत्वात् समानविनिवेशतया व्याप्यत्ववद्व्यापकत्वस्यापि परामर्शविषयत्वेनोक्तव्यापकत्वाभावे परामर्श एम

र्थविषयाभावत्वस्यापि सत्वाच्च यद्वा धूमत्वावच्छिन्ने नीलधूमत्वावच्छिन्नव्याप्यभाव एव व्याप्यत्वासिद्धिः तस्यां नीलधूमत्वावच्छिन्ने सत्वे
नान्यधर्मावच्छिन्ने विरहादिति वस्तुतो वह्निनीरूपितधूमनिष्ठव्याप्तौ नीलधूमत्वं नावच्छेदकं किं तु धूमत्वमित्यभ्ययवादिसिद्धं अवच्छेद
कं च स्वरूपसंबंधविशेषात्मकं त्वभ्ययवादिनिर्वक्तव्यं अन्यथा गौरवेण नीलधूमत्वावच्छेदेन व्याप्यग्रहेऽज्ञानरूपासिद्धिरित्यपि
न स्यात् गौरवज्ञानस्यावच्छेदकत्वग्रह एव प्रतिबंधकत्वात् एवं च यत्र समानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकावच्छिन्नसा
मानाधिकरण्यावच्छेदकावच्छिन्नत्वं व्याप्तिस्तत्र यावन्नीलधूमत्वे तादृशावच्छेदकत्वाभावः परामर्शविषयाभावतया भवत्वसिद्धिः न वे
व्याप्तिस्तादृशावच्छेदकत्वगर्भत्वे मानाभाव इति वाच्यं व्यर्थविशेषणे व्याप्तिग्रहप्रतिबंधस्यैव तत्र मानत्वात् गौरवज्ञानस्यावच्छेदकत्वा
तिरिक्तव्याप्तिघटकपदार्थग्रहाप्रतिबंधकत्वात् तथा व्यभिचरिते व्याप्तिग्रहप्रतिबंध एवं व्यभिचारगर्भत्वे तत्प्रामाण्यं न च तत्र व्याप्तिग्र
हप्रतिबंधो न भवत्येवेति वाच्यं एवं सज्ज्ञानरूपाप्यसिद्धिर्न स्यात् तथा चैकापासिद्धिं परिहरतो द्वितीयापत्तिरिति सिद्धांतोऽपि भज्येत तस्मा
त्परिहरवानज्ञाज्ञानरूपासिद्धिं स्वीकुर्वतां व्याप्तेः अवच्छेदकगर्भत्वमिति रिक्तभ्रमत्वे नेति न तु ज्ञायमानतया प्रतिबंधकत्वाभावात्तया
पस्य कथं हेत्वाभासत्वं किं च तत्प्रयुक्तत्वं तदेव त्वेतत्तज्ज्ञाप्यत्वं वा न च लिंगोपहितभानपक्षेऽपि तज्ज्ञाततेऽपस्थापकाभावात्तत्कथं त
द्विशाययत्वेनानुमितेर्भ्रमत्वमिति चेत्। अत्राहुः अनुमित्याभासताप्रयोजकत्वं हेत्वाभासत्वमिति संप्रदायमतेनास्याभिधानं तत्प्र
युक्तत्वं च तद्विशिष्टत्वं च तद्विशिष्टत्वं तथा च लिंगोपहितभानपक्षे व्याप्यत्वासिद्धो नीलधूमो व्याप्यत्वेनानुमितेः ततोऽभासत इति

भ॰ चिं॰ तस्याः भ्रमत्वं केचित्तु वह्निव्याप्यनीलधूमवान् वह्निमानित्यनुमितौ व्याप्यव्यापकभावस्य संसर्गविधया भानान्नीलधूमे वा तत्त्वेन रूपेण तदभावात्
द्विषयत्वेन तस्याः भ्रमत्वमित्याहुः वस्तुतोऽन्यथासिद्धधूमत्वानवच्छिन्नानुमितिसत्त्वेपि नीलधूमस्याहेतुपानुमितिप्रतिबंधकत्वेनैव हेत्वाभासत्व
१२४ शरीराजन्यत्वादौ च विशेष्यस्यासिद्धतया विशिष्टस्य व्याप्यत्वासिद्धतयाऽनुमितिसामान्यप्रतिबंधकत्वमेव एतदेव सर्वमभिसंधायाह
दिगिति प्रकृते योजयति एवमिति शरीराजन्यत्वेपीति शरीराजन्यत्वाश्रयमात्रप्रतियोगिकयावदन्योन्याभावेपीत्यर्थः पूर्वोक्तदोषं
135 निरस्यति सुरभीति ननु सुरभिधूमत्वेन कार्यतावच्छेदकं प्रत्येकसामग्रीद्वयसमाजमहिम्नैव विशिष्टकार्यसिद्धेर्नीलघटवदिति चेन्न वि
शिष्टस्य कार्यतानवच्छेदकत्वेन प्रत्येककारणतायाः एतद्व्याप्यत्वनिश्चयमूलत्वसंभवात् स्थापनानुमाने पूर्वोक्तव्यापकत्वमर्थे विशे
षणत्वमुद्धरति व्यापके चेति विशिष्टस्येति यद्घटप्रदेशभागाभावेसादिकृतित्वादिना प्रत्येकमेव कारणत्वं ननु तादृश्यकृत्यादिविशि
ष्टात्मत्वेन कारणत्वं कृत्यादीनां सं०हकारितया परस्परं दंडचक्रवदवच्छेदकत्वाभावात् तथापि वस्तुगतिमनुरुध्यैतदुक्तं ननु तत्त्वेन ज
नकत्वं विवक्षितं नचैवं न विशिष्टस्य व्यापकत्वमिति वाच्यं प्रत्येककारणतायाः एवैतन्मूलत्वसंभवात् वस्तुतः प्रत्येकमेव तद्व्यापक
त्वमपि ग्राह्यं सामाजमहिम्ना विशिष्टसिद्धिः अतएव ग्रंथकृतापि तथैव विभावितं धूमे प्रति त आर्द्रेंधनप्रभववह्नित्वेनैव कारणत्वा
द्विशिष्टस्य व्यापकत्वं न च वह्निसंयोग आर्द्रेंधनसहकारीति वाच्यं तत्संयोगे सत्यपि तत्प्रभववह्न्युत्पादं विना ततो धूमानुत्पन्नेरिति राम
वदंति अखंडइति तथा च प्रतियोगिविशेषणतान्नवैय्यर्थ्यमिति भावः अजन्यत्वमिति एवं चाप्रयोजकत्वमपीति ध्येयं सत्प्रतिपक्षो । १२४

च्छेदादिति समीचीनप्रतिपक्षोच्छेदादित्यर्थः यथा चैवं व्याख्यानं तयोः कं प्राक् किं चेति एषामन्यतमः स्थापनाहेतुः परस्य च विरहः प्रकृतानुमा
नोपाधिरित्यर्थः अत एवेति यतः समव्याप्तत्वादिघटितत्वं न त्वस्याभावत्वं उपाधिरतस्तस्य ध्वंसो हि निलान्तसाध्यव्याप्तिरित्यर्थः नाचार्यमतमाह
अन्ये त्विति यन्निष्ठेति पदं विशेष्यतावच्छेदकविशिष्टनिष्ठेत्यर्थः अभाववन्निष्ठव्याप्तेः अभावत्वरूपविशेष्यतावच्छेदकविशिष्टनिष्ठव्याप्ता
वित्यर्थः न शरीरेति अभावत्वावच्छिन्नेजन्यत्वाभावे शरीरं विनैवाकर्तृकत्वनिरूपितव्याप्तिग्रहान्न तद्विशिष्टव्याप्तिरिति भावः अत्रेदम्
न जिमतिबीजं यन्निष्ठेत्यत्र लाघवेन प्रकृतिपरत्वं न तु विशेष्यतावच्छेदकावच्छिन्नपरत्वं गौरवात् एवं च शरीरजन्यत्वाभावनिष्ठव्याप्तिः श
रीरपदं विना न गृहीते प्रतियोगितावच्छेदक यहं विनाभावस्यैवाग्रहात् तथा च कथं न विशिष्टस्य व्याप्यतावच्छेदकत्वं अन्यथा जन्यत्वाभावे व्याप्या
नस्यात् सकारणत्वाभावादेर्जन्यविशेषणं विनापि अभावत्वावच्छिन्ननिष्ठव्याप्तेर्ग्रहादिति केचन लव्यतिरेकिणि उभयसिद्धसाध्यकं केवलान्व
यिनि उभयसिद्धसाध्यवज्जिन्नत्वं वा प्रसिद्धमिसन्न यथा तिव्यरेकी स्फुकं अन्योन्याश्रयादिति लाघवज्ञानजन्यानुमितित्वस्यैव जनकत्वमि
तित्वादित्यर्थः यत्र प्रमाणादिति नन्वेवं सम्भवन्नु विषयतया अनुमिति त्वं लाघवज्ञानकार्यतावच्छेदकमिति पर्यवसन्नं तथा च यत्र लाघ
वप्रकारकं ज्ञानं न जातं वस्तुतो लघोरेवानुमितिस्तत्र प्रसिद्धाः नवत्वालाघवज्ञानजन्यानुमितित्वमेव तथा अन्योन्याश्रया इति चेन्न
लाघवगौरवोपस्थितिकालीन लघुविषयताकानुमितित्वस्यैव कार्यतावच्छेदकत्वात् तान्नतु तथापि लाघवज्ञानोपनीतमेकत्वं प्रकारीभू

म.कु.टिं. याऽनुमितौ कथं भासतां व्याप्याद्यनुपनीतादृशस्यानुमितौ भाने मानाभावादिति पूर्वोक्तविरोधान्न च वस्तुगत्यैकः सिद्ध इति न त्वेकैकत्वमपी
तिवाच्यं एकत्वानेकत्वसंशयतादवस्थ्यादिति चेत्। अत्राहुः। व्याप्याद्यनुपनीतमपि लाघवज्ञानोपनीतमनुमितौ भासते नान्यदिति प
१३५ संगात् लाघवज्ञानस्य प्रमाणमात्रसहकारित्वकल्पनात्तदिदमुक्तं तथाविधप्रमाणमात्र इति अत्र च लाघवोपनीतत्वस्यैव नियाम
मकत्वान्नातिप्रसंगः व्याप्यापीत्यादिग्रंथस्तु लाघवानुपनीतविषयकः न त्वेकविषयत्वेऽप्यनेकविषयत्वसंभवात् संशयतादव
135 स्थ्यमिति चेन्न एककर्तृकत्व एव लाघवावतारात्तस्यैवानुमितिविषयत्वात् अत एव नाकर्तृकघटभूपश्चादेककर्तृकताज्ञानं
बाधपतद्धत्तयैव व्याप्तिज्ञानस्यथा नानाकर्तृकेषु पृथक्कर्तृकताज्ञानस्य प्रमात्वेन बाधासंभवादिति अन्ये तु पञ्चास्त्वस्त्वीजमुद्घाटपति
।अत्रापीति किं चोक्तानुमानेन क्षितिकर्तृभेदानुमितावपि सागरादिकर्तुरेतद्भिन्नत्वसंशयादौ भूयः नानात्वसंतपतादवस्थ्यमेव
ति अनादिभावत्वादितियघनुमितौ नानात्वस्य विषयः तथाप्यनादिकार्यप्रवाहविषयत्वेन तत्सिद्धिरिति भावः न चास्ति सत्त्वस्सो
ऽवनंतद्वीजं तु उपनीतभानानंगीकारान्निमज्ञानजन्यत्वं पक्षधर्मतावलादपि नासिध्यतीति। ननु तथापि कथं सर्वविषयत्वसि
द्धिरित्यत आह नियतेति एवं च पक्षेन्तदुपाध्यनाद्यतिरिक्तविषयत्वमपि सिध्यति एतेन प्रथमकल्पो। स्वरसोपि दर्शितः पक्षादिविष
यत्वेपि तत्र सर्वविषयत्वासिद्धिरिति निन्दितितया च कथं जगन्निर्मातृत्वमिति भावः न भ्रांत इति न सत्सद्विषयत्वेन भ्रमत्वं किं त्वधि राम
१३५

करणत्वप्रकारकत्वेनेति भावः स्वेष्टसाधनेति तथा च प्रयत्नस्य प्रयोजनज्ञानमाप्यत्वमप्याह तं प्रयोजनज्ञानजन्यत्वनियमस्य जन्म
त्वोपाधिदूषितत्वादिति भावः प्रयत्नोत्सन्नो प्रयोजनज्ञानापेक्षात्वान्नित्यस्थितावपीत्याह वक्ष्यमाणस्वरूपत इति करोतीति इष्यत इति शेषः ननु ज
रिकायाः सिसृक्षारूपत्वप्रलययोनस्यात्संजिहीर्षारूपत्वे च सर्गे निस्यादित्यत आह सर्गेति सुखादी भावकार्यस्य समवायिकारणजन्म
त्वनियमाद्यथा त्मादिजन्यत्वमिति भावः मीनशरीरेति न शरीरं नेश्वरस्य तददृष्टोपगृहीतत्वाभावात् किं तु संसारिण एवेति ध्येयं अ
त एवाह सोपि भूतावेशेति नैवं संसारितात्मा नहि भूतशरीरापारवश्यं भूतावेशन्यायेन परमेश्वरादेव सिद्धिरिति वाच्यं तथा सत्यदृष्टाभा
वे नशरीरारम्भसिद्धौ भूतावेशन्यायस्याप्यभावात् अङ्गवस्य दृष्टाभावादाश्रूयाननुमानाच्चेति यद्यपि मन्वादिशरीरारंभकद्व्यणुकादिकर्तृ
कत्वेनेश्वरानुमानं स्यात्तथापीश्वरस्यावतरूपकत्वात् किं मन्वादिनेति भावः विश्वतश्चक्षुः विश्वविसर्पकसाक्षात्कारवानित्यर्थः विश्वतो
मुखः विश्वविषयकवचनवानित्यर्थः विश्वतो बाहुः विश्वविशयकप्रयत्नवानित्यर्थः विश्वतस्पात् विश्वव्यापीत्यर्थः बाहुभ्यां धर्मा
धर्माभ्यां पतत्रैः परमाणुभिः सम्प्रधमति संयोजयतीति किमर्थमित्यत आह द्यावाभूमी संजयन्नपावेक ई लोकसष्टकं भूमी सभो लोकस
मकमुपलक्षितं संपूर्वं इयं मवहितावेति श्रांरस सूत्रेण भमनजननाभ्यां मन्त्रीयते स्मृतिविरोधेनश्रुतेरसपरत्वशंकां तदविरोधदर्शनेन
निरस्यति उत्तमेति प्रसंगादाह स्यादेतदिति कार्यत्वेनैवेति यथा कृत्स्यादित्वक्षणकार्यानुपपत्तिरीश्वरमानं तथा कार्यत्वानुपपत्तिः यो बो

भ॰ चिं॰ मानमित्यर्थः अनुमीयत इति नैयायिकदिशानुपदर्शितार्थपन्नेः स्वयं एथक्के नस्वीकारादिति ध्येयं नन्वेवं नकार्येणतदुन्नयनं किंउकार्यो
ज्ञाकेनेत्यत आह यतिरेकेति व्यतिरेकनिरूपकतयातन्त्रयोजकत्वमितिभावः तस्य अदृष्टस्यांतरर्थेत्वात तदुदृष्टमात्रस्याक्षुणपार्थत्वात्र
१३६ थावदृष्टस्याक्षुणमेवादृष्टसाक्षुण्यंतत्रमानमित्यर्थः परमा एवेतिखंड प्रलयेपरमाणुकर्मणिसत्यपियथातद्वाणुकारंभकसंयोगइ
त्यर्थः पूर्वदृष्टनाशाददृष्टमस्योत्पादकाभावाद्वा होनस्यादित्याह मायापसारणेति नचमायापसरणेनैव तददृष्टमुत्पाद्यत इति वा
136 च्यं तस्य विहितनिषिद्धेतरत्वेन तद्जनकत्वादिति भावः मायाघ भाव एवेति इदं चादृष्टकारणानानिरासमात्रापि प्रायेणोपात्तः
वक्तृतोतस्यापि नकारणत्वमित्यये वक्ष्याति तद्भावादिति अदृष्टा भावादित्यर्थः वंध्येत्यफलत्वाणं परमाणुकर्मणि इष्टापि दृष्टवंन
त्वदृष्टं दृष्टोपसंहारद्वारैवसर्वत्र जनकं नतु साक्षादित्यत आह अदृष्टं चेति अन्यथेति द्वारेपिसाक्षाज्जनकत्वं तस्यस्वीकार्यमेवात्रा
पिद्वारांतरापेक्षायामनवस्थानादितिभावः नचेति तथा च दाहेपि न तद्स्व जनकमिति भावः स्यन्नेति देवानीजस्मात्यार्थोधर्म इत्यत्रार्थप
देनश्रेयस्करार्थके न शपेनापूर्वं धर्ममनुरूपं व्यावृत्तं तस्य निषिद्धशात्रुवद्धजनकत्वेनाश्रेयस्करत्वात्तदुद्यमपिनधर्म इत्यर्थः य
हस्येति कुत्वेति नियताग्निसाध्यदाहस्य तिकृष्णमेवादृष्टमुत्पाद्यत इति नामंतरज्ञ मत्साह प्रतिबंधक इति भावः दोषांतरमाह अदृष्टे
ति अक्षुचेति रिति वामागामदैत्यादर्शनादितिभावः अन्यय सत्वेड्ढे जनक प्रतिबंधकसत्वेनेति कारणत्वमित्यर्थः मणिसद्भावइति राम

१३६

उत्तेजकाभावविशिष्टमणिसद्भावइत्यर्थः प्रतियोगिइतियद्यपिप्रतियोगिभेदस्कूलप्रतियोगितावच्छेदकभेदस्यानरूपकत्वात्तद्भेदादेवभेद
स्तथापियथाप्रतियोगिभेदोऽत्र भावभेदव्याप्यस्तथाप्रतियोगितावच्छेदकभेदोपीत्यर्थः केवलोऽडसद्भावेउभयाभावाद्दंडपुरुषसद्भावेवि
शेषणाभावाद्दंडपुरुषोभयाभावेविशेष्याभावाद्दंडाभावविशिष्टपुरुषाभावइत्यर्थः प्रयुक्त इति विशेषणादिविरहान्यतमप्रयुक्तइत्यर्थः
अनुगतेतियद्यपिशाब्दप्रयोगरूपेव्यवहारेव्यभिचारोनानार्थशब्देऽनुगमेपिविषयाननुगमात्तथापिव्यवहारशब्देनज्ञानमेवविव
क्षितं नचैवमनन्वयः ज्ञानेनविषयिणाविषयस्योपलक्षणात्तथाचानुगतज्ञानस्यानुगतविषयस्याव्यस्त्वादित्यर्थोऽदृष्टस्मः ननुशक्तिरे
वानुगतातद्विषयोस्त्वित्यत आह यत्नो स्थेति रूपामध्वंसप्रयुक्तस्तन्नियततोनतुतज्जन्मघसप्रसमयत्वादिति भावः ननु घटत्वेन घटत्वाभासी
दितिप्रत्ययाभावादितिभावः सोपमितित्उत्पादविनाशवान् तुरीयसंसर्गाभावोरूक्तध्वंसएवबास्तुनोभयथापिशक्तिसिद्धिरितिभा
वः ननुतुरीयसंसर्गाभावस्वीकारेविभागव्याघात इत्यस परिहरन्नाह ...वेतिननुविनाशिनिध्वंसत्वपरिभाषैवसंसर्गाभावत्वरूचेरा
हयद्वेति परिस्यतीतेनितेतियद्यपिविशेष्यतावच्छेदकघटत्वावच्छिन्नघटादिप्रतियोगिकः प्रतिक्षणंध्वंसोनेष्यतेतादृशावृक्षणभंगाया
तएवदोषाबहवः तथाचविशेष्यस्यप्रसिद्धत्वात्रयमानत्वात्समवायसमवायिनाशाभावाद्वनघटादेर्विनाशाः किंतुविशेषणस्यैवनत्व
विशेषणनाशसामग्र्येवविशेष्यनाशिकानित्यमात्रापलापप्रसक्तेः अतएवरूपाभोपमासीदितिप्रत्ययोनत्वयमासीदितिप्रत्ययइतिभावः।

म. चिं. ध्वंसस्येतितथाचेत्तेजकापनयेपिदाहापत्तिः उत्तेजककाले स्पनस्य प्रतिबंधकध्वंसस्यतदाप्यनाशादितिभावः ध्वंसस्येतिकश्चित्याहुः सचवस्तुगाम
एवउत्सादविनाशशालिनस्फुरीयः संसर्गाभावएवविशिष्टाभावइतिनिरस्यतिण चेति असंताभावएवासावितिपक्षंपरीहरतिनापीतिअ
संताभावस्यनित्यत्वात्सदैवदाहापत्तिरितिप्रसारुत्तिसहितस्यतस्यहेतुत्वं वाच्यं प्रत्यासत्तिश्च विशेषणताभावादिरिसननुगमइत्याहस
१३७ वेतिअथेतिउत्तेजककालेविद्यमानोयोऽसंताभावस्तत्ततद्व्यक्तीनापीत्यर्थः उत्तेजकाभावत्वेनेतितथोत्तेजकाभावविशिष्टमण्यभावत्वे
137 नहेतुत्वंतथाचपूर्वोनुवर्त्तमानताहशाभावउत्तेजकापनयकालेपिदाहापत्तिः कारणतावच्छेदकावच्छिन्नयत्किंचित्सत्वएवकार्योत्प
त्तेरित्यर्थः तर्हीतिएवंविशिष्टापत्तिःभावांकर्तव्येत्यर्थतिविशेषणविशेष्याभावस्यातिअतिरिक्तविषिष्टानभ्युपगमादितिभावः संबंधाभा
वादितिभावः संबंधाभावादितिननुविशेषणविशेष्ययोःसंबंधस्यतदुभयमात्रवृत्तित्वात्तत्नाशेतत्संबंधाभावात्ईतिनिसत्पपिदंडीहनास्तीति
व्यवहारापत्तिरितिचेन्नयादृशेनहिसंबंधेनयत्रयद्विशिष्टव्यवहारस्तादृशसंबंधाभावस्यैवतद्व्यवहारहेतुत्वंदंडपुरुषसंयोग
स्यनतद्व्यवहारहेतुत्वस्यभूतलत्वावृत्तित्वेनतत्रदंडयस्तीतिव्यवहारानापत्तेः किंतुपरंपरासंबंधविशेषस्तथातथाचतदभावएवविशि
ष्टाभावव्यवहारेहेतुरितिप्रत्वस्वत्वेनतथाकल्पनादितिसंबंधांतरंविनेतिसंयोगादावतिव्याप्तेः आहसंबंधेतिअसंभववारणायांतरेति। राम
नन्वात्मविषयकाज्ञानेस्वात्मनासमंविषयविषयिभावःसंबंधःस्वरूपसंबंधएववाव्यः अत्रतेवस्तमव्यापकंतत्रसमवायस्येवसंबंधा। १३७

तत्स्यसत्वादिति चेन्न उद्देश्यव्यवहारप्रयोजकसंबंधांतरं विनेत्यर्थात् न तु समवायो विषयत्वव्यवहारप्रयोजकः घटादिविषयकज्ञानस्यस्वा
त्मनि विषयत्वव्यवहारप्रयोजकत्वप्रसंगात् न तु घटाभावप्रमानुपपत्तिः यौगपद्यतायाः फलजनकत्वं तयातत्र विशिष्टज्ञानोत्पत्त्यायौगपती
वद्रूपं भावान्न च प्रत्ययपदं प्रमापरं संबंधस्य स्वेन तस्यापि प्रमात्वात् एतन्न यासंबंधाभावेन तस्याप्रमात्वं तदप्रमात्वे केनापि संबंधाभाव इति पर
स्पराश्रयात् किं च अत्रातींद्रियाभावस्वरूपसंबंधाव्याप्तिः तत्र स्वरूपद्वयस्य विशिष्टप्रत्ययाजनकत्वात् तत्प्रत्ययस्यानुमित्यादिरूपत्वेन वि
षयाजन्यत्वादिति चेन्न विशिष्टप्रत्ययजननयोग्यतावच्छेदकरूपावच्छिन्नस्वरूपस्य संबंधत्वात् योग्यतावच्छेदकावच्छिन्नस्यात्र भावे यो
ग्यत्वस्याप्यभावात् योग्यतावच्छेदकं चात्यंताभावे प्रतियोगिदेशान्यदेशत्वं प्रागभावादौ प्रतियोगिदेशत्वे सति प्रतियोगिकालान्य
कालत्वं यत्नोन्याभावे प्रतियोगितावच्छेदकदेशान्यदेशत्वं न चात्यंतसमन्याभावत्वं न च समत्वार्थो तु योग इति वाच्यं तत्रापि तद्देशा
न्यत्वस्यत्वासन्नत्वे वमनवस्थानवस्थायाः प्रामाणिकत्वेनादोषात् प्रत्ययानवस्थापाश्वासत्वात् उक्तावच्छेदकोपलक्षितस्वरूपस्यैव प्रत्यय
विषयत्वे तस्य तदविषयत्वात् एवं चोक्तावच्छेदकावच्छिन्नस्वरूपाभावे पत्राभावधीस्तत्र भ्रमः एतेनातींद्रियस्वरूपसंबंधाव्याप्तिरप्यपास्ता न चोक्ता
वच्छेदकस्य प्रत्यया विषयत्वे विषयेविरोधाभावात् कथं भ्रमत्वमिति वाच्यं एकत्रोक्तावच्छेदकावच्छिन्नस्य संबंधत्वेन विद्यमानासंबंधविषयत्वा
दन्यत्र तदनवच्छिन्नत्वेन तस्याविद्यमानसंबंधविषयत्वात् ननु यत्किंचित्संबंधाभावो न विशिष्टाभावोऽतिप्रसंगादिति विशेषणाविशेष्योभयप्रति

म॰ चिं॰ योगित्वरूपविशेषणाभावात् कथं विशिष्टसंबंधाभावादित्यननुगमस्तदवस्थ एव इत्यनेन विशेषो यत्पुरुषादौ विशेष्ये दण्डादि विशेषणा
संबंधे च विशेषणविशेष्योभयप्रतियोगिकं तु दण्डपुरुषोभयप्रतियोगिकसंबंधत्वमेकं तदवच्छिन्नाभाव एक एवेति नाननुगम इति चेन्नहि
१३८ दण्डावच्छिन्नपुरुषत्वमेकं प्रतियोगितावच्छेदकं तदवच्छिन्नाभावोऽप्यनुगत एवेति किं संबंधाभावस्य विशिष्टाभावत्वोपवर्णनेन च विशेष्य
विद्यमाने तदभाव इति वाच्यं विशेषणावच्छिन्नानामप्येषामेवानुपगमे दोषाभावात् अतएवानुपदमेव वक्ष्यति नहि दण्डिनि सतीत्यादि
138 किंचानवस्थानाथाऽस्तु प्रकृते तु तेजसा भावमात्रे संबंधस्य तदुभयस्वरूपतया तदभावोऽननुगत एव न च तदुभयं न स्वरूपसंबंधः किंतु
तादृशविशिष्टप्रत्ययजननयोग्यत्वमतिरिक्तमेव तथेति वाच्यं विशिष्टबुद्धिविषयस्य संबंधत्वाद्विशिष्टप्रत्ययघटितस्य तस्य तस्य
विशिष्टबुद्ध्यविषयत्वात् अतएव संबंधस्य संबंधिभिन्नत्वनियमे न स्वरूपसंबंधः परैर्नाङ्गीक्रियते अतएव समवायसिद्धिः ननु स्वरूपाणा
मनन्तत्वे न स्वरूपसंबंधे नार्थान्तरताभावात् अन्यथा तेनैवार्थान्तरं स्यात्तन्न संबंधस्यत्वमिति तद्वृत्तित्वेन संबंधत्वावच्छिन्नाभावस्यानुगत
त्वमिति वाच्यं एवं विशेषणावच्छिन्नविशेष्याभावस्यापि विशिष्टाभावत्वे दोषाभावादित्युक्तं अपि च यदि संबंधाभावो विशिष्टाभावस्तदा
दण्डी पुरुषो नास्तीत्यत्र नञर्थप्रतियोगित्वेन संबंध एव भासेत न चैवं दण्डावच्छिन्नपुरुषस्यैव प्रतियोगित्वेन प्रतीतेः अन्यथा घटाभावोऽपि
रितिक्तो न सिद्ध्येत घटत्वादृष्टिकरणे संबंधाभावादेव तद्व्यवहारसंभवात् यदि च संबंधस्यात्र प्रतियोगित्वेनानुल्लेखान्न तत्र ज्ञानं विनापि राम
१३८

घटत्वावच्छिन्नघटत्वाभावत्वेतरभावत्वानाक्रान्ततदभावेनान्यथासिद्धिः तदापकृतेपि तल्लभमित्यपरितोषं हृदि निधायाह यद्वेति एवं च विशे
ष्याणामवच्छिन्नविशेष्यप्रतियोगिकोऽत्यंताभावो न ध्वंसो न वा विद्यमानप्रतियोगिक इति न रूपाणि कलशंका तस्यापि नित्यत्वेन प्रागप्यकार्यो
पत्तिः समयविशेषावच्छेदेन संसर्गित्वादिति यं यत्कृते वाभिधानादिति दंडी पुरुष इति न तत्काले दंडवानित्यर्थः किं तु तस्य तत्काले दंडाभा
ववानित्यर्थः नहीति पूर्वोक्तमिति योजना अन्यथेति यदि दंडीतिप्रतीतिर्दंडाभावावच्छिन्नविशेष्यकाणां नाभावः किं तु दंडाभावमात्रस्य तदा
न्यथाभितिपदवैयर्थ्यापत्तेरित्यर्थः यद्वा यदि न तत्कालीनदंडाभाववान्नेव प्रतियोगी तदाऽन्यकालीनदंडाभावमादाय तत्रास्तु तदंडिना
पदंडत्वेनाभावप्रतियोगित्वादन्यथाभितिव्यर्थमित्यर्थः ननु कार्यानुत्पादप्रयोजकत्वं प्रतिबंधकत्वं प्रयोजकत्वं च यस्मिन् सतीत्यादि
गर्भं न तु स्वत्ववर्त्तित्वगर्भमिति नान्योन्याश्रय इत्यत आह तत्रापि चेति नन्वेवमन्योन्याश्रयाभावे तत्सामान्याभाव एव लाघवाद्धेतुरस्तु न
तु यावद्विशेषाभावा इत्यपरितोषात् तदेव सिद्धांतयति तदिति संसर्गाभाव इति अत्रापि यत्रोत्तेजकमस्ति तत्रोत्तेजकाभावावच्छिन्ना
त्यंताभावमात्रं हेतुरन्यत्र ध्वंसादिसाधारणसंसर्गाभावमात्रं यथाविप्रसंसर्गाभावः समानाविति ध्येयं अन्यथेति तथा चान्योन्या
भावव्यावृत्तसंसर्गाभावत्वमावश्यकमिति भावः यो निषेध इति ज्ञायत इति शेषः नन्वभेदारोपादिस्थलेनातादात्म्यमपि संसर्गा
एवेत्यन्योन्याभावाव्याप्तिः किं च संसर्गस्यारोप्यत्वे रजतत्वारोपस्थले तत्संसर्गाभासेन नचैवं इत्यपरितोषादाह यद्वेति अपि

न॰चिं॰ करणविषयकप्रतियोग्यारोपजन्यज्ञाननिषेधिषया भावः। स संसर्गाभाव इत्यर्थः। अन्योन्याभावेऽतिव्याप्त्यभावं अन्यथानुपपत्त्या तथापि
तस्याभ्युपेयत्वादिति भावः। तथा चान्योन्याभावभिन्नत्वं लक्षणान्तरं दर्शयितुमन्योन्याभावलक्षणमप्याह [illegible] वेति अधिकरणवि
षयकप्रतियोगितावच्छेदकारोपजन्यनिषेधधीविषय इत्यर्थः। ननु इदमुभयलक्षणमतीन्द्रियसंसर्गाभावान्योन्याभावयोरव्याप्तं
१३८ तद्विषयकज्ञानस्यानुमित्यादिरूपतयारोपाजन्यत्वात् न च योग्यतापुरस्कारात्तथात्वं तादृशारोपजननयोग्यतावच्छेदकं हि नाभावप्र
139 तीतित्वम्। अतिप्रसंगात् किन्तु संसर्गाभावविषयत्वादिकं तथा च तथा चात्माश्रयः। न च प्रागभावादिविषयत्वमेव तथा प्रागभावत्वादेरपि
संसर्गाभावत्वघटितत्वात्। एवं च नमत्वस्यापि प्रागभावगर्भतया तस्य च संसर्गाभावगर्भत्वादन्योन्याश्रयोऽपि किं च योग्यता
यां अनिर्वचनः प्रत्यक्षे योग्यध्वंसेऽव्याप्तिरिति अत्र वदन्ति प्रतियोग्यारोपपूर्वकविनिषेधावगाहि विषयतावच्छेदकवत्त्वं संसर्गाभा
वत्वं एवमग्रेऽपीत्येतदुभयलक्षणं स्वरूपेण विषयतावच्छेदकं संसर्गाभावत्वादि तच्च सखण्डाभावाभावत्वमखण्डाभावाभावत्वं ते मनोत्कस
र्वदोषावकाशः अस्ति च घटस्य योऽभावस्तदभावो घटो घटोऽन्योन्याभावस्याभावो घटत्वमिति न च संसर्गाभावस्य योऽन्योन्याभा
वस्तदभावो न संसर्गाभाव इति स संसर्गाभावाभावोऽन्यतरणार्थो वाच्य इति पुनरन्योन्याश्रय इति वाच्यं सखण्डाभावाभावत्वमपि च स
वस्तुतो यद्यपि संसर्गाभावाभाव एव पर्यवसितस्तथापि संसर्गाभावत्वं तत्र न प्रविष्टमभावत्वेनैव संसर्गाभाव उपस्थित इति न का राम
१३८

विरहानुपपत्तिः। अन्योन्याभावे स्वप्रतियोगिकाभावमात्राभावत्वाभावादिति संक्षेपस्थितिमिति। अत्रेदं चिन्त्यं संसर्गाभावाभावत्वं न संसर्गाभावत्वं
न्योन्याभावेऽतिव्याप्तेः तथा हि स्वं घटान्योन्याभावस्तदभावो घटस्तदभावश्चेतरान्योन्याभावः ननु घटान्योन्याभावाभावो न घटः किं तु घटत्व
मिति चेन्न घटो घटान्योन्याभावो नेति प्रतीत्या घटे घटान्योन्याभावान्योन्याभावो विषयीक्रियते स च घटस्वरूप एव अभावप्रतियोगिक
स्याभावस्याधिकरणानतिरेकान्न च संसर्गाभावाभावत्वं तत्त्वमिति वाच्यं आत्माश्रयात्। केचित्तु अखण्डयोः संसर्गाभावाधिकरणानति
रेकान्न च संसर्गाभावाभावत्वं तत्त्वमिति वाच्यं आत्माश्रयात् केचित्तु अखण्डयोः संसर्गाभावत्वान्योन्याभावत्वयोः स्वरूपाभ्यां लक्ष
णाभ्यामुपलक्षणं न च तयोः पदार्थान्तरापत्तिः सामान्येऽन्तर्भावात्सामान्यं हि द्विविधं जातिरूपोपाधिभूतश्चोपाधिर्द्विविधः सखण्डोऽखण्डश्च
रूपाद्यौ तत्र तन्नेदं तेऽखण्डेति तथा च रत्नकोषे तत्त्वाणामिश्रैस्तदुक्तमेवमभावत्वमपि सत्तादिकमखण्डं बोध्यमिति साकूतः नेदमिहेति ननु संसर्गा
भावान्योन्याभावरूपविषयवैलक्षण्येन ज्ञानवैलक्षण्यं तस्माच्च व्यवहारवैलक्षण्यमपि सम्भवादिति उक्तं यत्रारोपे हेतुतां व्यवस्थापयता तद्वि
न्मेवं यद्विनारोपो हेतुस्तदा भूतले घटसंसर्गाभावान्योन्याभावसत्त्वे कदाचिन्नेदमिह कदाचिन्नेदमिति व्यवहारवैलक्षण्यानुपपत्तेरिस
योन्यप्रतियोगिज्ञानानुपपत्त्यादीनां कारणादीनां तौल्ये कार्यवैचित्र्यस्याकस्मिकत्वापत्त्या कारणवैचित्र्यस्य कल्पनीयत्वपारिशेष्या
दारोपहेतुतायामेव विश्रामादिति भावः इत्याकूतः गणानि उक्तप्रतिबंधकाभावस्य तत्रासत्त्वेन तत्रासत्त्वे तत्र प्रतिबंधको न स्यात् यत्रैकदा प्रतिबं

म. चिं. धकाभावस्तत्रैवान्यदा प्रतिबंधकत्वादिति भावः प्रतिबंधकत्वान्यपत्ते रिति पाठे अनस्येति शेषः तथा च गुणादेः प्रतिबंधकत्वमन्यस्य नस्या
दिति गुणादेः प्रतिबंधकत्वं नस्यादित्येवार्थः पर्यवस्यतीति ध्येयं संसर्गेति यद्यपि संसर्गस्य व्याप्यवृत्तित्वात्तदवच्छिन्नाभावोपि तथैव तथा च
सोपि तत्रास्त्येव तथापि व्याप्यवृत्तित्वेन तादृशाभावस्य हेतुत्वमिति भावः एवं विद्यमानत्वविरोधित्वेनेत्यर्थः। अन्यत्र विद्यमानेपि घटे तथाप्र
१४० तीतिदर्शनादिति भावः योग्यवृत्तित्वस्यापि यौगपद्यत्वं यौगपद्यमेव परविशेषवाच्यत्वज्ञानार्थं ततोपदेशापेक्षेति भावः मंत्रविना
150 शइति मंत्रस्याशुतरवि. नाशितया प्रहरान्तरेपि दाहः स्यादित्यर्थः संकल्पस्य विशेषणत्वमाशंक्य दूषयति संकल्पनाशइति तथा
च संकल्पस्य स्वात्मकत्वात्तदभावविशिष्टाभावोऽस्त्येवेति भावः विगीतत्वेनेति यद्यपि विगीतत्वं विनिशिष्टमेवत्वानिषिद्धत्वं नस्प्र
युक्तविरोधः तथापि विशिष्टप्रवृत्त्यविषयत्वं तदभिप्रेतं तदुक्तं यद्यप्येवं सति अनुमापकस्यानिषिद्धत्वरूपविगीतत्वस्यानरुक्तिस्तथा
पि भोजनाद्याचारव्यभिचारवारणाय लौकिकत्वमपि तत्र विशेषणमपि दत्तमा ... मद्दोषध्यादिव लौकिकमेवेति भावः। यद्वा
शिष्टाचारत्वस्यैव तदनुमानांगत्वं स्यैतत्कृतिरिति भावः उद्देश्यत्वेतिज्ञानमस्त्विति रमितितद्विशिष्टाभावः प्रहरान्तरेपि स्यादिति संस्का
रत्कतं। यत्किंचित्संस्कारविषयत्वं प्रहरान्तरमपीत्यत उक्तं मुद्देश्यत्वज्ञानादितेति सत्त्वज्ञानविषयमात्र संस्कारविषयइत्यनेनोक्तदो
षः न तु रोगादिना संस्कारनाशविशिष्टाभावसंभवात् प्रहरान्तरेपि दाहः स्यात् यत्र च न संस्कारोदयः तत्र का गतिरिति चिन्तनतत्त्वरदए राम
१४०

प्रतिबंधकस्यैवासिद्धेः यत्र च दाहप्रतिबंधकस्तत्रानन्यगतिककार्यदर्शनात्संस्कारोपि कल्प्यत एवकार्योन्नेयधर्माणां यथाकार्यमुन्न
मनादिति सांप्रदायिकाः वयं तु ब्रूमः संकल्पविषयकालएव प्रतिबंधकः संकल्पस्य च न विशेषणत्वं किंतु स्वविषयीभूतकालोपलक्ष
कत्वैव यथा मंगलस्यान्तसमयसमाप्तिफलकत्वे आसन्नसमयसत्वं समाप्तिफलकत्वं इयोनेव विशेषोपपत्त्या साधाराधेय
भावसंबंधेन तत्था तमस्य च विषयविषयिभावसंबंधेनेति न कश्चिद्विशेष इति प्रतिबंधकत्वान्यथानुपपत्त्या तत्सिद्धि निराकर्तुमुपक्षा
पयति नन्विति कर्तरि ण्वुलो विधानादिति भावः तस्यैति यद्यपि योगजन्ये मसाधारणं जन्यत्वमत्रापि संभवत्येव तथापि सत्वघटित
जन्यत्वाभिप्रायेणेदमिति ध्येयं सार्थकत्वः क्वचिल्लिंगवचनान्यतिवर्तन्ते पीतिवचनाद्दोषः प्रतिबं प्रतिबंधकमिति नपुंसकलिं
गत्वमिति भावः ननु भवेदेवं परस्मिन्त्रादीनां प्रतिबंधकत्वं भवेदिति सत आह प्रतिबंधश्चेति सामग्रीविरहः सामग्रीघटककारणविरह इत्य
र्थः मुरारिमिश्रमतमाह नन्वा[illegible]स्त्विति। मैत्र्यादेरिति इदं च समाधित्सो कर्पादिकं न कालप्रतिबद्धेतरवादिरिवत तद्देशप्रतिबंधे नैशाका
त्रास्य जनकत्वं संभवत्येव अन्योन्याभावस्याव्याप्यवृत्तित्ववादिमतेनेवासोत्कत्वात्प्रतिबंधकाभावस्यैवावच्छेदकत्वस्वीकाराद्न्ना
स्याव्याप्यवृत्तित्वात् अन्यथावह्निभेदादेरपि कालान्तरे कार्यानुपपत्त्यापत्तिः बद्धेतरत्वाभावादिति यद्वा तत्तत्कालप्रतिबद्धान्यत्व
स्यायं यासिद्धान्तं दन्यपदं हि तत्तज्जनकतावच्छेदकं प्रसिद्धं स्याकारोत्र न तच्चसंभवेनैवाभिप्रायेणोक्तं तु क्रमिति उभयस्यापीति तिन्नेवम

नयमतिरिकतोऽस्मिन दंडवृहलयोरपिद्वयोर्जनकत्वापत्तिः नच दंडस्य चक्रादिसमवधानं साक्षात्संबंधेन हृढत्वं तस्य च परंपरासंबंधेन तत्र दिति
म.चिं. विनिगमकमितिवाच्यं वह्निप्रतिबंधकाभावयोरपितुल्यत्वात् किं चैवं विनिगमनया परंपरासंबंधसाक्षात्काररूपादेरपि प्रसक्तहेतुत्व
तस्मात् किंत्ववच्छेदकत्वमेव स्यादिति तदपि न यस्मिन्सत्यपीति नियमाद्यपिदार्ढ्यस्य हेतुत्वमेव दंडेऽस्त्यपिदार्ढ्याभावेन कार्याभावान्न चाह
१४१ ढनाप्यनेक दंडेन रज्जुबद्धेन घटोत्पत्तिदर्शनाद्विवक्षितमिति वेकं न भूमिजनकत्वमेव दार्ढ्यं तस्य च न घटजनकत्वं जनकजनकत्वस्य जनक
तारिति वाच्यं भ्रमिजनकस्य घटजनकत्वेविरोधाभावात्तज्जनकत्वस्य जनकत्वेविरोधः आत्मा त्वाश्रयात् किं च भ्रमिजनकतायामेव दंडस्य
151 किमवच्छेदकं न तावद्दंडत्वमेव घट्टदादपि भ्रमुत्पत्त्यापत्तेः न च दृढदंडत्वं तथा अविरुद्धभ्रमिजनकत्वातिरिक्तस्य दृढत्वस्याभावाद्भावे वा तदे
वघटजनकतावच्छेदकमस्तु अपि चान्यं प्रतीतिन्यायेन दंडस्यान्यथासिद्धतापत्तिः कुंभकारपितृवत् तन्वानन्यथासिद्धं दासीनं प्रतीतिविवक्षितं भ्र
मिस्तज्जनिकैवेति वाच्यं एवं कुंभकारपितुरपि जनकत्वं स्यात् न कुंभकारस्यापि जनकत्वेनोदासीनत्वाभावात् तस्मात्समाधानं कि
ं विपक्षबाधकमाह नहीति स्वप्रवृत्तिः पूर्वमनिश्चये कारणाकार्यार्थिनो प्रवृत्त्यापातादितिभावः अन्यथेति कार्यार्थी योगाव्यवच्छेद
स्यैव कारणत्व इत्यर्थः ननु तथापि प्रतिबंधकाभावो न कारणं प्रतिबंधकसमानकालीनकार्यं प्रति उत्तेजकरूपविशेषसामग्रीक राम
त्पनेनैव सामंजस्येऽतिरिक्तायाद्दका नयायदन्यथासिद्धिरिति चेन्न यत्र प्रतिबंधकेनोत्तेजकं तत्र प्रतिबंधकाभावस्य कारणत्वकल्पना १४१

र्म्मत्रापितस्य हेतुत्वेन तत्रावच्छेदकान्तरकल्पनौचित्यात् तत्तद्विशेषसामग्र्यन्तरं कल्प्यते गौरवात् किं चोत्तेजकमननुगतमिति निराहादि
हेतुः तत्तदुत्तेजकयावद्दर्शनाभावविशिष्टमण्याद्यभाववत्त्वानुगतत्वादिति सिद्ध एव हेतुः अत एव प्रकृततया अनुमितिहेतुत्वं अन्यथासिद्धत्व
रानुमितित्वावच्छिन्नं सिसाधयिषारूपविशेषसामग्र्या एव हेतुत्वापत्त्यात् तस्याश्च हेतुत्वापातात् तन्नैवं संशयोत्तरप्रत्यक्षत्वावच्छि
न्ने विशेषदर्शनरूपसामग्र्यन्तरं न कल्प्यते इति चेन्न इष्टत्वात्। विशेषादर्शनसहकृतसंशयाभावस्यैव हेतुत्वादिति केचिदिति दि
क्।। ननु शक्तिरूपसाध्याप्रसिद्धेः नानुमानं स्यादित्यत आह तथाहीति अवयवार्थस्तु स्पष्टः अन्यथा वह्नित्वस्य परमाणवह्
त्तित्वेनाव्यावर्तकत्वापत्तिः अत्र च प्रतिबन्धकसमवधानदशायां या दृश्यदाहसंयोगवान् वह्निः प्रतिबन्धकाभावकालेपि ता दृ
शदाहसंयोगवान् न वह्निः किं तु रूपदेन विवक्षितः तन्निरासः संयोगादिना नार्थान्तरं। ननु यावदजनकदशायामुक्तत्वं शक्तौ नास्तिप्
यालिंकं चिदजनकदशायामाहतत्वाद्दृश्यदाहसंयोगादेरपि सर्थान्तरमित्यपरितोषादाह यद्वेति न चैवं भावभूतपदं व्यर्थं दृष्टाभा
वादतीन्द्रियस्य वारणाय तदुपगमात् महत्त्वेऽनुपलब्धिगम्यतया भावमात्रस्यैवातीन्द्रियत्वादभावस्य तत्संयोगाद्यन्यत
म प्रत्यासत्तिजन्यत्वसाक्षात्कारविषयत्वमतीन्द्रियत्वमभावमात्र एवत्वतु परमेव स्फुटं ननु लोहविशेषस्यैव सातिशयच्छिद्रा
जनकत्वादतीन्द्रियत्वेऽपि मानाभावः अतिरिक्तपदार्थोपपत्तेश्चेत्यस्वरसादाह अथवेति कार्यानुकूलसंबलस्य कार्यानुकूलत्वं

प्र॰चिं॰ दपिस्वनिमित्तकारणकानुकूलसंविवक्षितं तेन कर्मत्वकूलक्षितरूपकेन नार्थान्तरं कर्मणास्तु वह्निः समवायिकारणमिति नोक्त
दोषः वह्नौ क्षितरूपकाभावपक्षे कार्यानुकूलपरम्परासिद्ध्यर्थं अदृष्टवदात्मसंयोगो यस्य शरीरं प्रति बंधकाभावादिना र्थां
न्तरं कारणाया द्रव्यादिविशेषणं यद्यपि गुरुमते भावोऽधिकोनास्त्येवेति समवायपदं व्यर्थं तथापि परस्यार्थान्तरं स्यादेवेति तद्वार
णाय तदुपात्तं इंद्रियकारणमपीति वस्तुतस्तु संयोगादिपञ्चकजन्मज्ञानस्या प्रसिद्धेः साध्याप्रसिद्धिः इष्टमातपापीति यद्यपि जन्य
१४२ तं अर्थं तद्जन्यसाक्षात्कारस्य च आवश्य प्रसिद्धेः तद्रहितत्वे च परमतेऽप्रसिद्धं तथापि विशिष्टाभावानवेयर्थ्य मिति ध्येयं अत्र सं
योगादीत्यत्र विषयतसंयोगादीत्यर्थः तेनात्ममनोयोगस्योगि प्रत्यक्षादावपि जनकत्वान्न परं प्रसिद्धिरिति मन्तव्यं न च भावेति
14v उक्तातीन्द्रियत्वस्य तत्रापि भावादिति भावः तस्येति गुरुमतेऽतिरिक्तस्य तस्यासिद्धेरित्यर्थः नैय्यायिकमते च पारिभाषिकस्य निरु
क्तत्वादतीन्द्रियत्वस्याभावे हेतावपि नकाचित्क्षतिः तमादायार्थान्तरशंकायाः समवायपदे नैव निराकरणादिति भावः परमाणौ
साध्याव्याप्तेराह नित्यत्वं चेति वह्नौक्षितरूपकस्वीकारेपि याहृशानुमानेन नार्थान्तरत्वशंकातादृशं तदाह यद्वेति अदृष्ट
त्वस्य धर्मत्वादेरित्यर्थः अननुकूलत्वेनेति कारणतावच्छेदकसाधारणस्य तस्याये निरुक्तत्वादिति भावः यद्यपि तन्मते धर्मत्वादि
कं न कारणतावच्छेदकं किंतु शक्तिरेव तथापि न्यायमते धर्मत्वादिकमादाय तन्मते शक्तिमादाय साध्यमस्त्येवेत्यदृष्टे उपाधिर्नेत्य राम
१४२

अयसिद्धुंसाध्याव्यापकत्वमितिभावः अत्र दृष्टपदानुपादाना साध्येलाघवंस्फुतिस्थापकेनचनार्थांतारलंशाकापीतिमनसिरूलाह
अयवेतिकार्यानुकूलत्वंस्वकार्यानुकूलत्वंतदृष्टपदसिद्धयेसंयोगत्वेनार्थांतरवारणायाह अतींद्रियेति उक्तातींद्रियत्वस्यप्रति
बंधकाभावेपिसत्वात्समभिते यो तरंमातमस्खलितउक्तंसमवायीतिजनकत्वादिति नचाभावेव्यभिचारःसमवायगर्भसाध्यस्यतन्न।
भावादितिवाच्यंपरैरभावानंगीकारात्तन्नवृत्तयापिसमवायव्यभिचारःनचतत्रापिशक्तिसमवायोस्त्वेवेतिवाच्यंअनवस्थानादिति
चेन्ननिमित्तकारणतातिरिक्तकारणताश्रयत्वस्यहेतूर्थत्वात्तत्वयत्किंचित्कार्यंप्रत्येववविवक्षितंनचेदाहत्वरूपेणकार्यंप्रती
तिनासिद्धिरितिध्येयं अत्र साध्ये हेतौचदाहपदप्रक्षेपेणवह्निपक्षकानुमानेवह्न्युमानोन्नत्राप्रपिधेयथरूदृष्टिमत्तंलेखकप्रमादात्
नप्ररचरतीतिप्रतिभातिअतएवैतदंतर्भावेणोववत्सति अग्रिमवततर्षुबहिरिंद्रियप्रत्यक्षत्वमुपाधिरितिअन्यथातदसंगतत्वा
पातादितिवस्तुतेनचात्मत्वमितिनचघ्राणकादौसाध्याव्याप्तिरितिवाच्यंदाहजनकत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिति
भावः। अत्रतुसाध्यव्यापकंतमाहउद्भूतस्पर्शत्वमिति घ्राणकेतिनत्वेकत्वस्पर्शत्वजातीनातींद्रियघ्राणकेकत्वघ्राणकस्पर्शत्वोपाधीनस
मवेतोतथाचतत्रसाध्याभावात्साध्याव्याप्तिरितिचेदत्रकेचित् अतद्गुणसंविज्ञानबहु। गीरिहितामूर्तत्वधर्माधिकगुणत्वंतत्रसा
ध्याव्यापकत्वमस्त्येवेत्याहुः। अत्र मेत्वधर्मोवास्पाविवक्षितत्वेनतत्समवायित्वसचतन्निरूपसमवायाश्रयार्थेकतयासमवायिद्ध

भा॰वि॰ णुकमाद्यायेवतत्रसाध्यसत्वमितिवदन्तिशक्तिवदुपाधिरपिसमवैतीति अन्यथाउपाधिरसंबद्धएवस्यात्तन्मते विशेषणतायाअनभ्यु
पगमादित्यस्याकूतः नन्वनुकूलत्वं यदिजनकत्वं तदाशक्तौ तदभ्युपगमे अपसिद्धान्तः नो चेदथावच्छेदकत्वं तदा दृष्टान्तासिद्धिः आत्म
१४३ 143 मदृष्टरूपताद्रव्याधर्मस्यजनकत्वादित्युभयसाधारणं तदाह। अनुकूलत्वं चेति उभयसिद्धेति तथा च प्रतिबंधकाभावस्यै
वदाहादिप्रयोजकत्वं कल्पनेधर्मिकल्पनातो धर्मकल्पना यान्लघुत्वादिति तात्पर्यार्थः घटत्वार्थः समानइति ईश्वरकर्तृ
कत्वस्यन्यायमतसिद्धत्वात्कुलालकर्तृत्वस्यच घटत्वावच्छेदेनान्वयव्यतिरेकसिद्धत्वादिति भावः समवायिकारणइतियद्य
पिनिमित्तकारणेपिशक्तिरस्त्येवेतितद्वारणेनवश्यं भवत्येवतथाप्येकाधिकरणनंतरशक्तिरूपानिष्टप्रसंजनायसमवायि
कारणेत्युक्तं यद्यपि भावमात्रस्यसमवायिकारणजन्यत्वंपरेनमन्यतेतन्मते भावकार्यस्यापिसमवायस्यतथाभावाभावात्तथा
पिसमवेतकार्येप्रतितयात्वं स्वीकार्यमेवेति भावः। नचेयमनवस्था नामाणिकीप्रमाणाभावात् नचकार्यान्यथानुपपत्तिरेवप्रमाणंत
स्योभयसिद्धप्रतिबंधकाभावेनैवोपपन्नः नचाभावोनकारणंभाववद्ग्राहकत्वात् एवं च गुणादिनिष्ठशक्तौ गुणादीनांसमवायि
कारणत्वापत्तौ अन्यत्वापत्तिरित्यपि दूषणं। इष्टत्वं नच नित्यैकशक्तिर्नकार्येति वाच्यं अनित्यभाववहत्वे तेतिनसिद्धान्तात् किं चैवं प्रतिब
द्धवह्नेरपिदाहापत्तिः नचोत्पन्नतात्रशक्तिस्तदानास्तीतिवाच्यं उद्भूतत्वमपिप्रदिनित्यं तदासएवदोषः अथानित्यं तदातज्जननीत्कुलाद्याः राम

त्तिः शंकावपित्तीकार्या एवं तत्राप्युद्भूतत्वजननानुकूलत्वान्तरमित्यनवस्थापत्तेः उद्भूतत्वस्यैव शक्तित्वस्थानाभिषेचनीयत्वापात्तित्यशक्तौ
मानाभावश्चेति भावः प्रथमानुमानमिति पक्षत्वेप्यां प्रजनकत्वाभेद्वितीयानुमानेपीतिद्रष्टव्यं ननु चोद्भूतत्वविशिष्टशक्तिरजनकदशायां
वर्त्तते तिर्वपक्षएवोक्तमितिनबाधइतिचेन्ननित्यानित्यविकल्पेनपूर्वोक्तेनोद्भूतत्वेमानाभावइत्येतद्दवष्टंभेनतस्योक्तत्वात्नवस्कतः त्त्वति
बंधककाजएवपरंशक्तौनोद्भूतत्वंतथाचसहकार्यंतरविरहप्रयुक्तंयदावक्रौकार्यानुत्पादनंतदाउद्भूतत्वविशिष्टायास्तस्याः सत्वाद्बाध
एवेतिभावः अतीन्द्रियत्वागर्भेसाध्ये प्राग्युक्तदृष्टांतासिद्ध्युद्धारं रूपयतिलोहेति अग्निमितिपद्धाधर्मेतीन्द्रियत्वविशेषणमित्यादिशिष्टलघ्व
इतिकेचित्तन्नकठारेसाध्याव्यापकत्वापत्तेः तदनुमानेकुठारस्येवदृष्टांतत्वेनतत्रसाध्यसत्वात्तन्नचलोहविशेषणमित्येनतत्र
साध्याभावस्यवस्थितेनोर्नेवमितिवाच्यं एवंहिसाध्यव्यापकत्वग्रहस्थलाभावादेवनोपाधिःस्यात् नचालौकिकतद्र्थंतं वा च्यं ग्रहदृष्टांतर
जनकदशावर्तित्वेनतत्रसाध्यासत्वात् नचजनकत्वमात्रवृत्तिपरमाण्वादिसंयोगमादायतत्रापिसाध्यसत्वमितिवाच्यं एवंहिता
दृशसंयोगमादायघटादावपिसाध्यसत्वेनोपाधेःसाध्याव्यापकत्वात् नचगुरुत्वाभावरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वमिति
वाच्यं सौरालोकादावपिताद्दशपरमाणुसंयोगादिसत्वेनसाध्याव्यापकत्वात्तस्मात्पूर्वोक्तसंयोगपक्षकराहघटितसाध्यकानु
मानेनसहचतुष्कमपिमतमितिनचात्रापिस्थितिरस्थापकवतिदृष्टांतेसाध्याप्रसिद्धिरिति वाच्यं कार्यानुकूलेतरस्पर्शनिमित्तकारणका

नुकूलेति विवक्षया स्थितस्थापकस्यापि तथात्वेन इष्टत्वादिति तथाऽसत्वात्कार्यपदस्य वह्निकार्यपरत्वादिति तथा च तादृशसाध्याभाववत्यन्येव तत्र
चोपाधिरस्त्येवेति न साध्याव्याप्तिरिति भावः। अपरे तु गर्भमध्ये कार्यान्नकूलेत्यादिघटितानुमानत्रये ऽयमनुपाधिरित्यर्थः इत्याहुः। अ
पिवेति त्वन्मते चान्वयव्यतिरेक्येव गमक इति भावः। तत्र सिद्धिरिति शक्तिसिद्धिरित्यर्थः। तथा च नैतदनुमानेनैव शक्तिसिद्धिर्येना
न्योन्याश्रय इति भावः पराद्ध संख्यायामित्यपजकृत्पणपरममहत्वपरमाणुपरिमाणादावपि दृष्टं अत्र प्रत्यक्षाभावात् इति नित्तु प्रत्यक्ष
१४४ मेव न व्याप्तिग्राहकं अतीन्द्रियानुमानस्थले तदभावात्तथा च मानान्तरेण साध्य हेतुव्यतिरेकग्रहो स्त्विति चेत्। अत्र प्रत्यक्षाभि
प्रायेणेदमुक्तं वस्तुत अन्यथोपपन्नतया सर्वमेव अनुमानमप्रयोजकमिति भाव इति केचिदाहुः। वस्तुतः मानान्तरं न यत्र सिद्धार्थे
145 त्वात्तत्राप्यनुमानं कार्यान्नकूलातीन्द्रियधर्माभावानुमानं जनकत्वाभावेनैव लिंगेन वा व्यंजनकत्वस त्वेतादृश्य धर्माभावोन। तादृशध
र्मस्य जनकतावच्छेदकस्य सत्वे जनकत्वस्यावश्यकत्वात् एवं च हेत्वभावेन साध्याभावः साध्याभावेन हेत्वभावोनुमेयः इत्यप्य
त्वा॰ न्योन्याश्रय इति भावः यद्वा तदनुमानमपि साध्य साधनाभावव्याप्तिग्रहमंतरेण न स्यात् न दृष्टान्तं च न तदुभयव्यतिरेकप्रसिद्धिं
विना तदुभयव्यतिरेकः साध्यसाधनेऽएवेति साध्यं साधनव्याप्तिग्रहे तदुभयाभावव्याप्तिधीः तस्यां च सत्यां तदुभयव्याप्तिधीरित्यन्यो राम
न्याश्रय इति भावः न चान्वयव्याप्तिधीर्व्यतिरेकं व्याप्तिधी हेतुरिति नान्योन्याश्रय इति वाच्यं तथापि अन्वयव्याप्तिग्रहादेव तदुपपत्ते १४४

रितिभावः एतेन पंडइति न च पंडाद्युर्वदोस्वध्वंसस्य साक्षात्कारजनकत्वेन जनकत्वाभाव एकेतिवाच्यं अतीन्द्रियत्वेन योगिज्ञानस्य वि
षयाजन्यतया च साक्षात्काराजनकत्वात् तन्मते ध्वंसस्याधिकरणादिरूपतया तदसाध्यत्वाच्चेति भावः तृणारणीतितथा च वह्नित्व
प्रयोजकतया तृणादिनामेकानुगतशक्तिसिद्धौ वन्यत्रापि तदनुमानमिति भावः ननु वह्निनिष्ठा जातिः प्रमाणसिद्धा तथा च ध
र्मिकल्पनात इति न्यायात्तस्या एवावच्छेदकत्वं कल्प्यते न शक्तीरित्यत आह तृणारणीतितथा च जातित्रयमपि कल्प्यमेवेतितस्य
त्रयैकशक्ति कल्पनमेव लघ्वीति भावः यत्र चेतितत्रोक्तन्यायावतारादितिभावः अथ शंकते यदीतिवैजात्येवैजात्य पक्षे इत्यस्य प्रा
शंकते त्यर्थः। नन्वेवं तृणनिर्मथनाभ्यामपि वह्न्युत्पत्तिः कारणतावच्छेदकावच्छिन्नघटितसामग्रीसत्त्वादित्यत आह यथा
चेतितथैव तत्क्कौरपीति नन्वेवं कार्यवैजात्यमावत्ररूपक एकजातीयकार्यसहकारिनियमानुपपत्तेः सहि फलविरोधेन परंस्पात्स
हकार्यतावच्छेदक भेदेन सत्त्व पक्षे तेन कार्यवैजात्यं विना एवं च नैकशक्तिमत्त्वेन जनकत्वमिति चेत्। अत्राहुः तृणादीनां वह्नित्वा
वच्छिन्नं प्रत्येकशक्तिमत्त्वेन फूत्कारादीनां तृणजन्यवह्नित्वावच्छिन्नं प्रतितत्त्वेनैव शक्तिसिद्धिसहकारिनियमस्यापि उपपत्ति
रिति के चित् यथा प्रागभावत्वेन कार्यमात्रं प्रति कारणत्वेपि घटप्रागभावो न पटं प्रति योग्यः यथा ज्ञानविशिष्टज्ञाने विषयण
ज्ञानत्वेन कारणत्वेपि पटत्वज्ञानं घटत्वविशिष्टज्ञानं प्रति न स्वरूपयोग्यं तथा फूत्कारादीनामेकशक्तिमत्त्वेन कारणत्वेपि न त

म॰ दि॰ णमंथनादिजन्मो वह्न्युत्पत्तिरिति सप्पाकुः। तृणफूत्कारसंबंधतरणिकिरणमणिसंबंधादिषु एकजातीयशक्तिमत्कारणतावच्छेदकं तथा
चतदन्यतरसंबंधाभावे तृणमंथनादिसमवधानेपि न वह्न्युत्पत्तिरिति सप्पाकुः स्वैकदेशिमतं दूषयति यत्त्विति तृणत्वेनेति यद्यपि परम
१४५ तेतृणत्वेन न कारणता किं त्वेकशक्तिमत्त्वेन अन्यथा तद्दृष्टार्थकार्यं विजातीयकल्पनापत्तेः तथापि तृणादिनिष्ठशक्तेर्न मासज्ञप्र
145 तित्वं लाघवात्कारणतापदेन शक्तिरेवात्र विवक्षिता तथा च तृणत्वावच्छेदेन गृहीतशक्तिभंगप्रसंगादित्यर्थः तृणादिशक्तेश्चै
कजातीयत्वेनानुगमः एकजातिप्रयोजकत्ववत्त्वं तदृष्टाश्रित्येनव गौरवं प्रामाणिकत्वादिति भावः। प्रतिबन्धकीति एतत्त्वानिले
भावहेतुजनेति सिद्धान्तानि स्वरूपालंभ्य भगामेव पूर्वोक्तएव दोषो द्रष्टव्यः जातीति नव्यमणिपादो कारणएवैकाजातिः कल्प्यतां लाघ
वादिति वाच्यं। प्रकृतत्वादिनां संकरापत्तेरिति भावः प्रवृत्तिसिद्धत्वादितितथा च धर्मिकल्पनी तद्व्यतिन्यायेन तस्याएव जातेरवच्छेदक
त्वं कल्प्यते न तु शक्तिं कल्पयित्वा तदवच्छेदकत्वमिति भावः एतदपि जातेः प्रामाणिकतया तदवच्छेदकस्यैव लाघवाद्दोषविरस्मि स
भिप्रेत्योक्तं वस्तुतः कार्यतावच्छेदकाननुगमानस्यादोषत्वाज्जात्यभावेपि तन्नद्व्यक्तित्वस्यैवावच्छेदकत्वसंभवान्न शक्तिसिद्धि
रित्यवधेयं तन्मते जातेः संस्थानमात्रमंगपतया शक्तो जात्यभावे कथमनुगम इत्यस्मिन्मते प्रबोध्यं व्यक्तिजातौ योगपानुप
त्विं निराकरोति तद्व्यतुल्येति अन्यथा विशुद्धमातापितृजन्यत्वेनैव ब्राह्मणत्वानुगततद्वृत्तापि जातिसिद्धिः स्यादिति भावः वे राम
१४५

जासानं समुद्धरति गोमयेति यद्यपि गोमयवृश्चिकप्रभवयोर्वृश्चिकयोर्वैजात्यमस्ति तथापि वृश्चिकत्वमनुगतमप्यस्ति तेन
चाग्निमाथिप्रवृश्चिकजनकतावच्छेदकमिति सर्वत्र वृश्चिकप्रभवयोरजातित्वमिति नानंत्यमिति भावः वह्निजातीयस्या
कस्मिकत्वप्रसंगं परिमुद्धरति वह्निमात्रइति यद्यपि दर्पणेरुद्भूतःस्पर्श इति लीलावत्यादौ व्यवस्थापनात्तत्र कथं च व
ह्नित्वं प्रयोजकाभावात्तथापि सोमवह्निमात्रएव तत्प्रयोजकत्वमुक्तमिति भावः केचित्तु लीलावतीग्रंथस्वारस्यात् तृणोवह्नित्व-
त्रोद्भूतएवस्पर्श इत्याहुः पवनेति एतदुत्कर्षेण वह्न्युत्कर्षदर्शनादिति भावः तटस्थः प्रत्यवतिष्ठते नन्विति ननु तृणजन्यत्वं तथा
रूपादौ प्रसिद्धं तदभावश्च मणिजन्यवह्नावप्यस्ति इति तदवच्छेदेन मणिजन्यत्वं तथा प्रसिद्धमित्यत आह वह्निमात्रस्येति व्यभिचारेण
तृणस्याजनकत्वात् वह्निमात्रस्यैव तज्जन्यत्वादित्यर्थः स एव व्यभिचार इति भावः उक्तमाह केचिदिति अन्वयव्यतिरेकाभ्यां नि
यतेनान्वयेन च त्रितयाद्ध्रुवकेनोपपत्तिः। अकार्याकारणे तिन तु कारणत्वसंशये कथं तदवच्छेदकरूपवत्त्वनिश्चयः तयोरकनिश्चा
यकनिश्चयत्वात् किंच वह्निनिष्ठकार्य्यतायास्तृणनिष्ठकारणतायाश्चाश्रयहेतुकथं तदवच्छेदकत्वेन ज्ञानं विशेषणज्ञानसाध्यत्वाद्वि
शिष्टज्ञानस्य। अपि च कार्य्यतावच्छेदकत्वं कार्य्यतापर्याप्त्याश्रयमात्रवृत्तित्वं तद्धेतुः च कार्य्यतापर्याप्त्याश्रयत्वमवरूपं विषयः न च कार्य्य
तायाः पर्याप्तिरहसात एवेति वाच्यं व्यभिचारात्तदुह्नस्याजनकत्वादिति चेत्त्वत्रवदंति कार्य्यतादिकमप्यत्र एहसात एव तेन नोक्तसर्वदो

म.विं. प्रावकाशः नचोक्तव्यभिचारनिश्चयेकयमल्पभिचारस्य नियमगर्भे हेतुत्वग्रह इतिवाच्यं समानप्रकारकविरोधिज्ञानस्यैव प्रतिबंध
कतया तृणत्वावच्छिन्नवह्नित्वावच्छिन्ने व्यभिचारग्रहे तदवच्छिन्नस्य तदवच्छिन्ने हेतुत्वाग्रहेपि तदाश्रययोर्हेतुहेतुमद्भावग्रह
स्याविरोधात् तएव वयागं विनापि दानात्स्वर्ग इतिज्ञानेपि स्वर्गजनकोयाग इति धीः स्वर्गत्वसामानाधिकरण्येन यागजन्यत्वं
१४६ विषयीकरोति तदिदमाह नत्वित्यादि तृणत्वेन हेतुत्वं वह्नित्वेन कार्यत्वं चेति परिच कार्यकारणभाव एव न गृह्यते तेन तेदानहेतुत्वं का
र्यत्वं चेत्येव ब्रूयात्। ननैवं वह्नित्वावच्छेदेन व्यभिचारग्रहेपि वह्नित्वसामानाधिकरण्येन तृणजन्यत्वं गृह्यतामिति वाच्यं यागह
146 काभावादत्र वारणिमण्यभाववती सादिनायाहकस्यान्नाता तन्न चैवं तृणनिष्ठकारणताप्रतियोगिककार्यता अपत्तं गृह्यतत्वावा
स्त्राकितदवच्छेदकरूपकत्वपर्यंतिनेति वाच्यं। अपि मति नियामकगवेषणायास्सामान्यतोवच्छेदकग्रहं विना अनुपपत्तेः सामान्यतोदृष्टा
वतारं विना परिशेषानुमानानुदयादिति यत्तु ससंबंधिकप्रत्यक्षज्ञाने संबंधितावच्छेदकरूपवत्त्वज्ञानमावश्यकमिति तन्न द्वियं किंचि
नकार्यकारणभावग्रहः प्रत्यक्षेण अतएव काशादृष्टस्वर्गजनकत्वज्ञानं प्रति बंदीति तत्त्वज्ञस्य वह्निव्याप्तिस्मरणजन्यप्रतिप्रसक्तेरेतद्वह्निबा
देरवच्छिन्नाभावान्नव तस्यानवच्छेदकतया तदवच्छेदेन कार्यताबुद्धेर्भ्रमत्वापत्तेरिति वाच्यं कार्यताबुद्ध्यवच्छेदकत्वं स्याप्यभानात्मा
नेवा तदंशे भ्रमत्वेपि कार्यतांरोपमात्रादिति अन्यएवेति अभावत्रयप्रतियोगिको व्यासज्यप्रतियोगिक इत्यर्थः। अभावस्पतितयाच राम
१४६

त्तरोत्कर्षेण वस्तूत्कर्षो न स्यादिति भावः एतेनेति तरणस्य तदुभयत्वांपक्षेसमर्थः पूर्वं मिलितानां तरणादीनामभावत्रयाभावत्वेन हेतुत्वमारो
पितमिदानीं तत्प्रत्येकस्यैवेति निषेधो नस्त्वमिति भावः॥ उभयसिद्धत्वमेव दर्शयति कथमिति तद्दर्शयाह नन्विति अत्र घातेन व्रीहेर्नष्टत्वात्
दन्वयः पुरोडाशेन भवतीति अत आह अन्वयेनेति नन्विति तस्यावघातव्यापारत्वेनाभिप्रायः कल्पित इति भावः तदाशङ्कां परिहरति मैवमिति
भ्रमेणोपादीयमानोऽवघातो जनकव्यभिचारायाह प्रमाणेनेति ननु कारणाकारणोभयव्यभिचारः न च कारणाकारणसाधारणमनुकूलत्व
मात्रं साध्यं तदपि मध्यवर्तिनि घटितमिति सतिशयसिद्धिरिति वाच्यं एवं हि जनकीभूतध्वंसजनकत्वेनापि साध्यस्य चरितार्थत्वेन प्रतियो
गिनोऽहेतुत्वापत्तेरिति वस्तुप्रमाणविरोधादिति चेन्नैव दृष्टत्वकावघातो दृष्टपक्षोपादानविषयत्वादिति विशेषणव्याप्तेः साधनादिति वस्तु
तोऽयुक्तिवचनमयायेनावघाते प्रोक्षितव्रीहेरन्वये पुरोडाशस्य बाधकं विना विशेषणत्वेनोपलक्षणत्वमिति प्रतियोगिन इति प्रतियो
गप्रत्युपायोगिनोरेकत्वाजनकत्वादित्यर्थः व्यापारं विनैव पुरोडाशस्यावघातजनकत्वमस्त्विति शंकते नन्विति अत्र हेतुत्वादिति पुरोडाशस्य
हेतुत्वं साधितमिति भावः ननु यद्युपलक्षणमतीतमजनकं तदा ततो व्यावृत्तत्वबुद्ध्यादिकं न स्यादित्यत आह करणेति तत्त्विमिति तद्रूपलक्ष
णं तद्योगसाधनेऽस्यापि द्रष्टव्यं। अन्यथा साधनवैकल्यापत्तेरित्यवधेयं जन्मान्तरीयेतीति अतीतोपलक्षणस्यापि जनकत्वादिति भावः
एतावतार्द्धं सातिरिक्तव्यापारं सिद्धमुपसंहरति प्रमाणेनेति कार्यापेक्षया चिरध्वस्तत्वमसतीति विशेषणं तेन साक्षाज्जनके न व्यभिचारः

म॰चि॰ अतिशयस्य भावत्वं चपक्षधर्मतावच्छेदकं न तु साध्यतावच्छेदकबलप्रविष्टं तेन विघ्नध्वंसद्वारा समाप्तिसाधने मंगले मिथ्याज्ञानध्वंसद्वा
रा मुक्तिसाधने वा तत्त्वज्ञाने न व्यभिचारः नन्वस्त्वतिशयः पुरुषसमवेत एव तथा च नाधेयशक्तिसिद्धिरित्यत आह स चेति संस्कारत्वेनेति
१४७ न चैकमनेकव्रीह्युपादानं तस्यादिति वाच्यं होमादिनिर्वाहार्थं तदुपगमात् ननु यत्र किं चित्तदेवमेव नाशात्मकत्वं व्रीहिनाशान
खंडव्रीहीणां उत्पत्तिस्तत्र का गतिरित्यस्वरसादाह अस्तु वेति किं चिदिति यावत्तत्तस्य भिन्नं वस्तु किंचिदिति रितिस्वमतावष्टंभेन यथा प्रतिशा
147 यस्यैकत्वेनैव पुरुषनिष्ठत्वं सिध्यति अन्यथा लाघवेनाश्रयनाशमात्रस्यैव कार्यनाशप्रयोजकत्वेनैकव्रीहिनाशे तन्नाशाद्व्रीहीणां त
राणामुपयोगो न स्यात्तथापि प्रकारान्तरमाह तथाहीति दृष्टद्वारेति अत्र धर्मजनकत्वं साध्यं तथा च निषिद्धकर्मणां व्यभिचारवारणा
य विहितत्वादित्युक्तं प्रायश्चित्ते व्यभिचारवारणाय कालान्तरस्यादि न तु दृष्टद्वाराभावे सतीति स्यादृष्टान्यद्वाराभावे सतीत्यर्थः तथा
चासिद्धिः परमते शक्तेरेव द्वारत्वात्तच्च प्रसरुद्वाराभावे सतीति तदर्थः औषधपानादौ व्यभिचारात् न च तत्र विहितत्वाभावादेव
न व्यभिचार इति वाच्यं आयुर्वेदेन तस्यापि विहितत्वादिति चेन्न शास्त्र तदुपजीविप्रमाणमात्रप्रयोज्यं प्रतिविषयद्वारेतरद्वार
स्यादृष्टद्वारपदेनाविवक्षितत्वात् न वौषधादौ व्यभिचारः तदीयधातुसाम्यादिरूपातीन्द्रियद्वारविशेषशास्त्रानुपजीविप्रमाणभाव राम
दितिवाच्यं अन्वयव्यतिरेकादिमूलकप्रमाणस्यापि करणचित्तत्वस्य सत्वादिति भावः कृष्यादाविति न च विहितत्वाभावादेव न तत्र १४७

अभिचार इति वाच्यं प्रत्येकं वर्णोपायविज्ञागाविधिना वैश्यस्य कृषिविधानादिति भावः। रात्रवषामिति एतच्च परमते अस्मन्मते श्येना
पूर्वस्य शत्रुनिष्ठत्वमेव फलोपपादकापूर्वं फलाश्रये कल्पत इति वक्ष्यमाणयुक्त्या तथा चावरुद्धेः अत एव गयाश्राद्धापूर्वस्यापि
पितृनिष्ठत्वं पंचमटीकायां तथा विभावना चास्वमते न दोषमाह विपक्ष इति न च फलसामानाधिकरण्यलाघवमेव विपक्षबाधकमि
ति वाच्यं नानात्वगौरवेण तल्लाघवाघनादरादिति भावः। हविस्त्यागेति कथं सुदेशेन हविस्त्यक्तेन च तेन तत्रातिशयो जन्यत इत्यर्थः।
न च वह्न्युदाहानुकूलः संयोगो जन्यत एवेति वाच्यं एवं प्रोक्षणानायि ब्रीह्यादौ जलसंयोगस्य जननात्सिद्धसाधनतादिति भावः।
पुरुषसमवेतातिशयस्य परंपरासंबंधेन स्वरूपसंबंधेन साक्षाद्देवता ब्रीहिनिष्ठत्वस्याप्युपपन्नेनोतिरिक्तपदार्थकल्पनमिति
तत्वं अथोत्पन्नत्वलज्ञानवत्पुरुषकर्तृप्रोक्षणेन दोषाभावाददृष्टानुत्पादे शक्तिसिद्धिरिति चेन्न तत्र फलोऽनुत्पादात्प्रोक्षणस्य
हार्थे तदाचरणादिति भावः। बर्हिष इति बर्हिषः प्रयोगस्येत्यर्थः यथा तस्य जनितादृष्टस्य न पुनरुपयोगांतरं तथा ब्रीहेरदृष्टजननोप
गमात्तस्यापीत्यर्थः यद्वा व्यतिरेकदृष्टांतोयं यथा बर्हिस्तरणात् इत्यादिविधिबलात्तस्य पुनरुपयोगस्तथात्र नस्यादित्यर्थः। उक्त
मायेनेति व्यक्तिवचनन्यायेनावघाते चोक्तितस्यैवान्वये सर्वमिदमविरुद्धमिति भावः नन्नु पुरुषकर्तृत्वादिदोषेण पुरुषैनो
त्पद्यत इत्यगत्या ब्रीहिनिष्ठातिशयः स्वीकार्य इत्यत आह कार्टकर्मेति एवं ब्रीहिनिष्ठापि सन्नस्यादित्यर्थः पुरुषनिष्ठत्व (दृष्टं १

भ॰ चिं॰ साधकमुक्त्वा व्रीहिनिष्ठत्वे बाधकमाह किं चेति कार्यतेति भावकार्यत्वमित्यर्थः साश्रयेति स्वसमवायिकारणेत्यर्थः एवं च किंचिदाश्रयनाशे व्रीह्या
दिनाशेऽपि प्रत्यभिज्ञानस्य तज्जातीयत्वं विषय इति भावः संयोगस्येति ननु फलस्योपसंपादनत्वे तत्र व्यापारमात्रस्यैव धात्वर्थत्वेनत्य
१४८ जगत्योः पर्यायतापत्तिः अवच्छेदकीभूतयोः फलयोः विभागसंयोगरूपयोः धात्वर्थत्वाप्रवेशे स्पन्दमात्रस्यैवोभयधात्वर्थत्वात्तत्क
र्ममात्रस्यैवोभयजनकत्वे पतनादिवदवांतरजातिमादायाप्यपर्यायत्वस्य दुरुपपादकत्वादिति अत्र वदंति ॥ व्यापारे उपलक्षणीभू
148 तस्यापि फलस्य प्रतीतौ विशेषणत्वमेव इष्टसाधनताविधिपक्षे क्रियोपलक्षणस्यापीष्टस्य ज्ञाने विशेषणतावच्छेदकत्वं फलविशि
ष्टो व्यापारो यदि वा च्युततराशब्दात्फलविशिष्टव्यापारधीरपरथा फलोपलक्षितव्यापारधीरित्युभयथा फलांशेऽपि शक्तेः कुप्रतीत्यवि
शेषेऽपि न पर्यायतापत्तिः विशेषणत्वे पक्वान्तकर्मत्वानुपपत्तिरिति अस्फुरत्वात् प्रोक्षणजन्यापूर्वस्य साक्षात्स्वरूपसंबंधेन व्रीहिकर्मत्वं साक्षा
द्वीजन्यसंस्कारविषयतया घटादीनामिव एवं चाप्यसंस्कार्यत्वे कर्मणोऽभेदोऽप्युपपद्यत इत्यभिप्रेत्याह किं चेति व्रीहिमिति नस्य न कर्मणो
द्वितीयानुमितेर्व्यवहारकारणत्वात् कर्मताश्च कारकविशेषत्वात् किंतु साधुविभक्तिस्तथा चापीत्यर्थः नेचेति प्रतिष्ठितं पूज्यत इति
ति निष्ठास्वरसादिति भावः स्वप्रतिष्ठितमित्यत्र भूतार्थकक्तप्रत्ययबलादित्यर्थः अत एव तत्त्वेऽपि नांगत्वादिस्पर्शेनाशुद्धत्वाद्
वेत्यर्थः देवताचैतन्यपक्षमालंब्य परिहरति प्रतिष्ठाविधिनेति अहंकारेति अहमियं प्रतिमा मम शरीरमिस्मादित्यानरूपतत्त्वर्थः नन्वि राम
१४८

दंज्ञानविषयबाधानचतत्रसंभवतिविशेषदर्शनादितितत्राहस्वसादृश्येपतितयाचविशेषदर्शनेसत्यप्याहार्यभ्रमोयमित्यर्थः। ननुदेवतायाः
सर्वज्ञत्वाभावेनव्यासंगरक्षायांअव्यवहितनानादेशात्तत्रतत्रप्रतिष्ठाकथमहंकारममकारात्मिकासंस्कारनाशेवाकथंपूजाफलंकथंवा
ज्ञानसंस्कारयोरननुगतयोः पूजाप्रयोजकत्वमितिप्रथमकल्पनानुपपत्तिर्यत्रचव्यासंगवशान्नप्रत्यभिज्ञानंतत्रप्रतिष्ठितप्रतिमापू
जापिनिःफलास्यात्प्रतिष्ठितांपूजयेदित्यादिनाचप्रतिष्ठायास्तद्ध्वंसस्यवाहेतुत्वंबोध्यंनतुप्रत्यभिज्ञानस्यापीतिद्वितीयकल्पनानुप
पत्तिः दृष्टेनैवोपपत्तावदृष्टकल्पनानुपपत्तिरितितृतीयकल्पनानुपपत्तिरिति तत्स्वरसादाहवयंत्विति ननुयत्रप्रतिमायांप्रतिष्ठाजाता
दैवात्किंचिदवयवनाशादन्याप्रतिमाजातातत्रप्रतिष्ठारूपप्रतियोगिनोऽदृष्टेध्वंसस्यापिनदृष्टिः प्रतियोग्यधिकरणएवध्वंस
स्यदृष्टेः तथाचतत्रजानिःफलास्यान्नचेष्टापत्तिराचारविरोधादन्यायेतदुक्तंकपाकस्यापिनप्रवृत्तिःस्यात् नचतत्प्रतिमावृत्तित्वेनध्वंस
स्यनप्रयोजकत्वंकिंतुस्वरूपेणातथास्त्वेवेतिवाच्यंएवंहितद्ध्वंसस्यप्रतिमान्तरेस्यपूजाप्रयोजकतापिस्यादविशेषादितिचेत्। अत्राहुः
दृश्यंप्रतिष्ठितेतिसिद्धेः एवंचप्रतिमायामपिप्रमात्वव्यवहारात्तद्ध्वंसस्यतत्रापिवृत्तिरेवप्रतिमान्तरेचतदभावात्तदभावः यतएवचादिता
व्रीहीणांयत्किंचित्तत्त्वयवत्वाद्यान्तरेपिखंडव्रीहीणामुपयोगात्संस्कारकता एतेव्रीहयइतिप्रतीत्यातत्रापिपुरुषसमवेतसंस्कारसंबंध
सिद्धेः अन्यथासर्वमिदंतत्रापितुल्यमितिप्रतिष्ठाकालीनेति अत्रस्वसमानाधिकरणोत्पत्तिविशेषणंतेनतत्प्रतिष्ठाकालीनप्रतिमं

भ.चि. नरस्पृष्टेपस्पर्शप्रागभावाभावेन यावदर्थाभावान्नाप्रवृत्ततापत्तिः ननु प्रतिष्ठोत्तरमपि प्रवृत्तता न स्यात्प्रतिष्ठापूर्वकालीनास्पृष्टपस्पर्शा
नां जाततया तत्प्रागभावाभावादित्यत आह प्रतिष्ठाकालीनत्वं भावविशेषणं नन्वेकस्पर्शानंतरमग्रिमस्पर्शप्रागभावसत्वात्प्रवृत्त
तास्यादित्यत आह यावदिति आदिपदमत्र यत्र विभागादिपरं स्फुटं इति प्रतिमायां अप्रवृत्तत्वात् तनन्वनादिसंसर्गपदमात्रमस्तु किं विक
१४९ रमिति चेन्न अत्राहुः तावद्भावसहितप्रतिष्ठाध्वंसहेतुत्वे तावंतोऽपि हेतवः प्रतिष्ठुवं तथा चानादित्वानंतभावे सर्वाभावानामपि जनकत्व
मिति बहूनां जनकत्वे गौरवमिति स्पर्शप्रवृत्तनकत्वलाघवेन सादित्यावच्छिन्नार्थमनादिपदोपादानं एवमन्योन्याभावव्यावर्त्त
149 नार्थं संसर्गपदं। अन्ये तु प्रतिष्ठाकालीनत्वेन प्रतिष्ठोत्तरकालीनत्वं विवक्षितं तत्रापि स्पर्शा विशेषणान्न त्वाभावविशेषणं एवं च प्र
तिमायामस्पृश्यस्पर्शे जातेऽपि तद्ध्वंसान्योन्याभावाव्यवायप्रवृत्ततापत्तिः प्रतिष्ठोत्तरकालीनानां यावदस्पृष्टपस्पर्शानामभाव
